Kendriya Sanskrit Vidyapeetha Series—No. 18.

JÑĀPAKASAṂGRAHA

of

NĀGEŚA BHAṬṬA

with

VIVṚTI

of

N. S. RAMANUJA TATACHARYA

EDITED BY

N. S. RAMANUJA TATACHARYA

READER

Kendriya Sanskrit Vidyapeetha, Tirupati.

KENDRIYA SANSKRIT VIDYAPEETHA

TIRUPATI.

1972

First Edition, December 1972.

All Rights Reserved.

Published by:

Sri V. S. VENKATA RAGHAVACHARYA

Principal,

Kendriya Sanskrit Vidyapeetha,

Tirupati (India).

Printed at the Bharati Vijayam Press, Madras-5.

केन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला—१८

नागेशभट्टकृतः

ज्ञापकसंग्रहः

श्री. एन्. एस्. रामानुजताताचार्यकृतविवृतिसमेतः

संपादकः

एन्. एस्. रामानुजताताचार्यः

रीडर्,

केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपति

केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपति.

१९७२

प्रथमं संस्करणम्, १९७२
सर्वे अधिकाराः स्वायत्तीकृताः

प्रकाशकः

श्री. वि. एस्. वेंकटराघवाचार्यः
प्रिन्सिपाल्
केन्द्रीयसंस्कृतविद्यापीठम्
तिरुपति.

मुद्रणस्थानम्:
भारती विजयम् प्रेस्, मद्रास्-५.

FOREWORD

I had the pleasure of perusing the commentary written by Sriman N. S. Ramanuja Tatacharya on a grammatical work styled Jñāpaka-Saṁgraha written by Nagesha Bhatta, who lived in the beginning of 18th century. The word Jñāpaka was taken from the Mahabhashya of Patanjali to apply to those rules of grammar which have been indicated in the Aṣṭadhyayi of Pāṇini but not directly laid down in the form of Sutras therein. These points were noticed and elaborated in the Mahabhashya of Patanjali and he used the expression Jñāpayati in relation to those silent rules. This name was adopted by Nagesha Bhatta with regard to those Sūtras which he gathered in a book form. That book is a supplement to the Sūtras of the Aṣṭādhyāyi and is a valuable work on grammar. It was published in the original form but in Telugu character by Sriman Parthasarathi Bhattacharya, a Vyakarana scholar and Agama Vidwan of T. T. Devasthanams. The book, however, requires further elucidition as it is cryptic. This want has been supplied by Sriman Tatacharya by his commentary on the Jñāpaka-Saṁgraha. It is lucid and written in simple prose.

Sriman Ramanuja Tatacharya is a scholar of great eminence in all the four shastras and is a Siromani in every one of them. He took a first class first in them all from the Madras University. He is now teaching Vyākarana to post-graduate students in the Kendriya Sanskrit Vidyapeetha at Tirupati. Sri Parthasarathi Bhattacharya studied Vyākarana as a special subject. At his instance this commentary was undertaken by Sri Tatacharya. Sri Bhattacharya in his preface to this commentary speaks highly of this work. I am sure that the book will be useful and valuable to all scholars of grammar and equally useful to students. I wish it will become popular and find a place in all important Sanskrit libraries.

Tirupati
7—12—1972

M. ANANTHASAYANAM AYYANGAR
Chairman,
Sthaniya Prabandhak Samithi
K. S. Vidyapeetha

PREFACE

After the completion of my study of Vyakarana Śāstra at Tirupati, I was about to leave for my native place, Akulamannadu in Krishna District in the year 1919. On the eve of my departure, elders, friends and well-wishers felicitated me. In that function Mm. Sri Sethumadhavacharya, son of my Guruji Vaiyakarana-kesari, Vyakaranam Mm. Sri Subbarayacharya of Srimushnam blessed me and offered me the work 'Jñapaka Saṁgraha' as memento. He called the book a monumental work and asked me to publish it and bring it to wide circulation.

2. When I was the Asthana Pandit of Nuzvid Samsthanam under the patronage of Sri Raja Venkatadri Apparao, the then Raja of the Samsthanam, I got the book printed in Telugu script in 1922. Later I wrote a voluminous commentary on it and gave it to my friend Pandit Sri Nallan Venkatacharyaswami of Nuzvid for perusal. His untimely death and the consequent loss of the copy of the precious commentary which was the result of my toil, made me extremely unhappy for the time. As I had no other copy with me, I gave up my attempt to publish the commentary. Moreover certain pressing domestic affairs also engaged my immediate attention and I could not write a fresh one.

3. Time passed on. In 1970, I fortunately met Sri N.S. Ramanujatatacharya of the Kendriya Sanskrit Vidyapeetha, Tirupati whose erudition and knowledge of shastras attracted my attention. I considered him a fit person who could help me in bringing the 'Jñapaka Saṁgraha' to light. I requested him to write a commentary once again on it and make it available for publication. He took up the work with great pleasure and enthusiasm and got it ready for publication. I approached the Principal of the Kendriya Sanskrit Vidyapeetha, Tirupati to include the book in the list of publications and get the necessary sanction. He agreed to it. The book with the commentary was

got ready and sent to the press. When the authorities asked me to write a few words of introduction regarding the origin of the book etc., I deemed it an honour and a privilege. I thank them for giving me such an opportunity. I am thankful to *Bharata-jyothi* Sri M. Ananthasayanam Ayyangar Swami, the Chairman of Vidyapeetha and *Sahiti Vallabha* Sri V. S. Venkata Raghavacharyaswamiji, Principal of the Vidyapeetha for the steps taken in getting this valuable book published. I must also express my sincere thanks to the authorities of the Rashtriya Sanskrit Samsthan, particularly to Dr. R. K. Sharma, its Director for including this work among the publications of the Vidyapeetha.

I am confident that the book would be of immense use to the students and scholars of Vyakarana.

Tirumala,
7-12-1972.

AKULAMANNADU R. PARTHASARATHI BHATTACHARYA
Former Asthana Vidwan and Agamacharya,
Tirumala Tirupati Devasthanams, Tirupati.

प्रस्तावना

महाभाष्ये तत्र तत्र 'आचार्यप्रवृत्तिर्ज्ञापयति' इत्येवंरूपाणि बहूनि वाक्यानि दृश्यन्ते। सूत्रस्थेन लिङ्गेन ज्ञापितानि वचनानि तत्र विन्यस्यन्ते। तानि वचनानि द्विप्रकाराणि भवन्ति परिभाषारूपाणि तद्व्यतिरिक्तानि चेति। तत्र परिभाषारूपाणि वचनानि पाणिनीयव्याकरणात् प्राचीनेष्वपि व्याकरणेषु वचनरूपेण पठितानि पाणिनिना स्वकीयायाम् अष्टाध्याय्यां तत्तल्लिङ्गेन स्वानुमततया सूचितानि भवन्ति। तदुक्तं **परिभाषेन्दुशेखरे**—

> 'प्राचीनव्याकरणतन्त्रे वाचनिकानि, अत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते'

इति। तत्र परिभाषात्मकानि वचनानि संकलय्य **सीरदेवः** परिभाषावृत्तिनामकं ग्रन्थं निरमात्, **नागेशः** परिभाषेन्दुशेखरं न्यबध्नात्। परं तु परिभाषातिरिक्तानि यानि ज्ञापकसिद्धानि वचनानि महाभाष्योपनिबद्धानि तेषामपि संकलनेन यदि कोऽपि प्रबन्धो निर्मीयेत तदा विदुषां महते उपकाराय कल्पेतेति चिन्तयन्नहं प्राचीनैः कैरपि विपश्चिद्भिरत्र विषये प्रयत्नः कृतो न वेति अनुसन्दधान आसम्। यदृच्छया श्रीमद्भिर्वैयाकरणपञ्चाननैः वैखानसागमनिष्णातैः राष्ट्रपतिसंमानितैः पार्थसारथिभट्टाचार्यैः स्वयं पञ्चाशद्वर्षेभ्यः पूर्वम् आन्ध्रलिप्यां मुद्रितं पुनर्देवनागर्यां मुद्रणार्थं तिरुपतिस्थकेन्द्रीयसंस्कृतविद्यापीठाय समर्पितं नागेशभट्टकृतं ज्ञापकसंग्रहनामानं ग्रन्थं दृष्ट्वा महान्तमानन्दमन्वभवम्। एतं ग्रन्थमामूलाग्रं परामृशम्। महाभाष्यदर्शितं पन्थानमणुमात्रमप्यनतिक्रामन् अतिप्रामाणिकोऽयं ग्रन्थः अतिसंक्षिप्तः विना व्याख्यां दुर्बोधश्च वर्तते। अतो ललितविवरणेन सह यद्ययं ग्रन्थो मुद्रितः स्यात् तदा सर्वोपकारको

भवेदिति मतिः समजनि। तथैव भट्टाचार्यैः परया कृपया व्याख्यानकरणे नियुक्तोऽहं यथामति भाष्यादिग्रन्थान् परिशील्य ततः सारं संगृह्य स्ववाचा विवृतिनामकं व्याख्यानमस्य व्यरचयम्।

अस्मिन् ज्ञापकसंग्रहग्रन्थे बहूनि वचनानि परित्यक्तानि वर्तन्त इति काचन न्यूनता विद्यते। अतो यानि वचनान्यत्र न संगृहीतानि परं भाष्यनिबद्धानि तेषां संकलनं कृत्वा नागेशादृतां संक्षिप्तां शैलीमेवावलम्ब्य ज्ञापकसंग्रहपरिशिष्टनामकं मूलग्रन्थं निर्माय तस्यापि विवृतिनामकं व्याख्यानमकरवम्। भाष्यकारेण तत्र तत्र ज्ञापकसिद्धानि वचनानि उपन्यस्य तेषु कानिचित् 'नैतदस्ति ज्ञापकम्' इत्यादिना खण्डितानि। अतस्तादृशानि वचनानि परित्यज्य अन्येषां भाष्यसंमतानां वचनानां संकलनमकार्षम्। भाष्यानारूढान्यपि कानिचिद्वचनानि सिद्धान्तकौमुद्यां तत्र तत्र ज्ञापकेन साधितान्युपलभ्यन्ते। तेषामपि कतिपयशब्दसाधुत्वसमर्थनोपयोगित्वं पर्यालोच्य संकलनं द्वितीये ज्ञापकसंग्रहपरिशिष्टे व्यधाम्।

ज्ञापकसंग्रहस्य कर्ता

अस्य ज्ञापकसंग्रहस्य निर्माता नागेश इत्यत्र विषये किमपि स्पष्टं प्रमाणं नोपलभ्यते। अद्यावत् न कैरपि विमर्शकैः एवंनामा कश्चन ग्रन्थो नागेशेन प्रणीत इति समसूच्यत। अस्मिन् ग्रन्थेऽप्यादौ मध्येऽन्ते वा कुत्रापि नागेशनाम नोपलभ्यते, न वा नागेशः स्वकृते शेखरादिग्रन्थान्तरे ज्ञापकसंग्रहाख्यं स्वकृतं ग्रन्थं निरदिशत्। एवं स्थितेऽयं ग्रन्थो नागेशविरचित इति कथं निर्णीयत इति जायते शङ्का। आन्ध्रलिप्यां विंशतिपृष्ठात्मना मुद्रितस्यास्य ज्ञापकसंग्रहस्य उपोद्घाते पार्थसारथिभट्टाचार्या एवमलिखन्—

> 'अस्य ग्रन्थस्य एकैव मातृका गुरुवर्याणां दक्षिणदेशे अपरनागेशत्वेन प्रथितानां श्रीमतां महामहोपाध्यायसुब्बरायाचार्याणां तनूजन्मभिः सेतुमाधवाचार्यैः प्राप्ता। तथा तैरेव नागेशकृतत्वेन प्रोक्तोऽयं ग्रन्थः'

इति। अस्य तु मूलकोशो भारतदेशे न कुत्रापि पुस्तकभाण्डागारे लभ्यते। श्री सुब्बरायाचार्याः उत्तरदेशं गत्वा व्याकरणमधीत्य दक्षिणदेशे तदध्यापनेन तत्प्रचारमकार्षुरिति उत्तरदेशे कदाचिदियं मातृका तैर्लब्धा स्यात् इति संभावयितुमस्त्यवकाशः।

वस्तुतस्त्वेतद्ग्रन्थस्य परिशीलने कृते अस्य नागेशकृतत्वे न कापि विप्रतिपत्तिर्भविष्यतीति मन्ये। केषुचित् स्थलेषु उद्योतस्थसिद्धान्तसाम्यमत्र ग्रन्थे दृश्यते। तेन एतद्ग्रन्थोद्योतयोः समानकर्तृकत्वमूहितुं शक्यम्। उदाहरणार्थं कानिचित् स्थलानि प्रदर्शयामि—

ज्ञापकसंग्रहः	उद्योतः
(1) अपवादत्वात्सिद्धे इयमेकदेश्युक्तिः (पृ. १३)	एकदेश्युक्तित्वेनादोषात् (सू. १-१-३)
(2) अस्त्वाद्याश्रयानेकग्रहणमिति तदर्थः (पृ. १५)	तज्जात्याश्रयानेकव्यक्तिग्रहणमिति भावः (सू. १-१-१४)
(3) इदं द्वयमप्येकदेश्युक्तिः (पृ.६०)	एतदुत्तरं भाष्यमेकदेश्युक्तिः (सू. ३-१-३)
(4) ज्ञापिते कथं चारितार्थ्यम्, तस्मात् एकदेश्युक्तिरेतद्भाष्यम्। (पृ. ११०)	ज्ञापितेऽपि चारितार्थ्याभावात् कथं ज्ञापकत्वमिति चिन्त्यमेतत्। तस्मादत्र ज्ञापकोपन्यासपरो ग्रन्थ आचार्यदेशीयस्य (सू. ६-४-४२)
(5) तेन भाषायामपि बेभिदीति चेच्छिदीत्येतत् सिद्धं भवतीति भाष्योक्त्या अन्ययङ्लुगन्तानां भाष्ये असाधुतैव लभ्यते। (पृ.११२)	एवं चैतत्प्रयोगद्वयातिरिक्तयङ्लुगन्तं भाषायामसाध्वेव। (सू. ६-४-८७)

(6) इत उत्तरं स्थानिवत्त्वाभावज्ञापक- इत उत्तरं स्थानिवत्त्वाभावज्ञापनपरं मग्लोपिग्रहणमिति भाष्यं त्वेक- पूर्वभाष्यं त्वेकदेश्युक्तिः (सू. ७-४-२) देश्युक्तिः। (पृ. १२७)

अपि च भाष्यवार्तिकयोरनुक्तानि केनापि स्वमनीषया ज्ञापकसिद्धत्वेन कल्पितानि वचनानि अनादेयानीति नागेशस्य **सिद्धान्तः**। स च परिभाषेन्दुशेखरारम्भे 'भाष्यवार्तिकयोरुपनिबद्धानि' इति विशेषणं दत्तवता तेन सूचितः। किं च 'संज्ञापूर्वको विधिरनित्यः' 'आगमशास्त्रमनित्यम्' इत्यादीनां परिभाषाणां भाष्येऽदर्शनात् अप्रामाण्यम् 'तन्न। भाष्येऽदर्शनात्। भाष्यानुक्तज्ञापितार्थस्य साधुताया नियामकत्वे मानाभावात्' (परिभाषेन्दुशेखरः P. 232 Chaukhamba Series) इत्यनेन स्पष्टमुक्तं नागेशेन। अस्मिन् ज्ञापकसंग्रहेऽपि निबद्धानि सर्वाणि वचनानि भाष्योक्तान्येव। भाष्यानुक्तं सिद्धान्तकौमुद्यादावुक्तं किमपि वचनमत्र न विन्यस्तम्। तेनापि ज्ञायते अयं ग्रन्थो नागेशविरचितः स्यादिति। इतोऽतिरिक्तम् अस्य ग्रन्थस्य नागेशकृतत्वे किमपि प्रमाणं न लभ्यते।

ग्रन्थनाम्नः औचित्यम्

ज्ञापकसंग्रह इति नाम किं ग्रन्थकारेण दत्तम् उत अन्येन इति न ज्ञायते। परं त्वेतन्नाम्ना भट्टाचार्यैरयं ग्रन्थः आन्ध्रलिप्यां मुद्रापितः। ज्ञापकानां-वचनज्ञापकानां सूत्राणां संग्रहः संकलनमिति नाम्नोऽर्थः। अत्र चाष्टाध्यायीक्रमेणैव संकलनं वर्तते। 'ज्ञापकसिद्धवचनसंग्रहः' इति तु युक्तं नाम स्यात्। परं तु तन्नाम दीर्घम्। अपि च प्रथमसंस्करणे ज्ञापकसंग्रह इत्येव नाम दत्तम्। अतस्तेनैव नाम्ना इदानीं मुद्राप्यते। यस्य सूत्रस्य भाष्ये वचनं पठितम्, तत्सूत्रं प्रतीकरूपेण धृत्वा ततः ज्ञापकपूर्वकं वचनम् उपन्यस्यत इति शैली अत्र ग्रन्थे समादृता। प्रथमसंस्करणे विद्यमानाः काश्चन अशुद्धयः अस्मिन् संस्करणे अपाकृताः। [ ] इति चिह्नमध्ये शुद्धपाठा निवेशिताः।

कृतज्ञताविष्करणम्

एतद्ग्रन्थप्रकाशने कृतप्रयत्नेभ्यः **मुनित्रयार्हणादिग्रन्थनिर्मातृभ्यः श्रीपार्थसारथिभट्टाचार्येभ्यः** नमोवाकान् प्रयुनज्मि ।

एवं श्रीभट्टाचार्यपार्थनामनुसृत्य राष्ट्रियसंस्कृतसंस्थानं प्रति एतद्ग्रन्थप्रकाशनौचित्यं निवेद्य ततः संमतिं लब्ध्वा प्रकाशनव्यवस्थां संपादितवतां प्राच्यनव्यविद्यासंपन्नानां वयोऽध्यापनानुभवादिसमृद्धानां तिरुपतिस्थकेन्द्रीयसंस्कृतविद्यापीठस्य प्रिन्सिपाल्महोदयानां श्री **वि. एस्. वेङ्कटराघवाचार्याणां** सविधेऽपि आत्मनो धन्यतासूचकानि भूयांसि नमांसि निवेदयामि ।

एतं ग्रन्थमवलोक्य सारसंग्रहरूपमामुखं विलिख्य अनुगृहीतवताम् एतद्विद्यापीठीयस्थानीयप्रबन्धकसमिति-सभापतीनां पूज्यतमानां श्रीमताम् **अनन्तशयनमय्यङ्गार्महोदयानां** चरणयोः वन्दनानि समर्प्यन्ते ।

एवम् एतत्प्रकाशनानुमतिदानेनोपकृतवद्भ्यः राष्ट्रियसंस्कृतसंस्थानाधिकारिभ्यः सहृदयान् धन्यवादान् समर्पयामि । तथा समुचितया रीत्या मुद्रणं कृतवतां भारतीविजयमुद्रणालयाधिकृतानां कृतज्ञः भवामि ।

15-12-72
तिरुपति

एन्. एस्. रामानुजताताचार्यः

विषयानुक्रमणी

	पृष्ठसंख्या
ज्ञापकसंग्रहः	१-१३२
ज्ञापकसंग्रहपरिशिष्टम् (१)	१३३-२०१
ज्ञापकसंग्रहपरिशिष्टम् (२)	२०२-२२४
ज्ञापकसिद्धवचनसूची	२२५-२३१
शुद्धिपत्रम्	२३२

॥ श्रीः ॥

॥ ज्ञापकसंग्रहः ॥

अइउण् । १ । अकारो विवृत उपदिष्टः प्रक्रियादशायां चेत्यत्र 'अ अ' (सू. ८-४-६८) इति प्रत्यापत्तिवचनं ज्ञापकम् ।

विवृतिः

वृषशिखरिनिवासः श्रीनिवासः श्रिताना-
मभिमतफलदाने कल्पवृक्षातिशायी ।
अहरहरुपयातैः सेव्यमानोऽर्थिबृन्दैः
कलयतु कुशलं नः कोऽपि कारुण्यराशिः ॥ १ ॥

अनेकतन्त्रनिष्णातान् नित्यं शिष्यहितोद्यतान् ।
महानुभावधौरेयान् नमामि शिरसा गुरून् ॥ २ ॥

नागेशभट्टसुधिया बद्धो ज्ञापकसंग्रहः ।
पार्थसारथिना पूर्वमान्ध्रलिप्यां प्रकाशितः ॥ ३ ॥

प्राज्ञेनाज्ञापितस्तेन तस्य व्याख्यां समारभे ।
शब्दैः परिमितां नार्थैः विदुषां चित्तरञ्जनीम् ॥ ४ ॥

व्याजेनानेन भाष्यादिग्रन्थालोडनजा मतेः ।
शुद्धिः संजायते या सा कृतेरस्याः परं फलम् ॥ ५ ॥

तत्रभवान् पदवाक्यप्रमाणपारावारीणो नागेशभट्टः परिभाषाव्यतिरिक्तानि महाभाष्ये तत्र तत्र स्थितानि ज्ञापकसिद्धवचनानि संकलय्य ज्ञापक-

संग्रहनामानं ग्रन्थं कर्तुमारभमाणः प्रथमं वचनमाह—**अकारो विवृत** इति। 'अइउण्' इति सूत्रे अकारो विवृततयोपदेष्टव्यः आकारग्रहणार्थम् इति वार्तिककारेणोक्ते किं पुनरिदं सूत्रकारेणैव कृतस्योपदेशस्य वार्तिककारेण प्रयोजनमुच्यते, उताकृत एव विवृतोपदेशो वार्तिककृता कर्तव्यत्वेनोपन्यस्त इत्याक्षेपे सति भाष्यकार आह—'विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते। कथं ज्ञायते यदयं 'अ अ' इत्यकारस्य विवृतस्य संवृतताप्रत्यापत्तिं शास्ति' इति। अस्यायमाशयः—स्वभावतः संवृतस्याकारस्य प्रक्रियादशायां विवृतत्वमापन्नस्य प्रयोगकाले पुनः संवृतत्वप्राप्तिः 'अ अ' इति सूत्रेण प्रतिपाद्यते। इदं च सूत्रं शास्त्रान्ते विद्यते। अतस्तत्सूत्रात्प्राक्तनेषु प्रक्रियादशापरेषु सूत्रेषूपदिश्यमानः अकारः विवृत इत्यवगम्यते। तथा च विवृततया उपदिश्यमानस्य अकारस्यैव वार्तिककृता प्रयोजनमाख्यायत इति विषये 'अ अ' इति सूत्रं ज्ञापकमिति। तदाह—**अकारो विवृत** इति। ननु 'अ अ' इति सूत्रं नोक्तविषये ज्ञापकम्, तस्य प्रयोजनान्तरसद्भावात्। तथा हि—'अतिखट्वः, अतिमालः' इत्यादौ 'गोस्त्रियोरुपसर्जनस्य' (सू. १-२-४८) इति सूत्रेण विधीयमानः आकारस्य ह्रस्वः स्थानिनः आकारस्य विवृतत्वात् तदान्तर्यात् विवृतो भवेत् इति स संवृत एव यथा स्यादित्येवमर्थं 'अ अ' इति सूत्रमिति कथं तज्ज्ञापकं भवेत् इति चेत्—न। यदि हि लोके वेदे वा कुत्रापि विवृतोऽकारो भवेत् तदा आकारस्य स्थाने भवन् ह्रस्वः स्थानित आन्तर्यात् विवृतो भवेत्। न हि विवृतोऽकारः कुत्राप्यस्ति। अपि तु संवृत एवास्ति। तथा च संवृत एव अकारो भविष्यति इति 'अ अ' इति सूत्रं न अतिखट्व इत्यादौ ह्रस्वस्य संवृतत्वफलकम्। ततश्च शास्त्रान्ते प्रक्रियासिद्धचनन्तरमकारस्य संवृतत्वं विदधत्सूत्रं पूर्वसूत्रेषु विवृतोऽकार एवोपदिष्टः प्रत्येतव्य इति ज्ञापयति। ततश्चोपदिष्टस्यैव विवृतस्य प्रयोजनमन्वाख्यायते वार्तिककारेणेति सिद्धम्। **प्रत्यापत्तिः**—स्वभावतः संवृतस्य विवृतत्वं प्राप्तस्य पुनः स्वस्वभावभूतसंवृतत्वप्राप्तिः। 'प्रक्रियादशायामकारो विवृत उपदिष्ट इत्यत्र अ अ इति प्रत्यापत्तिवचनं ज्ञापकमित्यन्वयः।

[ज्ञा.] ऋलृक् ॥ २ ॥ प्रकृतिवदनुकरणं भवति। 'क्षियः' (सू. ६-४-५९) इत्यादावियङ्निर्देशात्।

[वि.] ऋलृक् इति सूत्रे लृकारोपदेशप्रयोजनकथनावसरे अशक्तिजानुकरणमेकं प्रयोजनमुक्तं भाष्ये। तथाहि - कयाचित् ब्राह्मण्या ऋतक इति प्रयोक्तव्ये अशक्त्या यो लृतक इति प्रयोगः तस्य यत् ब्राह्मण्ल्लृतक इत्याह इत्यनुकरणं तदशक्तिजानुकरणमित्युच्यते। तत्र ब्राह्मणी+लृतक इति स्थिते लृकारस्याच्त्वात् तस्मिन् परतः 'इको यणचि' (सू. ६-१-७७) इति सूत्रेण ईकारस्य यणि ब्राह्मण्ल्लृतक इति भवति। यदि तु ऋलृक्सूत्रे लृकारो नोपदिश्येत ऋक् इत्येवोच्येत तदा लृकारस्याच्त्वाभावात् इको यणचीति सूत्रं न प्रवर्तेत। अतो लृकारोपदेशः कर्तव्यः इत्युक्त्वा तस्य प्रत्याख्यानं कृतम्। तथाहि 'प्रकृतिवदनुकरणं भवति' इति परिभाषा भवति। तस्याश्च, अनुकरणं प्रकृतिवत् अनुकार्यतुल्यं भवति, अनुकार्ये यत्कार्यं भवति अनुकरणेऽपि तद्भवति इत्यर्थः। अत्र चानुकार्य ऋतकशब्दः अनुकरणम्ल्लृतकशब्दः। अनुकार्ये ऋतकशब्दे परतः ऋकारस्याच्त्वात् 'इको यणचि (सू. ६-१-७७) इति सूत्रं यथा प्रवर्तते तथा अनुकरणे लृतकशब्देऽपि तत्सूत्रं प्रवर्तते इति यणादेशसिद्धया लृकारोपदेशो मास्तु इति भावः। 'प्रकृतिवदनुकरणं भवति' इत्यत्र ज्ञापकं तु 'क्षियो दीर्घात्' (सू. ७-२-४६) इत्यादावियङ्निर्देशः। तथा हि सूत्रस्थः 'क्षि' शब्दः धातुपाठस्थस्य क्षि इत्यस्यानुकरणम्। अनुकरणशब्दस्य क्रियावाचित्वाभावेन धातुत्वाभावात् 'अचिश्नुधातुभ्रुवाम्' (सू. ६-४-७७) इति सूत्रेणेयङ् दुर्लभः। इयङ् तु निर्दिष्टः पाणिनिना। तेनेदं ज्ञायते यत् प्रकृतिवदनुकरणं भवतीति। तथा च क्षिधातोर्भवन् इयङ् तदनुकरणात् क्षिशब्दादपि भवितुमर्हतीति स्वांशे चरितार्थता। अन्यत्र प्रयोजनं तु 'द्विः पचन्त्वित्याह' इत्यत्र पचन्तुशब्दे निघातस्वरः। पचन्तु पचन्तु इति द्विवारं केनचिदुक्ते तस्यानुकरणं 'द्विः पचन्तु' इति। अस्य पचन्तुशब्दस्य क्रियासाधनाद्यवाचकत्वात्तिङन्तत्वं नास्तीति 'तिङ्ङतिङः' (सू. ८-१-२८) इति सूत्रेण अतिङन्तात् परं तिङन्त-

मनुदात्तमित्यर्थकेन विधीयमानः निघातस्वरः न स्यात्। प्रकृतिवदनुकरणं भवतीति वचने स्वीकृते तु अनुकार्ये पचन्तु इति तिङन्ते निघातवत् अनुकरणे पचन्तुशब्देऽपि स स्वरः सेत्स्यतीति।

[ज्ञा०] एओङ्॥ ३ ॥ गोनौग्रहणात् ज्ञापकात् नाव्यपवृक्तस्यावयवस्य तद्विधिरिति। (३)

[वि०] 'एओङ्' इति सूत्रे य एते आकारादिष्कारसदृशा अवयवाः, ऋकारऌकारयो रेफलकारसदृशावयवौ, सन्ध्यक्षरेषु ए ओ ऐ औ इत्येतेषु अकारेकारोकारसदृशा अवयवाः तत्र केवलवर्णानामकारादीनां विधीयमानं कार्यं भवति न वेति विचारे, यदि वर्णावयवान् वर्णग्रहणेन गृहीत्वा तत्र वर्णकार्यं क्रियेत तदा अग्ने इन्द्रम् वायो उदकमित्यादौ एकारोत्तरभागस्य इकारस्य इकारग्रहणेन ग्रहणात् तस्य इन्द्रमिति सवर्ण-इकारपरकत्वात् ओकारस्थस्य उकारस्य सवर्णोकारपरकत्वाच्च 'अकः सवर्णे दीर्घः' (सू. ६-१-१०१) इति दीर्घः प्राप्नोतीति दोषमाशङ्क्य तत्परिहाराय इदं वचनमुपात्तम् 'नाव्यपवृक्तस्यावयस्य तद्विधिरिति।' अव्यपवृक्तस्य योऽवयवस्तस्येति व्यधिकरणे षष्ठ्यौ। **अव्यपवृक्तस्य**—अभिन्नबुद्धिविषयस्य एकत्वविषयकबुद्धिग्राह्यस्य एकमित्याकारकबुद्धिविषयस्य समुदायस्य योऽवयवः तस्य तद्विधिः—पृथग्भूतवर्णविधिर्न भवतीति उक्तवचनस्यार्थः। एवं च 'ए इत्यक्षरमेकं' इति बुद्धिगृहीते ए इति समुदायेऽवयवः य इकारस्तस्य, समुदायाघटकस्य इकारस्य यो विधिः सवर्णदीर्घादिः स न भवतीति अग्ने इन्द्रमित्यादौ सवर्णदीर्घापत्तिदोषो नेत्यर्थः। उक्तवचने ज्ञापकमाह **गोनौग्रहणा**दिति। अयमाशयः—'गोद्यचोऽसङ्ख्यापरिमाणाश्वादेर्यत्' (सू.५-१-३९) इति सूत्रस्थं गोग्रहणम्, 'नौद्यचष्ठन्' (सू. ४-४-७) इति सूत्रस्थं नौग्रहणं चोक्तवचने ज्ञापकम्। तत्र प्रथमसूत्रस्य गोशब्दात् अच्द्वययुक्ताच्च शब्दात् तस्य निमित्तं संयोग उत्पातो वेत्यर्थे यद्भवति इत्यर्थः। गव्यं धन्य इत्युदाहरणम्। तत्र गोशब्दे य ओकारः अकारउकारसमुदायरूपः तदवयवयोः

अ उ अनयोः पृथग्भूताकारग्रहणेन उकारग्रहणेन च ग्रहणे सति गोशब्दस्य द्यच्कत्वात् द्यच इत्यनेनैव ग्रहणे सिद्धे गोशब्दग्रहणं व्यर्थं सत् समुदायावयवस्य वर्णग्रहणेन ग्रहणं नेति ज्ञापयति। एवं द्वितीयसूत्रस्य नौशब्दात् द्यच्कशब्दाच्च तरतीत्यर्थे ठन् भवतीत्यर्थः। नाविकः घटिक इत्युदाहरणम्। तत्र नौशब्दे औकारस्य वर्णद्वयसमुदायरूपत्वेन द्यच्कत्वं अस्तीति द्यच इत्यनेनैव तस्य ग्रहणे सिद्धे नौग्रहणमपि व्यर्थं सत् उक्तवचनं ज्ञापयति। ज्ञापिते च तस्मिन् ओकार-औकारयोः वर्णद्वयरूपतया ग्रहणाभावात् द्यच्कत्वं नास्तीति पृथक् गोनौग्रहण-मिति स्वांशे चारितार्थ्यम्। ज्ञापनफलं तु अमे इन्द्रमित्यादौ सवर्णदीर्घाभाव इति पूर्वोक्तमेवेति।

[ज्ञा०] वर्णैकदेशानां वर्णग्रहणेनाग्रहणमिति पक्षे क्षुभ्नादिषु तृप्नोतिशब्दपाठात् ऋवर्णान्नस्य णत्वं ज्ञाप्यते।

[वि०] ऋलृक्सूत्रे आकारादिसन्ध्यक्षरैकदेशभूतानां पृथग्भूतवर्णग्रहणे-नाग्रहणमिति पक्षे मातृणामित्यत्र णत्वं न सिध्यति। मातृ नाम् इति स्थिते ऋकारात्परस्य नकारस्य णत्वविधायकसूत्राभावात्। ग्रहणपक्षे तु ऋकारमध्य-स्थरेफात्परत्वमादाय 'रषाभ्यां नो णः' (सू. ८-४-१) इति सूत्रेण णत्वं भविष्यति इत्याक्षेपे अग्रहणपक्षेऽपि ऋवर्णात्परस्य नस्य णत्वं ज्ञापकात् साध्यते। तथा हि—क्षुभ्नादिगणे नृनमनशब्दः पठितः। तत्प्रयोजनं तु 'क्षुभ्नादिषु च' (८-४-३९) इति सूत्रेण ऋकारात्परस्य नस्य णत्वनिषेधः। यदि तु ऋवर्णात्परस्य नस्य णत्वं प्रापकसूत्राभावात् न भवेत् तर्हि णत्वप्राप्त्य-भावात् तन्निषेधफलकः क्षुभ्नादिगणे पाठः व्यर्थः स्यात्। न च नार्नमनिः इत्यत्र रेफात्परस्य नस्य णत्वनिषेधार्थं तस्य तद्गणे पाठ इति वाच्यम्। एवमपि तृप्नोति-शब्दस्य तद्गणे पाठस्योक्तवचनज्ञापकत्वात्। तृप्नोतिशब्दे ऋवर्णात्परस्य नस्य णत्वाभावे प्राप्त्यभावान्निषेधो व्यर्थस्सन् ज्ञापयत्येव ऋवर्णान्नस्य णत्वं भवतीति।

[ज्ञा.] अचतद्व्याप्यप्रत्याहारेष्वितां न ग्रहणम्। 'उणादयः' (सू. ३-३-१) इत्यादिज्ञापकात्। (सू ५)

[वि.] अच् प्रत्याहारे तद्व्याप्येषु अक् इक् इत्यादिप्रत्याहारेषु च मध्यवर्तिनामित्संज्ञकानां वर्णानां णकारककारादीनां ग्रहणं न भवति। उणादय इति निर्देशात्। अजादिप्रत्याहारेण यदि मध्यवर्तिनां इतामपि ग्रहणम् तदा णकारस्याप्यच्त्वात् 'उण्' शब्दे अचि णकारे परे इकः उकारस्य यणि व्णादयः इति निर्देष्टव्यं भवेत्। यतोऽच्कार्यं यणं विना उणादय इति निर्दिष्टम् अतः प्रत्याहारेष्वितां न ग्रहणमिति ज्ञाप्यते इत्यर्थः। तेन श्रीकान्त इत्यादौ ईकारस्य न यण्।

अत्र हलादिप्रत्याहारमध्यवर्तिनामपि इतां ग्रहणं नेष्यते। एवं स्थिते अचतद्व्याप्यप्रत्याहारेष्विति कुतः प्रोक्तमिति न जानीमः। अत एव कौमुद्याम् 'प्रत्याहारेष्वितां न ग्रहणम्' इत्येवोक्तम्।

वस्तुतस्तु अच्प्रत्याहारे इतां ग्रहणं न इत्येव ज्ञापकसिद्धं वचनम्, न तत्र तद्व्याप्य इत्यस्य प्रवेशः। न च अगादिप्रत्याहारे इतः ग्रहणापत्तिरिति वाच्यम्। हल्षु उच्चारणार्थाकारोच्चारणेनोच्चारणार्थवर्णहीनहलां हल्घटितप्रत्याहारे ग्रहणाभावस्य वक्तुं शक्यत्वात्। अत एव 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न' इति श्लोकवार्तिके 'अज्ग्रहणेषु' इत्येवोक्तम् इति सुधीभिराकलनीयम्। स्पष्टं चेदं कैयटे॥

[ज्ञा.] हयवरट् ॥ ५ ॥ 'हलो यमां यमि' (सू. ८-४-६४) 'झरो झरि' (सू. ८-४-६५) विभाषानुवृत्तौ 'शरोऽचि' (सू. ८-४-४९) इति द्वित्वनिषेधो ज्ञापकः। व्याख्यानं वा शरणम्।

[वि.] हयवरट्सूत्रे अन्तःस्थानां यरलवानामण्सूपदेशः किमर्थ इति पृष्ट्वा 'सँय्यन्ता' इत्यत्र सम् यन्ता इति स्थिते मकारस्य 'मोऽनुस्वारः' (सू. ८-३-२३)

इत्यनुस्वारे तस्य परसवर्णे च कृते सँय् यन्ता इत्यत्र पूर्वयकारस्य यर्ग्रहणेन ग्रहणात् 'अनचि च' (सू. ८-४-४७) इति द्वित्वे त्रियकारं रूपं सिद्ध्यति। अन्तःस्थानामण्सूपदेशाभावे यकारस्याण्त्वाभावात् सः अणुदित्सूत्रेण सवर्णानुनासिकयकारग्राहको न भवतीति पूर्वस्यानुनासिकयकारस्य यर्ग्रहणेनाग्रहणात् द्वित्वं न भवेत्। अतो द्वित्वसिद्ध्यर्थं यकारादीनामुपदेशः।

ननु माभूदत्र द्वित्वम्। न च सति द्वित्वे त्रियकारं द्वित्वाभावे द्वियकारमिति रूपभेदात् द्वित्वमावश्यकमिति वाच्यम्। द्वित्वे सत्यपि यकारत्रये मध्ययकारस्य 'हलो यमां यमि लोपः' (सू. ८-४-६४) इति सूत्रेण लोपात् द्वियकारस्यैव रूपस्य सिद्धेः इति चेत्-स्यादेतदेवम् यदि 'हलो यमां यमी'ति लोपो नित्यः स्यात्। स तु वैकल्पिकः। तथा च द्वित्वे सति यकारलोपपक्षे द्वियकारम्, लोपाभावपक्षे त्रियकारमिति रूपभेदसिद्धये द्वित्वमावश्यकम्। तच्च पूर्वोक्तरीत्या अन्तस्थानामण्सूपदेशे सत्येव घटत इति भाष्यकारेणोक्तम्। तदुपरि 'हलो यमां यमि' (सू. ८-४-६४) इति लोपो वैकल्पिक इति कथं ज्ञायते इति शङ्कायामाह वार्तिककारः—

'अनुवर्तते विभाषा शरोऽचि यद्वारयत्ययं द्वित्वम्' इति। अस्यार्थः— 'झरो झरि सवर्णे' (सू. ८-४-६५) इति सूत्रे 'झयो होऽन्यतरस्याम्' (सू. ८-४-६२) इति सूत्रात् अन्यतरस्यामित्यनुवर्तते इत्यवश्यं वाच्यम्। अन्यथा 'शरोऽचि' (सू. ८-४-४९) इति द्वित्वनिषेधो व्यर्थः स्यात्। 'शरोऽचि' इत्यनेन हि अचि परतः शरः द्वित्वं निषिध्यते। चतुर्षु। अत्र रेफात्परस्य षकारस्य 'अचो रहाभ्यां द्वे' (सू. ८-४-४६) इति सूत्रप्राप्तं द्वित्वं निषिध्यते। अत्रेयमाशङ्का - अस्त्वत्र द्वित्वम्। द्वित्वे कृते चतुर्ष्षु इति स्थिते 'झरो झरि सवर्णे' इति प्रथमषकारस्य लोपे इष्टं रूपं सिद्ध्यत्येव। अतः 'शरोऽचि' (सू. ८-४-४९) इति सूत्रं व्यर्थमिति। तत्रेदं समाधानं वक्तव्यम् यत् 'झरो झरि' इति सूत्रे विकल्पानुवृत्तिं ज्ञापयतीदं सूत्रम्।

तथा च द्वित्वे कृते लोपस्य वैकल्पिकत्वात् लोपपक्षे एकषकारं लोपाभावपक्षे द्विषकारमिति रूपद्वयं भवेत्। अस्माकं तु चतुर्षु इति एकषकारमेव रूपमिष्यते। अतः 'शरोऽचि' इति द्वित्वनिषेधकं सूत्रमिति सूत्रसार्थक्यमिति। इत्थं च 'शरोऽचि' सूत्रेण 'झरो झरि' इति सूत्रे अन्यतरस्यामित्यनुवर्तत इति ज्ञापिते सति ततः पूर्वतने 'हलो यमां यमि' (८-४-६४) इति सूत्रेऽपि अन्यतरस्यामित्यनुवर्तत इति सिद्ध्यति। ततश्च सँयन्ता इत्यत्र यकारस्य द्वित्वे हलो यमामिति लोपपक्षे द्वियकारं लोपाभावपक्षे त्रियकारमिति भेदसिद्धये अन्तःस्थानामण्सूपदेश इति प्रघट्टकार्थः। तदेतत् सर्वं मनसिकृत्य **'हलो यमां यमि' 'झरो झरि'** इति सूत्रद्वयमुपादाय ततः **विभाषानुवृत्तौ** इति कथितवान्।

ननु तत्रेवोपसंहारभाष्ये— 'तदेतदत्यन्तसंदिग्धमाचार्याणां वर्तते विभाषानुवर्तते न वेति' इति कथितम्। तथा च कथमेतदित्याशङ्क्याह— **व्याख्यानं वा शरणमिति।** सर्वत्र च सन्दिग्धस्थले इयं परिभाषोपतिष्ठते 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षण'मिति। तथा च पूर्वोक्तसूत्रयोः विभाषानुवर्तते इति व्याख्यास्यामः। अतो न कोऽपि दोष इति भावः।

[ज्ञा०] लण् ॥ ६ ॥ 'ढ्रलोप' इत्यत्र पूर्वेणाण्ग्रहणं न परेण। 'अचश्च (सू. १-२-२८) इत्युपस्थित्यैव सिद्धे अणग्रहणात्।

[वि०] 'लण्' सूत्रे एवं विचारः प्रवृत्तः। णकाररूपः इत् द्विरनुबध्यते 'अइउण्' इत्यत्र 'लण्' इत्यत्र च। तत्र अण् इण् प्रत्याहारयोः सन्देहो भवति किं पूर्वेण णकारेणायं प्रत्याहार उत परेणेति। अस्मिन् सन्देहे वार्तिककारः यत्र यत्राण्ग्रहणमिण्ग्रहणं च वर्तते तत्र सर्वत्र ज्ञापकमहिम्ना निर्णयः कर्तुं शक्य इत्युक्तवान्। तानि स्थलानि सङ्कलय्योपन्यस्यति—**'ढ्रलोप'** इत्यादिना। 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (सू. ६-३-२११) इति सूत्रे अण् किं पूर्वणकारेण प्रत्याहारः उत परेण लण्सूत्रस्थणकारेणेति संदेहः। पूर्वेणाण्ग्रहणं न परेणेति निर्णयः।

किं तत्र प्रमाणमित्यत्राह—**अचश्चेति**। अयमाशयः। यदि ढ्लोपसूत्रे अण् परेण प्रत्याहारः स्यात् तदा अण् इत्यनेन अ इ उ ऋ ऌ ए ओ ऐ औ ह् य् व् र् ल् इत्येतान्यक्षराणि विवक्षितानि स्युः। तत्र च दीर्घयोग्यता औकार-पर्यन्तानामेव। ततश्च अणो दीर्घ इत्युक्ते अचो दीर्घ इत्येव फलितम्। एवं सति ढ्लोपसूत्रेऽण्ग्रहणं व्यर्थम्। 'अचश्च (सू. १-२-२८) इति परिभाषा-सूत्रेण ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्र अच इति षष्ठ्यन्तं पदमुपतिष्ठत इत्यर्थकेन अच इति पदोपस्थित्यैव अचो दीर्घलाभात्। अतो अण्ग्रहणं व्यर्थं सत् ज्ञापयति अत्र सूत्रे पूर्वेणैव प्रत्याहार इति। तथा चात्र सूत्रे अइउ इत्येतेषां त्रयाणामेव दीर्घोऽभिप्रेतः। स च अच इति पदोपस्थितौ न लभ्येत। अतः अण्ग्रहणमिति स्वांशे चारितार्थ्यम्। आतृढ इत्यादौ दीर्घाभावः प्रयोजनं इति।

नन्वेवमपि 'केऽणः' (सू. ७-४-१३) इति सूत्रे अण् पूर्वेण परेण वा इति संदेह इत्यत्राह—

[ज्ञा०] अत एव 'केऽण' (सू. ७-४-१३) इत्यत्राण् पूर्वेणैव।

[वि०] **अत एवेति**। अच इत्युपस्थित्या सिद्धत्वादेवेत्यर्थः। अयं भावः—'केऽणः' इति सूत्रेण कप्रत्यये परतः अणो ह्रस्वो विधीयते। ज्ञका कुमारिका इत्युदाहरणम्। तत्राण् यदि परेण प्रत्याहारः तदा ऌण् पर्यन्तवर्णेषु अचामेव ह्रस्वयोग्यता वर्तत इति अचामेव ह्रस्वो विधित्सितो भवेत्। तथा सति अच इति षष्ठ्यन्तपदोपस्थित्यैव अचो लाभे अण्ग्रहणं व्यर्थं भवेत्। अतो ज्ञापयति अण् अत्र सूत्रे पूर्वेणैवेति। प्रयोजनं तु गोका नौकेत्यादौ ह्रस्वाभावः। अन्यत्सर्वं पूर्ववत्।

नन्वेवमपि 'अणोऽप्रगृह्यस्यानुनासिकः' (सू. ८-४-५७) इति सूत्रे अण् पूर्वेण परेण वेति संदेह इत्यत्राह—

[ज्ञा.] अणोऽप्रगृह्यस्येत्यत्रापि अच इति वक्तव्ये अण्ग्रहणात्पूर्वेणैव ।

[वि.] **अणोऽप्रगृह्यस्य** इति । 'अणोऽप्रगृह्यस्य' इति सूत्रेणावसाने अप्रगृह्यस्याणोऽनुनासिको विधीयते । तत्राण् यदि परेण प्रत्याहारः तदा अच इत्येव ब्रूयात् । न च हयवरलानामपि अनुनासिकविधानार्थं अण इत्युक्तमिति वाच्यम् । अप्रगृह्यपदेन नञिवयुक्तन्यायेन प्रगृह्यभिन्नस्य प्रगृह्यसदृशस्य च ग्रहणात् अच एव प्रगृह्यसंज्ञासद्भावात् प्रगृह्यभिन्नः अच्त्वेन तत्सदृशः अजेव अप्रगृह्याण्पदेन ग्रहीतुं शक्येतेति अच इति वक्तव्ये अण इत्युक्तेर्व्यर्थत्वात् । तथाचात्र अण् पूर्वेणैवेति अण्ग्रहणं ज्ञापयति । तथा सति अ इ उ एतेषामेव ग्रहणमत्र विवक्षितम् । तच्च अच इत्युक्ते न सिध्येदिति अण इत्युक्तमिति स्वांशे चारितार्थ्यम् । अन्यत्र प्रयोजनं तु कर्तृ हर्तृ इत्यादौ ऋकारस्यानुनासिकत्वं न भवतीति ।

नन्वेवमपि 'उरण् रपरः' (सू. १-१-५१) इति सूत्रे अण् पूर्वेण परेण वेति सन्देह इत्याह—

[ज्ञा.] 'उरञ्रपर' इति वक्तव्ये अण्ग्रहणात्पूर्वेणैव ।

[वि.] **उरञ्रपर** इति । ऋकारस्थाने हयवरलानामसम्भवात् अच एव ऋस्थानिकत्वसम्भवात् उरञ् इति वक्तव्ये उरण् इत्युक्तिर्व्यर्था । न च अच् अण् इत्यनयोः समानमात्रावत्त्वात् लाघवगौरवचर्चा नास्तीति वाच्यम् । अण् पदेन अजुपस्थापिताक्षराधिकाक्षराणामप्युपस्थितिरिति उपस्थितिकृतगौरवस्य अण् पदोच्चारणे सद्भावात् । ततश्च उरञ् इति वक्तव्ये उरण् इत्युक्तिः अण्पदं पूर्वेण णकारेण प्रत्याहार इति ज्ञापयति । तथा च अजित्युक्ते ऋकारादीनामपि ग्रहणं भवेत् । तद्व्यावृत्त्यर्थं अण् इत्युक्तमिति स्वांशे चारितार्थ्यम् । अन्यत्र प्रयोजनं तु मातॄणामित्यादौ ऋकारस्थाने भवन् दीर्घः रपरो न भवतीति ।

नन्वेवमपि 'अणुदित्सवर्णस्य चाप्रत्ययः' (सू. १-१-६९) इति सूत्रे अण् पूर्वेण परेण वेति सन्देह इत्यत आह—

[ज्ञा.] अणुदिदित्यत्र परेण 'उर्ऋत्' इति तपरकरणात् ज्ञापकात्।

[वि.] **अणुदिदिति।** सवर्णग्राहके 'अणुदित्सवर्णस्य चाप्रत्ययः' (सू. १-१-६९) इति सूत्रे अण् परेणैव णकारेण, न पूर्वेण। अत्र च 'उर्ऋत्' (सू. ७-४-७) इति सूत्रे तपरकरणं ज्ञापकम्। तथा हि अचीकृतदित्यादौ कृतघातोश्चुरादेः लुङि चङि द्वित्वादौ अचीकृत् + अत् इत्यत्र उपधाया ऋवर्णस्य स्थाने ऋत्स्याद्वा चङ्परे णौ इत्यर्थकेन 'उर्ऋत्' (सू. ७-४-७) इति सूत्रेण ऋकारस्य ऋकारे अचीकृतत् इति रूपम्। अत्र ऋकारस्य स्थाने ऋकार एव यथा स्यात् ऋकारो मा भूदित्येवमर्थं तपरत्वं क्रियते। यदि चाणुदित्सूत्रे पूर्वेण णकारेणाण्ग्रहणं स्यात् तदा ऋकारोऽनण्त्वात् भिन्नकालस्य ऋकारस्य ग्राहक एव न भवतीति ऋकार एव आदेशो भविष्यति न ऋकार इति किं तपरत्वेन। कृतं च तत् ज्ञापकं परेणाण्ग्रहणस्य। ततश्च ऋकारस्याप्यणत्वात् स सवर्णस्य ऋकारस्यापि ग्राहक इति कदाचित् ऋकारोऽपि भवेत् स मा भूत् ऋकार एव भवतु इत्येतदर्थं तपरकरणमिति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु ऋकार अष्टादशानां संज्ञेति। ननु उर्ऋत् इति सूत्रे तपरकरणाभावेऽपि ऋकारो विधीयमानः अप्रत्यय इत्युक्तेः सवर्णं न ग्रहीष्यतीति तपरकरणं व्यर्थमिति चेत् अत्राह - उद्योतकारः — 'तपरत्वाभावे आदेशान्तरनिवृत्त्यर्थत्वेन स्वरूपाभ्यनुज्ञानार्थत्वेनापूर्वबोध्यत्वाभावेन चाविधेयत्वात्' इति।

नन्वेवमपि 'इणः षः' (सू. ८-३-३९) इत्यादाविण्ग्रहणेषु पूर्वेण परेण वा णकारेण प्रत्याहार इति सन्देह इत्यत आह—

[ज्ञा.] इण् परेणैव । 'अचिश्नुधातु' (सू. ६-४-७७) इति सूत्रे इण इत्येव सिद्धे य्वोरित्युक्तेर्ज्ञापकात् ।

[वि.] **इण् परेणैव** इति । 'अचि श्नुधातुभ्रुवाम्' इति सूत्रे य्वोः इत्यनेन इवर्णोवर्णयोः ग्रहणम् । यदि च इण् प्रत्याहारः पूर्वेण णकारेण तदा इण् इत्यनेनापि इउवर्णयोरेव ग्रहणम् । ततश्च य्वोः इत्यस्य स्थाने इणः इत्येव ब्रूयात् । न चात्र किं लाघवमिति वाच्यम् । य्वोः इति पदे यकारवकारयोरेका मात्रा ओकारस्य द्वे मात्रे विसर्गस्यार्धमात्रा इति आहत्य सार्धास्तिस्रो मात्रा भवन्ति । इणः इत्यत्र तु इकारस्यैका ण्कारस्यार्धं अकारस्यैका विसर्गस्यार्धमिति तिस्रो मात्रा इति अर्धमात्रालाघवं वर्तते । अतो लाघवात् इणः इति वक्तव्ये य्वोः इत्युक्तिः इण्परेण णकारेणेति ज्ञापयति । तथा च इणः इत्युक्ते ऋकारादीनामपि ग्रहणं भवेदिति तद्वारणाय य्वोरित्युक्तमिति स्वांशे चारितार्थ्यम् । अन्यत्र प्रयोजनं तु 'इणः षः' (सू. ८-३-३९) इत्यादौ ओकारस्यापि ग्रहात् गोषूक्तमित्यादौ षत्वसिद्धिरिति ।

[ज्ञा.] 'वृद्धिरादैच्' ॥ १-१-१ ॥ 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' (सू. ७-१-७५) इत्युदात्तग्रहणं ज्ञापकं 'अभेदका गुणाः' इति ।

[वि.] 'वृद्धिरादैच्' इति सूत्रे आकारस्य तपरकरणं कर्तव्यम्, सवर्णार्थमिति वार्तिककारेणोक्तम् । तस्य गुणानां भेदकत्वात् यद्गुणस्योच्चारणं तद्गुणस्यैव संज्ञाप्रसङ्गे गुणान्तरयुक्तानामपि संज्ञाप्राप्त्यर्थं तपरकरणमित्यर्थः । तदुपरि गुणाः आनुनासिक्योदात्तादयः भेदका अभेदाकाश्चेति पक्षद्वयमुपन्यस्य, उभयमिदं गुणेषूक्तं भेदका अभेदका इति किं पुनरत्र न्याय्यम् इत्याशङ्क्य अभेदका गुणा इत्येव न्याय्यम् । कुत एतत् । यदयं 'अस्थिदधिसक्त्थ्यक्ष्णामनङुदात्तः' इत्युदात्तग्रहणं करोति । यदि भेदका गुणाः स्युः उदात्तमेवोच्चारयेत् **इत्युक्तं भाष्यकृता ।**

अयमभिप्रायः। उदात्तानङुच्चारणेनैव गुणस्योदात्तत्वस्य अनुदात्तादिभ्यो भेदकत्वात् अनुदात्ताद्यनङ्व्यावृत्तिर्भविष्यतीति तथा अनुच्चार्य यत उदात्त इति पृथक्पदमुपात्तम् तेन ज्ञायते यत् गुणा अभेदका इति। ततश्चोदात्ततयोच्चारणे कृतेऽपि उदात्तत्वस्य इतरभेदकत्वाभावात् अनुदात्तस्याप्यनङो ग्रहणं स्यादिति तद्व्यावृत्त्यर्थमुदात्तपदमुपात्तमिति स्वांशे चरितार्थत्वम्। ततश्च आकारस्य नान्तरीयकयत्किञ्चिद्गुणवत्तया उच्चारणे कृतेऽपि गुणस्याभेदकतया गुणान्तरयुक्तस्याप्याकारस्य ग्रहणसिद्धौ तत्फलकं वृद्धिरादैच् इति सूत्रे तपरकरणमिति न युज्यत इति प्रकरणार्थः।

[ज्ञा.] इको गुण ॥ १-१-२ ॥ 'अतो हलादेः' (सू. ७-२-७) इत्यत्राकारग्रहणं णिश्चिप्रतिषेधवचनं च ज्ञापकं न सिच्यन्तरङ्गं भवतीति। अपवादत्वात्सिद्धे इयमेकदेशयुक्तिः।

[वि] इको गुणवृद्धी इति सूत्रे वृद्धिग्रहणं ङिति च इति सूत्रेऽनुवृत्त्यर्थम्। अन्यथा तेन सूत्रेण गुणमात्रं निषिध्येत। ततश्च न्यनुवीत् न्यधुवीत् इत्यादौ 'सिचि वृद्धिः परस्मैपदेषु' (सू. ७-२-१) इति सूत्रेण वृद्धिः स्यात्। वृद्धिग्रहणे कृते च ङिति चेत्यनेन वृद्धेरपि निषेधान्न दोषः इत्युक्त्वा, तदुपरि नैतदस्ति प्रयोजनम् अन्तरङ्गत्वादत्रोवङादेशे कृते उकारस्यान्तेऽविद्यमानत्वाद्वृद्धिर्न भविष्यति। अतस्तत्र वृद्ध्यभावफलकं इको गुण इति सूत्रे वृद्धिग्रहणं मास्तु इति पूर्वपक्षं प्रापय्य, 'न सिच्यन्तरङ्गं भवति। यदयं अतो हलादेर्लघोः इत्यकारग्रहणं करोति' इति भाष्यकृता उक्तम्। अयं भावः। 'अतो हलादेर्लघोः (सू. ७-२-७) इति सूत्रेण हलादेर्लघोरकारस्य इडादौ परस्मैपदपरे सिचि वृद्धिर्विकल्पेन विधीयते। अखादीत् अखदीत् इत्युदाहरणम्। अत्र अकारस्येत्यनुक्तौ अकोषीत् अमोषीत् इत्यादौ अ-कुष्-ईत् इत्यवस्थायां हलादेर्लघोरुकारस्यापि वृद्धिर्भवेत्। सा मा भूदित्येवमर्थं अकारस्येत्युक्तमिति वक्तव्यम्। यदि तु सिचि परतः अन्तरङ्गं

कार्यं भवेत् तदा सिच्परस्मैपदोभयसापेक्षवृद्ध्यपेक्षया अन्तरङ्गत्वात् लघूपधगुणे कृते ओकारस्य लघुत्वाभावादेव वृद्धिः न भविष्यति इति अकारग्रहणं व्यर्थं स्यात्। व्यर्थं च तत् 'न सिच्यन्तरङ्गं भवति' इति ज्ञापयति। ततश्चान्तरङ्गगुणाप्रवृत्त्या परत्वादुकारस्य वृद्धिर्भवेदिति तद्वारणाय अकारग्रहणमिति स्वांशे चरितार्थता।

एवं 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् (सू. ७-२-५) इति सूत्रस्थं णिश्रिग्रहणमप्युक्तवचने ज्ञापकम्। तथा हि हमयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिः न स्यादिडादौ सिचि इति तस्य सूत्रस्यार्थः। औनयीत् अश्वयीत् इत्युदाहरणम्। यदि सिच्यन्तरङ्गं भवेत् तर्हि अन्तरङ्गत्वात् गुणे कृते इष्टरूपसिद्ध्या णिश्रिग्रहणमकर्तव्यं स्यात्। कृतं च तत् न सिच्यन्तरङ्गं भवतीति ज्ञापयति ततश्चान्तरङ्गगुणाप्रवृत्त्या वृद्धिप्राप्तौ तत्प्रतिषेधार्थं णिश्रिग्रहणम्। इत्थं च न्यनुवीत् इत्यादौ सिचि अन्तरङ्गस्योवङः अप्रवृत्त्या वृद्धिप्राप्तौ सत्यां क्ङिति चेति सूत्रेण इग्लक्षणवृद्धेर्निषेधसिद्धये सिचि वृद्धिरिग्लक्षणा आस्थेयेति तदर्थं 'इको गुणवृद्धी' इति सूत्रे वृद्धिग्रहणमिति स्थितम्।

वस्तुतस्तु अन्तरङ्गगुणस्यापवादभूतया वृद्ध्या बाधनात् वृद्धिप्राप्तौ तन्निषेधार्थं णिश्रिग्रहणमिति तस्य उक्तवचनज्ञापकत्वं न सम्भवतीत्याह-**अपवादत्वात्सिद्ध** इति।

[ज्ञा०] 'क्ङिति च' (सू. १-१-५) 'त्रसिगृधिधृषिक्षिपेः क्नुः' (सू. ३-२-१४०) 'इको झल्' (सू. १-२-९) इति क्नुसनोः कित्त्वात् ज्ञापकात् उपधालक्षणस्यापि गुणस्य प्रतिषेधोऽयमिति तन्निमित्तग्रहणं न कार्यम्।

[वि०] 'क्ङिति च' इति सूत्रे 'क्ङिति प्रतिषेधे तन्निमित्तग्रहणं उपधारोरवीत्यर्थम्' इति वार्तिककारेणोक्तम्। क्ङिति च इति सूत्रे 'इको गुणवृद्धी' इति सूत्रमनुवर्तते। तत्र यदि क्ङितीत्येतत् इको विशेषणम् तदा किति

ङिति च परतः यः इक् तस्य गुणवृद्धी न स्तः इति सूत्रार्थः स्यात्। तथा सति चिंत स्तुतम् इत्यादावेव इकः कित्परकत्वमस्तीति गुणनिषेधो लभ्येत। भिन्नः भिन्नवान् इत्यादौ तु भिद् त इत्यत्र उपधायाः इकारस्य कित्परकत्वं नास्ति दकारेण व्यवधानादिति गुणनिषेधो न लभ्येत। अतः तन्निमित्त इति पदमध्याहृत्य सूत्रार्थो वर्णनीयः। तदा ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतः ते न भवत इति सूत्रार्थः। ततश्च उपधागुणस्यापि ङिन्निमित्तकत्वात् तस्य प्रतिषेधलाभादिष्टसिद्धिः। अतः उपधायाः अपीकः गुणवृद्धिप्रतिषेधार्थं तन्निमित्तग्रहणम्। एवं रुधातोर्यङ्लुगन्तस्य लटि प्रथमपुरुषैकवचने 'रोरु ईति' इत्यवस्थायां 'सार्वधातुकार्धधातुकयोः' इति तिब्निमित्तके उकारस्य गुणेऽवादेशे च रोरवीति इति रूपम्। तन्निमित्तग्रहणाभावे यङि अव्यवहितपूर्वः यः इक् उकारः तस्य गुणप्रतिषेधः स्यात्। तन्निमितग्रहणे तु ङित् यः यङ् तन्निमित्तकत्वं गुणस्य नास्तीति तस्य न प्रतिषेध इतीष्टरूपसिद्धिः। तस्मात् भिन्न इत्यादौ गुणप्रतिषेधार्थं रोरवीति इत्यादौ गुणप्रतिषेधाभावार्थं च ङिति चेति सूत्रे तन्निमित्तग्रहणं कर्तव्यमिति वार्तिकाभिप्रायः।

भाष्यकारस्तु उपधाया इकः ज्ञापकेन गुणप्रतिषेधं सिषाधयिषुः तन्निमित्तग्रहणं प्रत्याचख्यौ। तदाह-**त्रसिगृधी**त्यादि। 'त्रसिगृधिधृषिक्षिपेः क्नुः' (सू. ३-२-१४०) इति सूत्रेण त्रस्यादिभ्यः क्नु प्रत्ययो विधीयते। तत्र ककार इत्संज्ञकः। तत्प्रयोजनं तु गृध्नुः इत्यादौ ङिति चेति गुणनिषेधः। यदि च ङित्परकस्यैवैको गुणोऽनेन निषिध्येत तदा धकारेण व्यवधानात् ऋकारस्य क्नुपरकत्वं नास्तीति गुणनिषेधो न प्रवर्त्स्यति। तदर्थं क्रियमाणस्तु ककारानुबन्धो व्यर्थः सन् भवत्युपधालक्षणस्य गुणस्य व्यवहितविषयस्यापि ङितीत्यनेन प्रतिषेधः इति ज्ञापयति। तथा 'हलन्ताच्च' (सू. १-२-१०) इति सूत्रेण इक्समीपाद्धलः परो झलादिः सन् कित् स्यादित्युच्यते। जुघुक्षति इत्यादौ उकारस्य उपधायाः गुणाभावः प्रयोजनम्। उपधायाः कित्परकत्वाभावात् गुणनिषेधो न भनिष्यतीति प्रयोजनाभावात् किद्ग्रहणमनर्थकं सत् उपधालक्षणस्य गुणस्य प्रतिषेध इति

ज्ञापयतीत्यर्थः। तथा च भिन्न इत्यादावनेन ज्ञापकेनैव गुणप्रतिषेधे लब्धे तन्निमित्तग्रहणमनावश्यकमिति भावः।

[ज्ञा.] यासुटो ङिद्वचनात् ज्ञापकात् ङिदादेशानां ङिति यत् कार्यं तन्न। तेन अचिनवमित्यादौ न निषेध इति वार्तिकमतम्। (१-१-५)

[वि.] ननु चिधातोर्लङि मिपि अमादेशे अ-चि-नु-अम् इति स्थिते लङादेशस्य अमः स्थानिवद्भावेन ङित्त्वात् ङिति चेति गुणनिषेधः स्यादित्याशङ्क्याह—**यासुट** इति। 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (सू. ३-४-१०३) इति सूत्रेण यासुटो ङित्त्वविधानं व्यर्थम्। भूयास्-ति इत्यत्र लिङादेशस्य तिपः स्थानिवद्भावेन ङित्त्वात् यासुटश्च यदागमन्यायेन ङित्त्वसिद्धेः। तथा च ङिद्विधानं 'ङिदादेशा ङितो न भवन्ती' ति ज्ञापयति। ततश्च ङितो लिङ आदेशोऽपि तिप् ङित् न भवतीति यासुटो ङित्त्वं दुर्लभमिति तस्य ङिद्विधानम् सार्थकम्। ज्ञापनप्रयोजनं तु अचिनवमित्यादौ आदेशस्य ङित्त्वाभावात् गुणनिषेधो न भवतीति।

भाष्यकारेण 'सार्वधातुकमपित्' (सू. १-१-४) इति सूत्रे अपिदिति योगं विभज्य ङिदिति चानुवर्त्य आवृत्तिं चाश्रित्य ङिच्च पिन्न, पिच्च ङिन्न भवतीति वाक्यार्थद्वयं वर्णितम्। अस्मिन् पक्षे यासुटो ङिद्वचनं न ज्ञापकम्, अपि तु मृज्यादित्यादावप्राप्तङित्त्वविधायकम्। तदेतत् मनसिकृत्याह—**इति वार्तिकमतमिति।**

[ज्ञा०] 'ईदूदेद्द्विवचनम्' (सू. १-१-११) 'प्लुतप्रगृह्या' (सू.६-१-१२५) इति ज्ञापकात् सिद्धः प्लुतः स्वरसन्धिषु। यद्वा प्लुत इति कृतमेव आश्रयात्सिद्धत्वं यथा रोरुत्वे।

[वि०] ईदूदेदिति तपरकरणेन अतत्कालव्यावर्तनात् अतत्कालानां प्रगृह्यसंज्ञा न प्राप्नोतीत्याशङ्क्य प्रगृह्यसंज्ञायां कर्तव्यायां प्लुतस्यासिद्धत्वात्

तत्कालाः द्विमात्रा ईकारादयो भवन्तीति प्रगृह्यसंज्ञा भविष्यतीति समाधाय पश्चादाक्षेपरूपेण भाष्यकारैरुक्तम् - 'सिद्धः प्लुतः स्वरसन्धिषु। यदयं 'प्लुतः प्रकृत्या' इति प्लुतस्य प्रकृतिभावं शास्ति। कथं कृत्वा ज्ञापकम्। सतो हि कार्यिणः कार्येण भवितव्यम्' इति। 'प्लुतप्रगृह्या' इति सूत्रेण प्लुतस्य प्रकृतिभावो विधीयते। यदि स्वरसन्धौ प्लुतः असिद्धः स्यात् तदा प्लुतस्यैवाभावात् प्लुतं कार्यित्वेन आश्रित्य तस्य प्रकृतिभावविधानं न युज्यते। तेनानुमीयते यत्स्वरसन्धौ प्लुतस्यासिद्धत्वं न भवतीति तदाशयः। तदाह—**प्लुतेति**। सामान्येन स्वरसन्धिप्रकरणविषयं सिद्धत्वं न ज्ञाप्यते, किंतु प्रकृते प्रकृतिभाव एवेत्याशयेनाह—**यद्वेति**। प्रकृत एवेति पाठः साधुः। प्लुत इत्याश्रयात् सिद्धत्वं प्रकृत एवेत्यन्वयः।

[ज्ञा.] निपात एकाच् (सू-१-१-१४) इदमेवैकग्रहणं ज्ञापयति वर्णग्रहणे जातिग्रहणमिति। अल्त्वाद्याश्रयानेकग्रहणमिति तदर्थः।

[वि.] 'निपात एकाजनाङ्' इति सूत्रे एकग्रहणं मास्तु। न च तदभावे अचो निपातविशेषणत्वात् तदन्तविधौ अजन्तस्य निपातस्य प्रगृह्यसंज्ञा इति सूत्रार्थे प्रेदं ब्रह्म इत्यादौ प्र+इदम् इत्यवस्थायां प्र इत्यजन्तस्य निपातस्य प्रगृह्यत्वे सन्धिकार्यं न स्यादिति वाच्यम्। निपातस्य अज्विशेषणत्वमाश्रित्य निपातरूपो योऽच् तस्य प्रगृह्यसंज्ञा इति सूत्रार्थाङ्गीकारे प्र इति निपातस्य अज्रूपत्वाभावेन प्रगृह्यत्वाप्रसक्तेः। ततश्च एकग्रहणं व्यर्थमित्याशङ्क्य भाष्यकार आह—

> 'एवं तर्हि सिद्धे सति यदज्ग्रहणे क्रियमाणे एकग्रहणं करोति तज्ज्ञापयत्याचार्यः 'अन्यत्र वर्णग्रहणे जातिग्रहणं भवतीति'

इति। वर्णग्रहणे सति जात्याश्रयानेकवर्णग्रहणमिति अच् इत्यनेन अच्त्वाश्रयानेकवर्णसमुदायग्रहणं स्यात्। ततश्च तितउशब्दैकदेश अ उ शब्दानुकरणे निपातसंज्ञके अउ अकरोदित्यादौ अउ इति समुदाये प्रगृह्यसंज्ञायां प्रकृतिभावाद्य-

णादेशो न स्यात्। अतः तद्वारणाय एकग्रहणम्। कृते च तस्मिन् तत्सामर्थ्यात् एको योऽच् तदूरूपस्य निपातस्यैव प्रगृह्यत्वमिति न दोष इति। अन्यत्र प्रयोजनं तु भाष्ये उक्तम्—

'दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम् इति यदुक्तं तदुपपन्नं भवति' इति। तस्यायमर्थः—दम्भेः सनि 'दम्भ इच्च' (सू. ७-४-५६) इति सूत्रेण धातोरचः इत्वे दिम्भ् स इति स्थिते द्वित्वे 'अत्र लोपोऽभ्यासस्य' (सू. ७ ४-५८) इति अभ्यासलोपे च दिम्भ् स इति स्थिते 'हलन्ताच्च' (सू. १-२-१०) इति सूत्रेण सनः कित्त्वात् तस्मिन् परे धातूपधाया नकारस्य 'अनिदिताम्' (सू. ६-४-२४) इति लोपे भष्भावादौ धिप्सति इति रूपम्। तत्र 'हलन्ताच्च' (सू. १-२-१०) इति सूत्रस्य इक्समीपाद्धलः परः झलादिः सन् कित् स्यादित्यर्थः। दिन्भ् स इति दशायां इक्समीपो यो हल् नकारः ततः परः सन् न भवति, यतश्च भकारात्परः सन् स च भकारो नेक्समीपः नकारेण व्यवधानादिति कित्त्वाभावे नलोपो दुर्लभः स्यात्। वर्णग्रहणे जातिग्रहणमित्यङ्गीकारे तु हल्त्वजात्याश्रयानेकस्येक्समीपत्वं ततः परत्वं सनः इति तस्य कित्त्वे तस्मिन् परे धातुनकारलोपे च धिप्सतीति सिद्धिः प्रयोजनमिति॥

[ज्ञा.] बहुगण (सू. १-१-२३)॥ 'नदीपौर्णमास्याग्र' (सू. ५-४-११०) इत्यत्र न नदीसंज्ञकग्रहणम्, पौर्णमास्याग्रहायणीग्रहणसामर्थ्यात्।

[वि.] 'बहुगणवतुडति सङ्ख्या' (सू. १-१-२३) इति सूत्रे सङ्ख्याग्रहणं कर्तव्यम्। बहुगणवतुडतयः सङ्ख्यासंज्ञाः भवन्ति संख्या च संख्यासंज्ञा भवतीति वक्तव्यम्। अन्यथा कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्यय इति परिभाषया संख्याशब्दघटितेषु विधिसूत्रेषु संख्येत्यनेन कृत्रिमायाः संख्यायाः बहुगणादेरेव ग्रहणं स्यात् न त्वेकादिकायाः संख्याया इति वार्तिककारेणोक्ते तदुपरि—

'यदि तर्हि कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति 'नदीपौर्णमास्याग्रहायणीभ्यः' अत्रापि प्रसज्येत' इति भाष्ये आक्षेपः कृतः। कृत्रिमाकृत्रिमन्यायाङ्गीकारे 'नदीपौर्णमासी' इति सूत्रे नदी इत्यनेन 'यू स्त्र्याख्यौ नदी' (सू. १-४-३) इति सूत्रबोधितनदीसंज्ञकानां ई ऊ वर्णान्तानामेव ग्रहणं स्यात् न तु नदी इति शब्दस्येति तदर्थः। अस्मिन्नाक्षेपे समाधानभाष्यम्—

'पौर्णमास्याग्रहायणीग्रहणसामर्थ्यान्न भविष्यति' इति। यदि शास्त्रबोधितनदीसंज्ञकशब्दस्य नदी इत्यनेन ग्रहणं स्यात् तदा पौर्णमासी आग्रहायणी इत्यनयोरपि नित्यस्त्रीलिङ्गईकारान्तत्वेन नदीसंज्ञकत्वात् नदी इत्यनेनैव ग्रहणे सिद्धे पृथक् तयोः सूत्रे निर्देशोऽनर्थकः स्यात्। कृतश्च स निर्देशः 'नदीपौर्णमासी' इति सूत्रे नदीशब्दः न कृत्रिमनदीसंज्ञकवाची। अपि तु नदीशब्दपरः। इति ज्ञापयति, अतो न दोष इति तदाशयः। तदेतदाह—**नदीत्यादिना।**

तदनन्तरं 'नदीपौर्णमासी' इति सूत्रे नदीशब्दस्य लोकप्रसिद्धनदीपरत्वे नदीविशेषवाचिनां गङ्गा यमुना इत्यादीनामपि तत्सूत्रे नदीपदेन ग्रहणं स्यादित्याशङ्क्य—

'आचार्यप्रवृत्तिर्ज्ञापयति तद्विशेषेभ्यो न भवतीति। यदयं विपाट्शब्दं शरत्प्रभृतिषु पठति'

इति भाष्ये उक्तम्। 'नदीपौर्णमासी' इति सूत्रेण विधीयमानः टच् नदीविशेषवाचिगङ्गादिशब्देभ्यो न भवति। यदि भवेत् तदा शरत्प्रभृतिषु विपाट्शब्दपाठो व्यर्थो भवेत। प्रतिविपाशमित्यादौ 'अव्ययीभावे शरत्प्रभृतिभ्यः' (सू. ५-४-१०७) इति सूत्रेण टच्सिद्धिर्हि तत्प्रयोजनम्। तत्र 'नदीपौर्णमासी' इति सूत्रे नदीशब्देन नदीविशेषवाचिविपाट्शब्दस्यापि ग्रहणात् तेनैव टच्सिद्धेः शरत्प्रभृतिगणे विपाट्शब्दपाठो व्यर्थः सन् तत्सूत्रे नदीशब्दः न नदीविशेषपर इति ज्ञापयतीति भावः। तदेतदाह—

[ज्ञा.] **शरदादिषु विपाट्शब्दपाठात् ज्ञापकान्न विशेषग्रहणम्।** इति।

[ज्ञा.] संख्यादेशेषु एकादिसंख्याग्रहणम् । कन्विधौ 'अतिशदन्तायाः' (सू. ५-१-२२) इति प्रतिषेधात् ज्ञापकात् ।

[वि.] 'बहुगुणवतुडति' (सू. १-२-३१) इति सूत्रे एकादिकायाः संख्यायाः अपि संख्यासंज्ञासिद्ध्यर्थं संख्याग्रहणं कर्तव्यमिति वार्तिकं प्रत्याख्यातुं ज्ञापकेन संख्याप्रदेशेषु एकादिसङ्ख्यायाः ग्रहणं समर्थितम् । तदाह-**संख्यादेशेषु** इति । संख्यादेशेषु संख्या इति शब्दघटितेषु विधिसूत्रेषु एकादिकायाः सङ्ख्यायाः अपि ग्रहणं भवति । तत्र प्रमाणमाह-**कन्विधा**विति । अयमर्थः- 'संख्यायाः अतिशदन्तायाः कन्' (सू. ५-१-२२) इति सूत्रं संख्यायाः आर्हीयेऽर्थे कनं विदधत् त्यन्तायाः शदन्तायाश्च कनं प्रतिषेधति । पञ्चक इत्युदाहरणम् । पञ्चभिः क्रीत इति तदर्थः । त्यन्तायास्तु न कन् यथा साप्ततिकः, शदन्तायाः चात्वारिंशत्क इति । उभयत्र 'तेन क्रीतम्' (सू. ५-१-३७) इति ठञ् । यदि विधिसूत्रेषु संख्या इत्यनेन अकृत्रिमाया एकादिसंख्यायाः ग्रहणं न स्यात् तदा विंशति-चत्वारिंशदादेः संख्याग्रहणेनाग्रहणात्ततः कनोऽप्रसक्त्या अतिशदन्ताया इति निषेधोऽनवसरः स्यात् । अतः स निषेधः एकादिकाया अपि संख्याप्रदेशेषु ग्रहणं ज्ञापयतीति ।

[ज्ञा.] 'ष्णान्ता षट्' (सू. १-१-२४) ॥ अष्टनो दीर्घग्रहणं षट्त्वज्ञापकम् । आकारान्तस्य मडर्थम् (नुडर्थम्) ।

[वि.] 'ष्णान्ता षट्' इति सूत्रे उपदेशग्रहणं कर्तव्यम् । उपदेशे षकारान्ता नकारान्ता च संख्या षट्संज्ञा भवतीति वक्तव्यम् । अन्यथा शतानि सहस्राणीत्यादौ नुमि कृते नकारान्तत्वात् षट्संज्ञायां 'षड्भ्यो लुक्' (सू. ७-१-२२) इति जस्शसोर्लुगापत्तेः । अष्टानामित्यत्र अष्टन् आम् इति स्थिते परत्वान्नित्यत्वाच्च 'अष्टन आ विभक्तौ' (सू. ७-२-८४) इति नकारस्य आत्वे कृते नकारान्तत्वाभावेन षट्संज्ञाया अप्राप्तौ 'षट्चतुर्भ्यश्च' (सू. ७-१-५५) इति नुडोऽनुपपत्तेश्च इत्याक्षिप्य, शतानि सहस्राणीत्यादौ

सन्निपातपरिभाषया षट्संज्ञां वारयित्वा अष्टानामित्यत्र आत्वे कृतेऽपि षट्संज्ञा ज्ञापकमहिम्ना साधिता भाष्यवार्तिकयोः। तदाह - **अष्टनो दीर्घग्रहणमिति**। 'अष्टनो दीर्घात्' (सू. ६-१-१७२) इति सूत्रेण दीर्घान्तादष्टन्शब्दात् परस्याः शसादिविभक्तेरुदात्तत्वं विधीयते। तत्र च दीर्घग्रहणम् अष्टसु इत्यत्र सुप उदात्तत्वनिवृत्त्यर्थं क्रियते। यदि च कृतात्वस्य षट्संज्ञा न स्यात् तदा अष्टसु इत्यत्र 'अष्टन' (सू. ६-१-१७२) इति सूत्रापेक्षया परत्वात् 'झल्युपोत्तमम्' (सू. ६-१-१८०) इति सूत्रेण षट्त्रिचतुर्भ्यो या झलादिविभक्तिस्तदन्ते पदे उपोत्तममुदात्तं स्यादित्यर्थकेन उपोत्तमस्वरेण टकारोत्तराकार उदात्त इति इष्टस्वरसिद्ध्या किं दीर्घग्रहणेन। न चापवादत्वात् अष्टसु इत्यत्र 'झल्युपोत्तमम्' इति स्वरं बाधित्वा 'अष्टनः' इति सूत्रविहितो विभक्तिस्वर एव स्यादिति वाच्यम्। आत्वपक्षे अष्टासु इत्यत्र भवद्रीत्या कृतात्वस्य षट्संज्ञाऽभावेन उपोत्तमस्वराप्रवृत्त्या तत्र 'अष्टन' इति सूत्रस्य चारितार्थ्येन तस्यापवादत्वासम्भवात्। ततश्च परत्वात् अष्टसु इत्यत्र उपोत्तमस्वर एव भविष्यतीति विभक्तिस्वराप्रसक्त्या तद्वारणार्थं क्रियमाणं दीर्घग्रहणं व्यर्थमेव। कृतं च तत् कृतात्वस्याप्यष्टन्शब्दस्य षट्संज्ञां ज्ञापयति। ततश्च कृतात्वस्थलेऽपि 'झल्युपोत्तमम्' इति षट्स्वरे प्राप्त एव 'अष्टनो दीर्घात्' इति सूत्रारम्भात् येन नाप्राप्तिन्यायेन अष्टन इति सूत्रमपवाद इति आत्वपक्षे यथा अष्टासु इत्यत्र 'अष्टनो दीर्घात्' इति सूत्रमेवापवादत्वात्प्रवर्तते तथा अष्टसु इत्यत्रादीर्घपक्षेऽपि अपवादत्वात् विभक्तेः स्वरः स्यादिति तद्वारणार्थं दीर्घग्रहणं कर्तव्यमिति स्वांशे चरितार्थता। अन्यत्र प्रयोजनं तु अष्टानामित्यत्र कृतात्वस्यापि षट्संज्ञास्तीति 'षट्चतुर्भ्यश्च' (सू. ७-१-५५) इति नुट्सिद्धिरिति तात्पर्यार्थः।

[ज्ञा.] सर्वादीनि (सू. १-१-२७) ॥ सर्वनामसंज्ञायाम् अत एव निपातनान्न णत्वम्। पुराणपुरातनौ सततसंततौ च पृषोदरादित्वात्सिद्धौ।

[वि.] 'सर्वादीनि सर्वनामानि' इति सूत्रे सर्वनामशब्दे 'पूर्वपदात्संज्ञायामगः' (सू. ८-४-३) इति णत्वं प्राप्नोतीत्याशङ्क्य, निपातनाण्णत्वाभाव इति समाधाय, तदुपरि निपातनादणत्वं भवतु यथाप्राप्तं च णत्वमप्यस्तु, निपातनस्य हि तद्रूपसाधुत्वप्रतिपादने तात्पर्यम्, न तु रूपान्तरनिवृत्ताविति आक्षिप्य, नाप्राप्ते णत्वे निपातनमारभ्यते तद्बाधकं भविष्यति इति समाहितं भाष्ये। तदाह-**सर्वनामसंज्ञायामिति**।

ननु सम्-तत इति स्थिते मकारस्य लोपेन सततशब्दः 'अपरस्परः क्रियासातत्ये' (सू. ६-१-१४४) इति निपातनात् साधुरितीष्यते। नाप्राप्ते अलोपे आरभ्यमाणमिदं लोपनिपातनं अलोपस्य बाधकं भवेत्। ततश्च संततमिति रूपं न सिध्येत्। तथा 'पुराणप्रोक्तेषु' (सू. ४-३-१०४) इत्यत्र निपातितेन पुराणशब्देन पुरातनशब्दस्य बाधः प्राप्नोति। ततश्च पुरातनशब्दस्य साधुत्वं न सिध्येदिति आशङ्क्याह - **पुराणपुरातनाविति**। एवं च संततसततयोः पुराणपुरातनयोश्च पृषोदरादिगणे पाठादेव साधुत्वम्, न तु निपातनात्। अतो नोक्तदोषावसर इति भावः। **परिभाषेन्दुशेखरे** 'बाधकान्येव निपातनानि' इति परिभाषा पठ्यते।

[ज्ञा.] पूर्वपरा (सू. १-१-३४) ॥ पूर्वं गणपाठः पश्चात्सूत्रपाठः। 'पूर्वादिभ्यो नवभ्यो वा' (सू. ७-१-१६) इति नवग्रहणात् ज्ञापकात्। सूत्रपाठे नवैव हि पूर्वादीनि।

[वि.] 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्' इति सूत्रे किमर्थं प्रतिपदं पूर्वादीनि जसि विभाषार्थं पठितानि, यावता गण एवार्थविशेषेण विशिष्टानि नित्यं सर्वनाम - संज्ञार्थं पठ्यन्ते। तत्र पूर्वादीनि नवेत्येवं सूत्रं पठितव्यम्। प्राप्तविभाषा चेयं भविष्यति इत्याशङ्क्य, भवेदेवं यदि गणपाठः पूर्वः स्यात् पश्चाच्च पाणिनिसूत्रपाठः स्यात्। न त्वेतदस्ति, प्रमाणाभावादिति समाधाय, पाणिनिसूत्रापेक्षया गणपाठस्य प्राक्कालिकत्वं ज्ञापकेन समर्थितं भाष्ये—

'एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति स पूर्वः पाठः अयं पुनः पाठ इति। यदयं पूर्वादिभ्यो नवभ्यो वेति नवग्रहणं करोति। नवैव हि पूर्वादीनि'

इति। तदाह–**पूर्वं गणपाठ** इति। पूर्वादिभ्यो नवभ्यो वेति सूत्रे नवग्रहणं नवाधिकत्यदादिनिरासार्थं क्रियते। यदि च नियतसंनिवेशो गणपाठः पूर्वः तदा पूर्वादिभ्य इत्यनेन त्यदादीनामपि ग्रहणं स्यादिति तद्व्यवच्छेदाय नवग्रहणं कर्तव्यं भवति। यदा तु पाणिनिसूत्रं गणपाठात्पूर्वं तदा पाणिनिसूत्रे पूर्वादीनां नवानामेव पूर्वपरेत्यादिभिः त्रिभिः सूत्रैर्विशिष्य निर्देशात् नवाधिकानां त्यदादीनां पूर्वादिभ्य इत्यनेन ग्रहणप्रसक्त्यभावात् नवग्रहणं व्यर्थं स्यादिति गणपाठस्य प्राचीनत्वमनुमीयत इति भावः। **सूत्रपाठ** इति। पाणिनिसूत्रपाठ इत्यर्थः।

[ज्ञा.] 'पूर्वत्रासिद्धम्' (सू. ८-२-१) इत्यादेर्ज्ञापकात् पूर्वादीनां द्व्यादिपर्युदासेन पर्युदासो न।

[वि.] तत्रैव सूत्रे पूर्वादीनि नवेत्येवं लाघवेन पठितव्ये किमिति पूर्वपरावरेत्यादिना विशिष्य त्रिसूत्रीपाठः क्रियत इत्याशङ्कायाः समाधानमुक्तम्—

'इदं तर्हि प्रयोजनम्—द्व्यादिपर्युदासेन पर्युदासो मा भूदिति'

इति भाष्ये। तस्याशयमेवं कैयट आह—त्यदादीनि पठित्वा गणे कैश्चित् पूर्वादीनि पठितानि। तत्र 'किंसर्वनामबहुभ्योऽद्व्यादिभ्यः' (सू. ५-३-२) इति पूर्वादिभ्यस्तसिलादीनां प्रतिषेधः प्राप्नोति। तत्र पुनः सर्वनामसंज्ञया तसिलादिर्विधीयते। तेन द्व्यादिपर्युदासो बाध्यत इति। तदनन्तरं समाधानमिदं दूषयन्नाह भाष्यकारः—

'एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति नैषां द्व्यादिपर्युदासेन पर्युदासो भवतीति। यदयं पूर्वत्रासिद्धमिति निपातनं करोति'

इति । यदि च द्व्यादिपर्युदासेन पर्युदासात् पूर्वादिभ्यस्तसिलादीनां प्रतिषेधः स्यात् तदा 'पूर्वत्र' इति त्रलन्ततया पूर्वशब्दनिर्देशोऽप्रमाणं स्यात् । निर्देशमहिम्ना पूर्वादीनां द्व्यादिपर्युदासेन पर्युदासो नेति ज्ञाप्यत इत्यर्थः । तदेतत्सर्वं मनसि निधायाह—**पूर्वत्रासिद्धमित्यादेर्ज्ञापकादिति** । **आदि**पदेन च—'जश्भावादिति चेदुत्तरत्र ढस्याभावादपवादप्रसङ्गः' इति वार्तिकस्थं **उत्तरत्र** इति निपातनं परामृश्यते ।

[ज्ञा.] "कृन्मेजन्तः" (सू. १-१-३९) कृदन्तं यन्मान्तमिति पक्षे प्रशान्शब्दस्य स्वरादिषु पाठात् ज्ञापकान्न प्रत्ययलक्षणेनाव्ययसंज्ञा ।

[वि.] 'कृन्मेजन्त' इति सूत्रस्य द्वेधा व्याख्यानं कृतम्-कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यादित्येकं व्याख्यानम् । कृदन्तं यन्मान्तं तदव्ययसंज्ञकं स्यादिति द्वितीयं व्याख्यानम् । तत्र द्वितीयव्याख्याने प्रपूर्वकतमुधातोः क्विपि, तस्मिन् लुप्तेऽपि प्रत्ययलक्षणेन प्रताम् इत्यस्य कृदन्तत्वं श्रुत्या मकारान्तत्वं च वर्तत इत्यव्ययसंज्ञा स्यादित्याशङ्क्य भाष्यकृता उक्तम्—

> 'आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेनाव्ययसंज्ञा भवतीति । यदयं प्रशान्शब्दं स्वरादिषु पठति'

इति । यदि प्रत्ययलक्षणेन कृदन्तत्वमाश्रित्याव्ययसंज्ञा भवेत् तर्हि प्रशान् शब्देऽपि नत्वस्यासिद्धत्वात् मान्तत्वं, प्रत्ययलक्षणेन कृदन्तत्वं चास्तीति 'कृन्मेजन्त' इति सूत्रेणैवाव्ययत्वे सिद्धे अव्ययसंज्ञार्थं स्वरादिगणे प्रशान्शब्दपाठो न कर्तव्यः स्यात् । कृतश्च स न प्रत्ययलक्षणेनाव्ययसंज्ञा भवतीति ज्ञापयतीत्यर्थः । तदेतदाह—**कृदन्त**मित्यादिना ।

[ज्ञा.] तिसृचतस्रोर्ङीबभावे 'न तिसृ' (सू. ६-४-४) इति नामि दीर्घप्रतिषेधो ज्ञापकः ।

[वि.] 'कृन्मेजन्तः' (सू. १-१-३९) इति सूत्रे भाष्ये संनिपातपरिभाषां पठित्वा तस्या बहूनि प्रयोजनानि परिगणितानि। तन्मध्ये 'तिसृचतसृ डीब्विधे.' इत्यपि एकं प्रयोजनम्। त्रिचतुर्शब्दयोः जश्शसोः परतः स्त्रियां तिसृचतस्रादेशयोः कृतयोः ऋकारान्तत्वात् 'ऋन्नेभ्यो ङीप्' (सू. ४-१-५) इति ङीप् प्राप्नोति। स च संनिपातपरिभाषया न भवति। विभक्तिसंनिपातं निमित्तीकृत्य जातौ 'तिसृचतसृ' आदेशौ तद्विघातकस्य ङीपो निमित्ते न भवतः। ङीपि सति तेन व्यवधानात् विभक्तिसंनिपातस्य हानेः इति तदाशयः।

एतच्च प्रयोजनं ज्ञापकमहिम्ना ङीबभावसाधनपूर्वकं खण्डयामास भाष्यकारः—

> 'एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति न तिसृचतसृभावे कृते ङीप् भवतीति। यदयं 'न तिसृचतसृ' इति नामि दीर्घत्वस्य प्रतिषेधं शास्ति।'

इति। 'तिसृ चतसृ' अनयोर्ङीपि तेन व्यवधानात् नाम्परकत्वाभावात् 'नामि' (सू. ६-४-३) इति दीर्घाप्रसक्तेः किं दीर्घनिषेधेन। कृतश्च दीर्घनिषेधः तयोर्ङीप् न भवतीति ज्ञापयति। ततश्च जश्शसोरपि ज्ञापकेनैव ङीपूनिषेधे सिद्धे तिस्रः चतस्रः इत्यत्र ङीबभावः न संनिपातपरिभाषाप्रयोजनमिति भावः। तदेतदाह—**तिसृचतस्रोर्ङीबभाव** इत्यादिना।

ननु संनिपातपरिभाषास्वीकारे या सा इत्यादौ टाप् न स्यात्। यत्तच्छब्दाभ्यां सौ परतः 'त्यदादीनामः' इति दकारस्यात्वे पररूपे च अदन्तत्वात् 'अजाद्यतष्टाप्' इति टाप् वक्तव्यः। स च न संभवति। विभक्तिसंनिपातनिमित्तकस्य अत्वस्य तद्विघातकटापं प्रति निमित्तत्वासंभवादित्याशङ्क्याह—

[ज्ञा.] 'न यासयोः' (सू. ७-३-४५) इत्यादिनिर्देशैर्ज्ञापकैः संनिपातपरिभाषा अनित्या।

इति । पूर्वोक्तरीत्या स्त्रियां यत्तच्छब्दाभ्यां संनिपातपरिभाषया यदि टाप् न स्यात् तदा या सा इति सूत्रकारकृतः टाबन्तनिर्देशोऽसंगतः स्यात् । अतो निर्देशप्रामाण्येन संनिपातपरिभाषाया अनित्यत्वमाश्रीयत इत्यर्थः । तेन रामाय इत्यादौ 'सुपि च' (सू. ७-३-१०२) इति दीर्घः सिध्यति । अन्यथा अदन्तसंनिपातनिमित्तकस्य यादेशस्य तद्विघातकदीर्घं प्रत्यनिमित्तत्वेन दीर्घासंभवात् इति ध्येयम् ।

[ज्ञा.] सुडन (सू.१-१-४३) ॥ अनपुंसकस्येत्यसमर्थसमासं वदता अ इति प्रतिषेधार्थकमव्ययमप्रामाणिकमिति सूचितम् ।

[वि.] सुडनपुंसकस्येति सूत्रे भाष्ये—

'असमर्थसमासश्चायं द्रष्टव्यः अनपुंसकस्येति ।
न हि नञो नपुंसकेन सामर्थ्यम् । केन तर्हि ।
भवतिना । न भवति नपुंसकस्येति'

इत्युक्तम् । अनेनासमर्थसमासं स्वीकृत्य प्रसज्यप्रतिषेधपरतया सूत्रं व्याख्यातम् । तत्र यदि अ इत्यव्ययं किंचित् प्रतिषेधार्थकं भवेत् तदा अ नपुंसकस्येति पृथक्पदत्वं स्वीकृत्य नपुंसकस्य न भवतीति प्रसज्यप्रतिषेधस्य असमर्थसमासत्वं विनापि लाभात् असमर्थसमासत्वकल्पना क्लिष्टा नाश्रयणीया स्यात् । आश्रिता च सा प्रतिषेधार्थकम् अ इत्यव्ययं नास्तीति सूचयति । ततश्च अनपुंसकस्येति समस्तं पदं, तस्यासमर्थसमासत्वं विना प्रतिषेधार्थकत्वं न लभ्येतेति मन्यमानैर्भाष्यकारैस्तथोक्तमिति भावः । एतेन 'असद्ब्रह्मेति वेद चेत्' इति श्रुतेः अ इति पृथक्पदं कृत्वा ब्रह्म सदिति न वेद चेदिति व्याख्यानं कुर्वन्तः परास्ता वेदितव्याः ।

[ज्ञ.] उरण् रपरः (सू.१-१-७१) ॥ भ्रातुष्पुत्रग्रहणं ज्ञापकम् एकादेशनिमित्तात्परस्य 'इदुदुपधस्य' (सू.८-३-४१) इति षत्वं नेति ।

[वि] ननु 'उरण् रपरः' इति सूत्रेण ऋकारस्थानिकस्याणो रपरत्वं विदधता ऋकारस्यान्यस्य चोभयोः स्थाने भवतोऽप्यणः रपरत्वमनुमन्यते। तस्यैकादेशस्यापि ऋकारस्थानिकत्वानपायात्। ततश्च मातृ - ङस् इत्यत्र 'ऋत उत्' (सू.६-१-१११) इति सूत्रेण ऋकाराकारयोरुकारे रपरे सति मातुर् स् इति स्थिते 'रात् सस्य' (सू.८-२-२४) इति सकारलोपे रेफस्य विसर्गे च मातुः इति सिध्यति। तदनन्तरं च करोति इति पदसंयोगे विसर्गस्य प्रत्ययभिन्नत्वात् 'इदुदुपधस्य चाप्रत्ययस्य' (सू.८-३-४१) इति षत्वं प्राप्नोति। न च अप्रत्ययस्येत्यस्य प्रत्ययावयवभिन्नस्येत्यर्थः। अकारस्य प्रत्ययावयवत्वात् तदादेशस्य विसर्गस्यापि प्रत्ययावयवत्वमस्तीति कथं षत्वप्राप्तिरिति वाच्यम्। अकारादेशस्य उर् इत्यस्य प्रत्ययावयवत्वस्य कथंचिदुपपादनेऽपि तदवयवरेफस्थानिकविसर्गे तत्त्वस्य दुर्लभत्वात्। ततश्च षत्वं दुर्वारमित्याशङ्क्याह—**भ्रातुष्पुत्रग्रहण**मिति। पूर्वोक्तरीत्या भ्रातुष्पुत्रशब्देऽपि 'इदुदुपधस्ये'ति सूत्रेणैव षत्वसिद्धौ षत्वार्थः कस्कादिगणे तत्पाठो व्यर्थः सन् एकादेशनिमित्तात्परस्य न षत्वमिति ज्ञापयति। एकादेशशास्त्रं निमित्तं यस्य तस्मात्परस्य विसर्गस्य न षत्वम् इत्यर्थः। 'ऋत उत्' इति शास्त्रं निमित्तं यस्य उकारस्य तस्मात्परस्य विसर्गस्य न षत्वं भवतीति मातुः करोतीत्यत्र न षत्वापत्तिः। भ्रातुष्पुत्रशब्दे तु कस्कादिगणे पाठात् षत्वसिद्धिरिति भावः।

सिद्धान्तकौमुद्यां तु एकादेशशास्त्रनिमित्तकस्य न षत्वमिति पठितम्। तत्र च एकादेशशास्त्रसंपन्नो य उर् तदवयवरेफस्थानिकत्वेन विसर्गस्य एकादेशशास्त्रनिमित्तकत्वमिति बोध्यम्। भाष्यानारूढमेतत्कथं कौमुद्यां पठितमिति शङ्कायां **मनोरमाया**मेवमुक्तम्—

'आकरे तु एकादेशशास्त्रनिमित्तात् इति प्रचुरः पाठः। तत्र एकादेशशास्त्रं निमित्तं यस्योकारस्य तस्मादित्यर्थः' इति।

शब्दरत्ने तु—

'ओषधीस्कृधीत्यादौ षत्वनिवृत्तिस्तत्फलमुक्तम्। तस्य च छान्दसत्वात् षष्ठ्यन्तमेव पठितम्'

इत्युक्तम्। भैरवमिश्रादिभिः पञ्चम्यन्तपाठ एव समर्थित इत्यलमत्र विस्तरेण।

[ज्ञा.] ङिच्च (सू. १-१-७३)॥ लोट एरुप्रकरणे तुह्योस्तादाशिषीत्येव सिद्धे ङित्करणात् ज्ञापकात् तातङ् सर्वादेश इति।

[वि.] ननु 'ङिच्च' इति सूत्रेण इत्संज्ञकङकारवानादेशः अन्त्यस्य स्थाने भवतीत्युच्यते। तथा च तातङादेशस्यापि ङित्त्वात् 'तु हि' इत्यनयोर्भवन् तातङ् अन्त्यस्य उकारस्य इकारस्य च स्यादित्याशङ्क्याह—**लोट एरुप्रकरण** इति। अन्तरेणापि ङित्त्वम् 'एरुः' (सू. ३-४-८६) इत्यन्त्यादेशप्रकरणे तातिं विधीयमानेऽन्त्यादेशत्वं सिद्धमिति तातङ् इति ङकारानुबन्धः व्यर्थः सन् अयं नान्त्यादेश इति ज्ञापनद्वारा ङित्त्वस्य गुणवृद्धिप्रतिषेधफलकत्वं सूचयति। ततश्च अनन्यार्थङित्त्वेष्वनङादिषु चरितार्थं 'ङिच्च' इति सूत्रं गुणवृद्धिप्रतिषेधार्थकतया संभवत्प्रयोजनङकारे तातङि न प्रवर्तते। तथा च तातङ् अनेकाल्त्वात्सर्वादेश इति भावः।

[ज्ञा.] अनेकाल् (सू.१-१-५५)॥ अत्र शित्सर्वस्येत्युक्तिर्नानुबन्धकृतमनेकाल्त्वमिति ज्ञापयति।

[वि.] ननु औश् इश् शी इत्यादीनामनेकाल्त्वादेव सर्वादेशत्वे सिद्धे 'अनेकाल् शित्सर्वस्य' इति सूत्रे शिद्ग्रहणं व्यर्थमित्यत आह-**अत्रेति**। ततश्चानुबन्धरूपमलं संयोज्य अनेकाल्त्वं नाश्रीयते अनुबन्धं परित्यज्य अनेकाल् यदि भवेत् तदैव सर्वादेशः। औश् इत्यादीनां तु अनुबन्धं विना अनेकाल्त्वाभावात् सर्वादेशत्वं न लभ्येतेति तेषां सर्वादेशत्वार्थं शिद्ग्रहणमिति भावः। तेन 'अर्वणस्तृ' इत्यादेर्न सर्वादेशत्वमिति ज्ञापनफलमवसेयम्।

अस्मिन् ग्रन्थे काश्चित् एवंजातीयकाः परिभाषा अपि संयोजिताः। तदुद्देश्यं न जानीमः।

[ज्ञा.] स्थानिवदादेशो (सू. १-१-५६) ॥ नापवादे उत्सर्गकृतं श्यन्नादीनां शित्करणात् ज्ञापकात्। षष्ठीत्यनुवर्त्य षष्ठीनिर्दिष्टस्यादेशः स्थानिवदिति वा सिद्धः।

[वि.] 'स्थानिवदादेश' इति सूत्रे आदेशबुद्धेः प्रसङ्गे स्थानिबुद्धिः कर्तव्येति बुद्धिविपरिणाममात्रं यदि स्थानिवद्भावः तर्हि 'आतोऽनुपसर्गे कः' (सू. ३-२-३) इति सूत्रविहितापवादरूपकप्रत्ययेऽपि स्थानिवद्भावेन अणि सति यत्कार्यं तत्प्राप्नोतीत्याशङ्क्य, अपवादे उत्सर्गप्रयुक्तं कार्यं न भवति। तथा च कप्रत्ययेऽपवादे उत्सर्गभूताण्प्रत्ययप्रयुक्तकार्यं न भवतीति न दोषः। तत्र ज्ञापकं शपः अपवादभूतेषु श्यन्नादिषु शित्करणम्। यद्यपवादे स्थानिवद्भावेन उत्सर्गकृतकार्यं स्यात् तदा यन् इत्यस्यापि स्थानिवद्भावेन शपि विद्यमानशित्त्वप्रयुक्तकार्यं भविष्यतीति श्यन्नादौ शित्करणमनर्थकं स्यात्। कृतं च तत् नापवादे उत्सर्गकृतं कार्यं भवतीति ज्ञापयति। यद्वा 'स्थानिवदादेशः' इति सूत्रे 'षष्ठी स्थानेयोगा' (सू. १-१-४९) इति सूत्रात् षष्ठी इत्यनुवर्त्य तच्च तृतीयया विपरिणमय्य निर्दिष्टस्येत्यध्याहृत्य षष्ठ्या निर्दिष्टस्य स्थाने य आदेशः स स्थानिवत् इति व्याख्येयम्। कप्रत्ययश्च न षष्ठीनिर्दिष्टस्याणः स्थाने विधीयते। अतो न स स्थानिवदिति न दोष इति द्वेधा समाधानमाकरग्रन्थेषु कृतम्। तदाह— **नापवाद** इत्यादिना। **सिद्ध** इति। नापवादे उत्सर्गकृतमिति न्याय इति शेषः।

[ज्ञा.] आथादेशे कर्तव्ये 'आहस्थः' (सू. ८-३-३५) इति वचनात् ज्ञापकात् नाहेरीट्।

[वि.] स्थानिवत्सूत्र एव यद्यादेशः स्थानिवत् तदा लटि मध्यमपुरुषैकवचने ब्रूआदेशस्य आह् इत्यस्य ब्रूत्वात् ततः परस्य थलः 'ब्रुव ईट्' (सू. ७-३-९३) इति सूत्रेण ईट् प्राप्नोति, तस्य च प्रतिषेधो वक्तव्य इति वार्तिककृतोक्तम्। तदूदूषयन् भाष्यकारः आहेः ईट्प्रतिषेधो न वक्तव्यः ज्ञापकेनैव आहेः परस्य न ईट् इति सिद्धेः इत्युक्तवान्। किं ज्ञापकम् इति

चेत् 'आहस्थः' इति थत्वविधानं ज्ञापकम्। तथा हि - 'आहस्थः' इति सूत्रं हि झलादौ परे आहः थकारादेशं विधत्ते। आत्थ इत्युदाहरणम्। यदि चात्र स्थानिवद्भावेन ब्रुवमाहः आश्रित्य ततः परस्य थलः ईट् स्यात् तदा थलः ईकारादेः झलादित्वं नास्तीति तस्मिन् परे थत्वं कथं भवेत्। अतः झलि परे विधीयमानं थत्वं नाहेरीट् भवतीति ज्ञापयति। ननु 'आहस्थः' इति सूत्रेण भूतपूर्वो यो झलादिस्तस्मिन् परे थकारो विधीयते। थल ईडागमे सति अधुना झलादित्वाभावेऽपि पूर्वं झलादित्वमस्तीति तदादाय थत्वं भविष्यतीति वैयर्थ्याभावात्कथमस्य ज्ञापकत्वमिति चेत्—यदि भूतपूर्वगतिराश्रीयेत तदा णलादीनां पञ्चानामपि ये स्थानिनः पञ्च तिबादयः ते सर्वेऽपि झलादय इति णलादीनामपि स्थान्यवस्थामादाय भूतपूर्वझलादित्वमस्तीति पञ्चस्वपि परतः आहस्थकारो भवतीति लभ्येत। एवं चेत् आहादेश इत्यनुक्त्वा 'ब्रुवः पञ्चानामादित आथो ब्रुवः' (सू. ३-४-८४) इति आथादेशमेव विदध्यात् आहस्थ इति पृथक् सूत्रं च न कुर्यात्। यतः पृथक्सूत्रं कृतं तेन ज्ञायते भूतपूर्वगतिरत्र नाश्रीयत इति। ततश्च पञ्चानां मध्ये थल् एक एव झलादिः। तस्य चेदीट् भवेत् झलादित्वं तस्य भग्नमिति झलादौ परतो विधीयमानं थत्वमनवकाशं स्यात्। अतो ज्ञापयति नाहेरीड् भवतीति। तदेतत्सर्वं मनसिकृत्याह—**आथादेशे कर्तव्य** इति।

[ज्ञा.] 'गोतः' (सू. ७-१-९०) 'ओतः' (सू. ६-१-९३) इति च तपरकरणसामर्थ्यात् चित्रगुश्चित्रगुमित्यादौ न णित्त्वात्वे।

[वि.] स्थानिवत्सूत्रोपरि दोषपरिगणनसन्दर्भे गोशब्दे णित्त्वमात्वं च प्राप्नोतीत्याशङ्क्य तपरकरणसामर्थ्यान्न णित्त्वात्वे इत्याकरे उक्तम्। तदाह—**गोत** इति। अयमाशयः—यद्यादेशः स्थानिवत्स्यात् तदा चित्रगुरित्यत्र चित्रा गावो यस्येति बहुव्रीहौ 'गोस्त्रियोरुपसर्जनस्य' (सू. १-२-४८) इति ओकारस्य ह्रस्वे उकारे सति तस्य स्थानिवद्भावेन ओकारत्वात् गोशब्दात्परत्वं **सु** इति

सर्वनामस्थानस्य वर्तत इति तस्य 'गोतो णित्' (सू. ७-१-९०) इति णित्त्वे तस्मिन् परतः 'अचो ञ्णिति' (सू. ७-२-११५) इति उकारस्य वृद्धिः प्राप्नोति। एवं चित्रगुमित्यत्र उकारस्य स्थानिवद्भावेन ओकारत्वात् ततः अमः अचि परे पूर्वपरयोः आकारादेशः 'औतोऽम्शसोः' (सू. ६-१-९३) इति सूत्रेण प्राप्नोति इत्याशङ्का। समाधानं तु - सूत्रद्वयेऽपि ओत इति तपरकरणात् अल्विधित्वात् अनल्विधाविति निषेधाच्च स्थानिवद्भावो नेति। तपरकरणस्य फलं हि गु इत्यत्रोकारव्यावृत्तिः। यदि तत्रापि स्थानिवद्भावेन सूत्रं प्रवर्तेत तर्हि तपरकरणमनर्थकं स्यादिति।

[ज्ञा.] 'द्विर्वचनेऽचि' (सू. १-१-५९) ॥ अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य। जेघ्रीयत इति हि तत्प्रत्युदाहरणम्।

[वि.] ननु 'द्विर्वचनेऽचि' (सू.१-१-५९) इति सूत्रस्य द्वित्वनिमित्तेऽचि परेऽजादेशः स्थानिवदित्यर्थः। तत्र च कार्यातिदेश इति पक्षे चक्रतुः चक्रुः इत्यादौ अभ्यासरूपं न सिध्यति। कृ अतुः इत्यत्र ऋकारस्य यणि रेफे क् र् अतुः इति स्थिते एकाचो विधीयमानं द्वित्वमनच्कस्य अप्राप्तं स्थानिवद्भावेन प्राप्यमाणमपि कार्यातिदेशात् यण्युक्तस्यैव प्राप्नोति। ततश्च क् र् क् र् अतुः इति स्थिते हलादिशेषादौ च्क्रतुः इत्येव रूपं सिध्येत्। अकारयुक्ताभ्यास-विशिष्टं चक्रतुरिति रूपं न सिध्येत् इत्याशङ्क्याह—**अज्ग्रहणं तु** इति। अयं भावः- 'द्विर्वचनेऽचि' इति सूत्रेण अजादेशः स्थानिवदित्यतिदेशः स्थानिनि सति यत्कार्यं भवति तदादेशेऽपि भवतीत्येवंरूपः कार्यातिदेश इति न मन्तव्यम्। अपि तु स्थानिनि सति यद्रूपं तदादेशेऽपि भवतीत्येवंरूपः रूपातिदेश इति। तथा च कृ अतुः इत्यत्र यणादेशे कृते तस्य स्थानिरूपातिदेशात् कृ इति ऋकारविशिष्टस्य द्वित्वे चक्रतुरिति रूपं सिध्यतीति न दोषः। रूपातिदेशे ज्ञापकं तु अचि इति अज्ग्रहणम्। तस्य हि प्रयोजनं जेघ्रीयत इत्यादौ स्थानिवत्त्वाभावः। घ्राधातोर्यङि 'ई घ्राध्मोः' (सू.७-४-३१) इति सूत्रेण धातो-

राकारस्य ईकारे घ्री इत्यस्य द्वित्वे हलादिशेषे चुत्वे जश्त्वे 'गुणो यङ्लुकोः' (सू.७-४-८२) इति अभ्यासस्य गुणे च जेघ्रीयत इति रूपम्। तत्र यङः द्वित्वनिमित्तत्वात् तस्मिन् परे आकारादेशस्य ईकारस्य स्थानिवद्भावेन रूपातिदेशो घ्रा इत्यस्य द्वित्वे जघ्रायत इत्येव रूपं स्यात् इति अज्ग्रहणं कृतम्। कृते च तस्मिन् द्वित्वनिमित्तेऽचि परत एव अजादेशस्य स्थानिवद्भावः। यङस्तु द्वित्वनिमित्तस्याप्यच्त्वं नास्तीति तस्मिन् परत ईकारस्य स्थानिवत्त्वेन आकाररूपातिदेशो नास्तीति घ्री इत्यस्य द्वित्वे जेघ्रीयत इतीष्टरूपसिद्धिः। तत्र यदि कार्यातिदेशपक्षः तदा घ्री इत्यस्य द्वित्वरूपं कार्यमेवातिदिश्यते इति आकाररूपातिदेशाभावात् स्थानिवत्त्वेऽपि न दोष इति किमज्ग्रहणेन। कृतं चाज्ग्रहणं द्विर्वचनेऽचीति सूत्रे क्रियमाणः स्थानिवत्त्वातिदेशः रूपातिदेश इति ज्ञापयतीति।

[ज्ञा.] 'ओः पुयण्जि' वचनं ज्ञापकं णौ स्थानिवद्भावस्य।

[वि.] ननु अवनुनावयिषति अवचुक्षावयिषतीत्यादौ नुक्षुधात्वोर्णिजन्तयोः सन् भवति। तत्र च णिचि परतो नु इत्यत्रोकारस्य 'अचो ञ्णिति' (सू.७-२-११५) इति वृद्धौ आवादेशे च नाव् इ स इति स्थिते आवादेशस्य स्थानिवद्भावेन औकाररूपातिदेशे नौशब्दस्य द्वित्वे नौ नौ इस इत्यत्र अभ्यसहस्वे आवादेशे च नुनावयिषति इति रूपम्। तत्र स्थानिवद्भावो दुर्लभः। 'द्विर्वचनेऽचि' इत्यनेन द्वित्वनिमित्तेऽचि परत एव अजादेशस्य स्थानिवद्भाव उच्यते। अत्र च णिचः द्वित्वनिमित्तत्वाभावात् तत्र परतः कृतस्य अजादेशस्य कथं स्थानिवत्त्वं लभ्येतेत्यत आह—**ओः पुयण्जि** इति। तथा च णौ परतः कृतस्य अजादेशस्य स्थानिवत्त्वमस्त्येव। तत्र 'ओः पुयण्ज्यपरे' (सू.७-४-८०) इति सूत्रं ज्ञापकम्। तस्य सूत्रस्य हि सनि परे यदङ्गं तदवयवाभ्यासोकारस्येत्वं स्यात् अवर्णपरकेषु पवर्गयण्जकारेषु परत इत्यर्थः। वियविषति इत्युदाहरणम्। तत्र पुयण्जि इत्यनुक्तौ अवनुनावयिषतीत्यादावपि अभ्यासोकारस्य इत्वं भवेत्। तद्वारणाय पुयण्जीत्युक्तम्। यदि च णौ कृतस्य स्थानिवद्भावो नास्ति तदा

उकारयुक्तमभ्यासस्वरूपमत्र दुर्लभमिति अभ्यासे उकाराभावादेव इकारादेशाप्रवृत्तेः किं पुयण्ज्यिग्रहणेन। कृतं च तत् णौ स्थानिवद्भावो भवतीति ज्ञापयतीति भावः।

[ज्ञा.] 'प्रत्ययस्य लुक्' (सू.१-१-६१)॥ प्रत्ययस्येत्येतत्सामर्थ्यात् लोपे प्रकृते 'लुग्वा दुह' (सू.७-३-७३) इति ज्ञापकाच्च लुगादयः सर्वादेशाः।

[वि.] 'प्रत्ययस्य लुक्श्लुलुपः' इति सूत्रे प्रत्ययग्रहणं लुक्श्लुलुपां सर्वादेशत्वसिद्ध्यर्थमिति वार्तिककारेणोक्तम्। तच्च खण्डयन् आह भाष्यकारः—

'एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति लुक्श्लुलुपः सर्वादेशा भवन्तीति। यदयं 'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' इति लोपे प्रकृते लुकं शास्ति' इति।

'लुग्वा दुह' (सू. ७-३-७३) इति सूत्रेण दुहादीनां क्सस्य दन्त्ये तङि परे लुग्वा विधीयते। अदुग्ध अधुक्षतेत्यादिकमुदाहरणम्। तत्र सूत्रे 'घोर्लोपो लेटि वा' (सू. ७-३-७०) इति सूत्राल्लोप इत्यनुवृत्त्यैव सिद्धे लुग्ग्रहणम् लुग्ग्रहणेन विधीयमानमदर्शनं सर्वादेश इति ज्ञापयति। लोपस्य तु अन्त्यादेशत्वम्। लुगपि यदान्त्यादेशः स्यात् तदा लोपपदानुवृत्त्यैवेष्टसिद्धेः किं लुग्ग्रहणेन। कृतं तु लुग्ग्रहणं सर्वादेशत्वस्य ज्ञापकमिति भावः। तदेतदाह—**प्रत्ययस्येत्येतत्सामर्थ्यादित्यादिना**। इदं वार्तिकमतेन। भाष्यमतेन त्वाह—**'लुग्वा दुह' इति ज्ञापकाच्चेति**।

[ज्ञा.] 'प्रत्ययलोपे' (सू. १-१-६२)॥ 'न लुमताङ्गस्य' (सू. १-१-६३) इति निषेधात् ज्ञापकात् लुगादीनामपि लोपत्वम्।

[वि.] ननु 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रेण प्रत्ययस्य लोपे सत्यपि प्रत्ययनिमित्तकं कार्यं भवतीत्युच्यते। तत्र प्रत्ययस्य लुकि सति प्रत्यय-

निमित्तकं कार्यं न प्राप्नोति, लुको लोपत्वाभावात्। तथा च पञ्च सप्त इत्यादौ 'षड्भ्यो लुक्' (सू. ७-१-२२) इति सूत्रेण जश्शसोर्लुकि पञ्चन् सप्तन् इत्यादेः पदत्वं न स्यात्, पदत्वाभावाच्च नलोपो न स्यात्। प्रत्ययलक्षणेन हि सुबन्तत्वमाश्रित्य पदत्वं वक्तव्यम्। प्रत्ययलोप एव च प्रत्ययलक्षणं न तु प्रत्ययलुकीत्याशङ्क्याह—**न लुमताङ्गस्येति निषेधादिति**। लुमता लुक् इत्यादिशब्देन लुप्ते प्रत्ययलक्षणं अङ्गकार्यं नेति निषेधः प्रत्ययलक्षणप्राप्तावेव युज्यते। अप्राप्तनिषेधायोगात्। लुक्शब्देन लुप्ते प्रत्ययलक्षणं च लुको लोपसंज्ञायामेव घटते। प्रत्ययलोप इत्युक्तेः। अतश्च निषेधान्यथानुपपत्त्या लुगादीनामपि लोपत्वमस्तीति ज्ञाप्यत इति भावः।

[ज्ञा.] तस्मिन्निति (सू. १-१-६६) ॥ अनयोः सूत्रयोः षष्ठीप्रकल्पकत्वपक्षे सप्तमीपञ्चम्योर्न युगपत् प्रकल्पकता। 'एकः पूर्वपरयोः' (सू. ६-१-७५) इति ज्ञापकात्।

[वि.] 'ननु तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषा पूर्वस्य षष्ठीं प्रकल्पयति, 'तस्मादित्युत्तरस्य' (सू. १-१-६७) इति परिभाषा परस्य षष्ठीं प्रकल्पयतीति स्वीकारे यत्र विधिसूत्रे सप्तमी पञ्चमी चेत्युभयोः श्रवणं तत्र पूर्वस्य परस्य च षष्ठीप्रकल्पनं स्यात्। ततश्च तत्रोभयोः कार्यं प्राप्नोति। यथा 'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकेऽनुदात्तम्' (सू. ६-१-१८६) इति सूत्रे तास्यादिभ्य इति पञ्चमी लसार्वधातुके इति सप्तम्याः षष्ठीं प्रकल्पयेत्। तथा लसर्वधातुक इत्येषा सप्तमी तास्यादिभ्य इति पञ्चम्याः षष्ठीं प्रकल्पयेत्। तत्रोभयोः कार्यमनुदात्तत्वं प्राप्नोति इत्याशङ्क्याह—**अनयोः सूत्रयोरिति**। यद्युभयनिर्देशात् परस्परप्रकल्पने सति तास्यादिभ्यो लसार्वधातुकस्य लसार्वधातुके तास्यादीनामनुदात्तत्वं भवतीति वाक्यार्थः स्यात् तदा 'आद्गुणः' इत्यादावप्यचीत्यनुवृत्तेः उभयप्रकल्पनिमाश्रित्य अचि अवर्णस्य, अवर्णात्परस्याचश्च गुण इति व्याख्यानेन पूर्वपरयोर्गुणसिद्ध्या 'एकः पूर्वपरयोः' (सू. ६-१-७५) इति व्यर्थं स्यात्। यतश्च तत्सूत्रमारब्धम् अतः पञ्चमीसप्तम्योरुभयोः प्रकल्पनं नाश्रीयते। उभयत

आश्रयणे पञ्चमीनिर्देशस्य बलीयस्त्वात् पञ्चम्या एव षष्ठीप्रकल्पकत्वात् परस्य गुणः स्यादिति पूर्वपरयोर्गुणसिद्ध्यर्थं 'एकः पूर्वपरयो' रिति सूत्रम्। ततश्च तास्यनुदात्तेत् इत्यादावपि पञ्चमी सप्तम्याः षष्ठीं प्रकल्पयतीति तास्यादिभ्यः परस्य लसार्वधातुकस्यैवानुदात्तत्वं न पूर्वपरयोर्द्वयोरिति न दोष इत्याशयः।

[ज्ञा.] येन विधिः (सू. १-१-७२)॥ 'नेदमदसोरकोः' (सू. ७-१-११) इत्यत्राकोरित्युक्त्या तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति ज्ञाप्यते।

[वि०] ननु येन विधिरिति सूत्रे विशेषणं तस्य तदन्तस्य च संज्ञा स्यादिति व्याख्यानेऽपि अकज्वतः सर्वक इत्यस्मात् परस्य जसः शी न प्राप्नोति। तथा हि सर्व जस् इति स्थिते अकचि सर्वक जस् इत्यत्र सर्वक इत्यस्य सर्वशब्दत्वाभावात् सर्वशब्दान्तत्वाभावाच्च सर्वनाम्नः प्रातिपदिकात् इत्यनेन वा सर्वनामान्तात् प्रातिपदिकात् इत्यनेन वा उभयथापि ग्रहणाभावात् 'जसः शी' (सू. ७-१-१७) इति सूत्राप्रवृत्तेः। एवं भिनत्ति इत्यत्र भिद् इत्यस्यैव धातुत्वेन श्नम्वतः भिनद् इत्यस्य शब्दान्तरस्य धातुत्वाभावात् 'धातोः' (सू. ६-१-१६२) इति विधीयमानोऽन्तोदान्तस्वरो न स्यात् इत्याशङ्क्याह—**नेदमदसोरको**रित्यादिना। 'नेदमदसोरकोः' (सू. ७-१-११) इति सूत्रं ककाररहितयोरिदमदसोः परस्य भिसः ऐस् न स्यादिति प्रतिपादयति। तत्र ककाररहितयोरित्यनेन इमक अमुक इति अकज्विशिष्टयोः इदमदसोर्व्यावृत्तिरिष्यते। तत्र इदमदसोर्विषये उच्यमानः प्रतिषेधः तद्विन्नयोः अकज्विशिष्टयोः कथं प्राप्नुयात्। अतः अकोः इत्यनुक्तावपि शब्दभेदादेव व्यावृत्तिसिद्धेः अकोरिति व्यर्थं सत् तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति ज्ञापयति। तथा च इदमदस् शब्दमध्यपाती अकच् तदवयवत्वात् इदमदस्ग्रहणेन गृह्येतेति तद्व्यावृत्त्यर्थं अकोरिति सार्थकम्। एवं सर्वकशब्दस्यापि सर्वशब्देन ग्रहणात् सर्वनामत्वमस्तीति ततः परस्य जसः शीभावे सर्वके इति रूपं सिध्यति। एवं भिनद्

इत्यत्र भिद् इत्यस्य मध्ये अवयवत्वेनागतः श्नम् भिद्ग्रहणेन गृह्यत इति भिनद् इत्यस्यापि धातुत्वात् 'धातोः' इति विहितोऽन्तोदात्तोऽपि सिध्यतीति भावः। इदमेव 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इत्यपि पठन्ति।

अक्तपरिमाणानामिति। परिच्छिन्नपरिमाणानामित्यर्थः। **तत्त्वमिति**। धात्वादित्वमित्यर्थः।

[ज्ञा.] 'पूर्वादिनिः' (सू. ५-२-८६) 'सपूर्वाच्च' (५-२-८७) इति योगविभागो व्यपदेशिवद्भावोऽप्रातिपदिकेनेत्यस्याः ज्ञापकः।

[वि.] ननु 'येन विधिस्तदन्तस्य' (सू. १-१-७२) इति सूत्रे विशेषणं तदन्तस्य संज्ञा स्यादित्येतावन्मात्रोक्तौ 'रोणी' (सू. ४-२-७८) इति सूत्रेण विधीयमानोऽण् रोणीशब्दान्तात् अजकरोणी इत्यत एव भवेत् न तु केवलरोणीशब्दात्। ततश्च रौण इति न सिध्येत् इत्यालोच्य विशेषणं तदन्तस्य तस्य च संज्ञा स्यादिति आकरे व्याख्यातम्। तत्र तस्य चेत्यंशोऽनुपादेयः। तदभावेऽपि व्यपदेशिवद्भावेन रोणीशब्दस्य रोणीशब्दान्तत्वमादायाण्सिद्धेरित्याशङ्कां मनसिकृत्याह—**पूर्वादिनि**रित्यादिना। तथा च प्रातिपदिकविषये व्यपदेशिवद्भावविरहात् रोणीशब्दस्य रोणीशब्दान्तत्वाभावात् तस्य च संज्ञा स्यादित्यवश्यं वक्तव्यमिति भावः। व्यपदेशिवद्भावोऽप्रातिपदिकेन इत्यस्यां परिभाषायां ज्ञापकं तु पूर्वादिनिः इति योगविभागः। 'पूर्वात्सपूर्वादिनिः' इत्येकसूत्रं कृत्वा कृतपूर्व इत्यादेः कृतादिशब्दपूर्वकत्वात् केवलपूर्वशब्दस्य व्यपदेशिवद्भावेन सपूर्वकत्वाच्च पूर्वी कृतपूर्वी इत्युभयत्रापि इनिप्रत्ययस्य साधयितुं शक्यत्वात् तथा अकृत्वा पूर्वादिनिः सपूर्वाच्चेति योगविभागकरणमहिम्ना प्रातिपदिकविषये व्यपदेशिवद्भावो नास्तीति ज्ञाप्यत इति भावः।

इति प्रथमाध्यायस्य प्रथमः पादः।

[ज्ञा.] 'तस्यादितः' (सू. १-२-३२) ॥ स्वरितस्येत्यादि देवब्रह्मणोरनुदात्तवचनं ज्ञापकम्, इदं काण्डम् 'उदात्तादनुदात्तस्य स्वरित' (सू. ८-४-६६) इत्यतः परमिति ।

[वि.] 'तस्यादित उदात्तमर्धह्रस्वम्' (सू. १-२-३२) इति सूत्रे भाष्ये स्वरितस्य अर्धमात्रात्मकः आद्यवयवः उदात्तसंज्ञक इति सूत्रार्थे प्रतिपाद्य, 'तस्यादित उदात्तम्' (सू. १-२-३२) इति सूत्रमारभ्य 'उदात्तस्वरितपरस्य सन्नतरः' (सू. १-२-४०) इति सूत्रपर्यन्ता नवसूत्री 'उदात्तादनुदात्तस्य स्वरितः' (सू. ८-४-६६) इति सूत्रादूर्ध्वं पठनीया इत्युक्त्वा प्रयोजनमुक्तम् 'स्वरितात् सिद्धिर्यथा स्यात् 'स्वरितात्संहितायामनुदात्तानाम्' (सू. १-२-३९) इति । तस्यायमर्थः - इमं मे[1] गङ्गे यमुने सरस्वति शुतुद्रि' इत्यत्र स्वरितात् मेशब्दात्परेषां गङ्गेप्रभृतीनामामन्त्रितत्वादनुदात्तानां 'स्वरितात्संहितायामनुदात्तानाम्' इति सूत्रेण एकश्रुतिर्भवति । मेशब्दस्य स्वरितस्तु 'उदात्तादनुदात्तस्य स्वरितः' (सू. ८-४-६६) इति सूत्रेण भवति । तत्र गङ्गेप्रभृतीनाम् 'स्वरितात्संहितायामनुदात्तानाम्' (सू. १-२-३९) इति सूत्रेण एकश्रुतौ कर्तव्यायां 'उदात्तादनुदात्तस्य स्वरितः' (सू. ८-४-६६) इति सूत्रेण विहितः मेशब्दस्य स्वरितः असिद्ध इति स्वरितात्परत्वं गङ्गेप्रभृतीनां नास्तीति एकश्रुतिर्न सिध्येत् यथाश्रुताष्टाध्यायीपाठे । पूर्वोक्तनवसूत्र्याः 'उदात्तादनुदात्तस्य' (८-४ ६६) इत्यनन्तरं पाठे तु एकश्रुतिविधायकस्य 'स्वरितात्संहितायाम्' (सू. १-२-३९) इति सूत्रस्यापि नवसूत्र्यन्तर्भूतस्य अनन्तरत्वात् ततः पूर्वभवस्य 'उदात्तादनुदात्तस्य' इति सूत्रस्य नासिद्धत्वमिति मेशब्दस्य स्वरितत्वसिद्ध्या ततः परेषामनुदात्तानां गङ्गेप्रभृतीनामेकश्रुतिर्निराबाधेति । न च स्वरितादित्याश्रित्य अनुदात्तानामेकश्रुतिविधानात् स्वरितस्यासिद्धत्वे स्वरितादित्याश्रयायोगात् स्वरितस्य सिद्धत्वं ज्ञायत इति व्यर्थोऽयं परिश्रम इति वाच्यम् । यत्र स्वरितस्यासिद्धत्वप्रसक्तिर्नास्ति तत्र स्वरितादित्याश्रित्य ततः परेषामनुदात्तानामेकश्रुति-

विधायकतया सूत्रसार्थक्यात्। यथा 'कार्यं देवदत्तयज्ञदत्तौ' इत्यत्र कार्यशब्दः ण्यदन्तः 'तित्स्वरितम्' (६-१-१८५) इति सूत्रेण स्वरितान्तः। ततः परयोरनुदात्तयोर्देवदत्तयज्ञदत्तयोः एकश्रुतिर्भवति। अत्र 'तित्स्वरितम्' इत्यस्य त्रिपादीस्थत्वाभावेनासिद्धत्वप्रसक्तिरेव नास्तीति अत्र स्वरितमाश्रित्य ततः परस्यानुदात्तस्यैकश्रुतिविधायकतया सूत्रसार्थक्यम्। ततश्च इमं मे गङ्गे इत्यत्र पूर्वोक्तानुपपत्तिपरिहारार्थं पूर्वोक्तनवसूत्र्याः 'उदात्तादनुदात्तस्य' (सू. ८-४-६६) इत्यस्मादनन्तरं पाठः कर्तव्य इति भाष्याभिप्रायः।

एवं नवसूत्र्याः अष्टमाध्याये पाठमुक्त्वा तत्र ज्ञापकमपि तत्रैव भाष्ये-'देवब्रह्मणोरनुदात्तवचनं ज्ञापकं परमेतत्सूत्रकाण्डम् इति' इति ग्रन्थेन उक्तम्। 'देवब्रह्मणोरनुदात्तः' (सू. १-२-३८) इति सूत्रेण देवब्रह्मशब्दयोः सुब्रह्मण्यानिगदान्तर्गतयोः स्वरितस्यानुदात्तो विधीयते। 'देवा ब्रह्माण आगच्छत' इत्युदाहरणम्। देवाः ब्रह्माणः इत्यनयोः 'आमन्त्रितस्य च' (सू. ६-१-१९८) इति सूत्रेण आदिरुदात्तो भवति। ततः शेषनिघाते तस्य 'उदात्तादनुदात्तस्य स्वरितः' (सू. ८-४-६६) इति सूत्रेण स्वरितः। तस्य च स्वरितस्य 'देवब्रह्मणोरनुदात्तः' (सू. १-२-३८) इति सूत्रेणानुदात्तो विधीयते। तत्र 'देवब्रह्मणोः' (सू. १-२-३८) इत्यनुदात्ते कर्तव्ये 'उदात्तादनुदात्तस्य' (८-४-६६) इति स्वरितस्यासिद्धत्वात् अनुदात्त एव वर्तत इति तस्य पुनरनुदात्तविधानमनर्थकं सत् नवसूत्रात्मकं काण्डम् 'उदात्तादनुदात्तस्य स्वरितः' इत्यतः परमिति ज्ञापयति। तद्रीत्या च नवसूत्रात्मककाण्डान्तर्गतेन 'देवब्रह्मणोः' इति सूत्रेण परेण पूर्वस्य 'उदात्तादनुदात्तस्य' (सू. ८-४-६६) इति स्वरितस्यासिद्धत्वं न भवतीति तस्यानुदात्तवचनं सार्थकमिति ज्ञापकपरभाष्याशयः।

तदेतत्सर्वं मनसिकृत्याह—**स्वरितस्येत्यादी**ति। स्वरितस्येत्यनुवर्तमाने देवब्रह्मणोः अनुदात्तविधायकं 'देवब्रह्मणोरनुदात्तः' इति सूत्रं पूर्वोक्तार्थे ज्ञापकमित्यर्थः।

[ज्ञा.] अपृक्त एकाल् (सू. १-२-४१) ॥ इदमप्येकग्रहणं वर्णग्रहणे जातिग्रहणं ज्ञापयति ।

[वि.] इदमपीति । अपिना 'निपात एकाच्' (सू. १-१-१४) इति सूत्रस्थमेकग्रहणं समुच्चीयते । एतच्च पूर्वमेव विवृतमिति नेह विव्रियते ।

[ज्ञा.] अर्थवदधातुः (सू.१-२-४५)॥ अप्रत्यय इत्यस्य प्रसज्य-प्रतिषेधत्वे 'नोङ्धात्वोः' (सू. ६-१-१७५) इति विभक्तिस्वरप्रतिषेधात् ज्ञापकात् ऊङन्तादेः प्रातिपदिकत्वम् ।

[वि.] 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रे अप्रत्यय इत्यस्य प्रत्ययो न इत्येवं प्रसज्यप्रतिषेधपरत्वम् इति पक्षे प्रत्ययान्तं प्रत्ययश्च प्रातिपदिकसंज्ञके न भवतः इति सूत्रार्थः स्यात् । ततश्च ब्रह्मबन्धुशब्दात् स्त्रियां 'ऊङुतः' (सू. ४-१-६६) इति सूत्रेण ऊङि ब्रह्मबन्धु ऊ इति स्थिते 'अकः सवर्णे दीर्घः' (सू. ६-१-१०१) इति सवर्णदीर्घे ब्रह्मबन्धू इति स्थिते एकादेशस्य ऊकारस्य परादिवद्भावेन प्रत्ययत्वात् ब्रह्मबन्धू इत्यस्य प्रत्ययान्तत्वात् प्रातिपदिकसंज्ञानिषेधे ततः स्वाद्युत्पत्तिर्न स्यादित्याशङ्क्य ऊङन्तस्य प्रातिपदिकत्वं ज्ञापकेन साधयति—**अप्रत्यय इत्यस्येत्यादिना** । अयमाशयः - ऊङन्तस्य परं प्रत्ययान्तत्वेऽपि प्रातिपदिकसंज्ञा भवति । तत्र ज्ञापकं 'नोङ्धात्वोः' (सू. ६-१-१७१) इति विभक्तिस्वरप्रतिषेधः । तेन हि सूत्रेण ऊङः धातोश्च आदेशभूताद्यणः परे शसादय उदात्ताः न स्युरिति प्रतिपाद्यते । ब्रह्मबन्ध्वा इत्युदाहरणम् । ऊङन्तस्य प्रातिपदिकत्वाभावे ततः परे शसादय एव दुर्लभा इति शसादेरुदात्तत्वनिषेधः ऊङन्तस्य प्रातिपदिकत्वज्ञापनद्वारा ततः विभक्त्युत्पत्तिं ज्ञापयतीत्यर्थः । भाष्ये तु 'उत्पद्यन्ते ऊङन्तात्स्वादयः' इत्येव वचनशरीरं दृश्यते । तस्याप्युक्तार्थ एव तात्पर्यम् ।

[ज्ञा.] 'न ङिसंबुद्ध्योः' (सू. ८-२-८) इति प्रतिषेधात् ज्ञापकात् प्रत्ययलक्षणेनाप्रत्यय इति निषेधो न ।

[वि.] तत्रैव सूत्रे प्रसज्यप्रतिषेधपक्ष एव राजन् स् इति स्थिते दीर्घे हल्ङ्यादिना सुलोपे च राजान् इत्यत्र 'नलोपः प्रातिपदिकान्तस्य' (सू.८-२-७) इति नलोपे राजा इति रूपमिष्यते । तन्न स्यात् । सुलोपे सत्यपि तस्य प्रत्ययलक्षणेन प्रत्ययान्तत्वात् प्रत्ययान्तं प्रातिपदिकं नेति प्रातिपदिकसंज्ञानिषेधात् तत्संज्ञानिमित्तकनलोपासंभवादित्याशङ्क्य, अप्रत्यय इति निषेधविषये प्रत्ययलक्षणं न प्रवर्तते इति ज्ञापनान्न दोष इति समाधत्ते—**न ङिसंबुद्ध्योरिति प्रतिषेधात् ज्ञापकादिति ।** 'न ङिसंबुद्ध्योः' इति सूत्रेण हि ङौ संबुद्धौ च नस्य लोपो न स्यादित्युच्यते । परमे व्योमन्निति ङौ छन्दस्युदाहरणम् । अत्र ङेर्लोपानन्तरं प्रत्ययलक्षणेन प्रत्ययान्तत्वमाश्रित्य अप्रत्यय इति निषेधात्प्रातिपदिकत्वं नेति प्रातिपदिकनिमित्तकनलोपाप्रवृत्त्या नलोपनिषेधकं 'न ङिसंबुद्ध्योः' इति सूत्रमनर्थकम् । कृतं च तत् - प्रत्ययलक्षणमाश्रित्य अप्रत्यय इति निषेधो न प्रवर्तत इति ज्ञापयति । अतो न दोष इति भावः ।

[ज्ञा.] 'तिष्यपुनर्वस्वोः' (सू. ७-२-६३) अत्र बहुवचनग्रहणात् ज्ञापकात् सर्वो द्वन्द्वो विभाषयैकवदिति ज्ञाप्यते । एवं च तिष्यपुनर्वस्विति तद्व्यावर्त्यम् । अथवा जातिरप्राणिनामित्येकवत्त्वम् । नात्रभवन्तः प्राणिनः प्राणा एवात्रभवन्त इति ।

[वि.] ननु 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्' (सू. १-२-६३) इति सूत्रे बहुवचनस्येति किमर्थम् । न च तदभावे एकवचनस्यापि द्विवचनं स्यात्, ततश्च तिष्यपुनर्वसु इत्येकवचनान्तं रूपं न सिद्ध्येदिति वाच्यम् । तिष्यपुनर्वस्वोर्द्वन्द्वे एकवचनस्य दुर्लभत्वात् तत्स्थाने द्विवचनप्रसक्त्यभावात् । न च तिष्यश्च पुनर्वसू च एषां समाहार इति समाहारद्वन्द्वे

एकवद्भावात् एकवचनसौलभ्यमिति वाच्यम्। प्राण्यङ्गादीनामेव समाहारे द्वन्द्वविधानात्। न च 'जातिरप्राणिनाम्' इति सूत्रेणात्र समाहारद्वन्द्व एकवद्भाव इति वाच्यम्। अप्राणिनामिति प्रतिषेधात्। तथा चैकवचनान्तस्य तिष्यपुनर्वसुशब्दस्याभावात् एकवचनस्य द्विवचनप्रसक्त्यभावात् 'तिष्यपुनर्वस्वोः' इति सूत्रे बहुवचनस्येति व्यर्थमित्याशङ्क्य, अत एव तत् सर्वो द्वन्द्वो विभाषा एकवदिति ज्ञापयति। तथा च तिष्यश्च पुनर्वसू चेतीतरेतरयोगद्वन्द्वे तस्य एकवद्भावपक्षे तिष्यपुनर्वसु इत्यत्र एकवचनस्य द्विवचनं मा भूदित्येतदर्थं बहुवचनस्येत्युक्तम्। ज्ञापनफलं तु बाभ्रवाश्च शालङ्कायनाश्चेतीतरेतरयोगद्वन्द्वे बाभ्रवशालङ्कायनम् इति एकवचनान्तस्य साधुत्वम् इत्युक्तं भाष्ये। तदेतदाह—**अत्र बहुवचनग्रहणात् ज्ञापकादिति। तद्व्यावर्त्यमिति।** बहुवचनस्येत्यस्य व्यवच्छेद्यमित्यर्थः।

वस्तुतस्तु तिष्यपुनर्वस्वोः लोके प्राणित्वेन व्यवहाराभावात् प्रतिमन्वन्तरं नक्षत्रभेदेन तिष्यपुनर्वस्वाधारा जातिः संभवतीति च हेतोः अप्राणिजातिवाचित्वेन जातिरप्राणिनामित्यनेन एकवद्भावे सति तस्यैकवचनस्य द्विवचनं मा भूदित्येतदर्थं बहुवचनग्रहणमित्येवोचितमित्याह—**अथवेति। प्राणा एवात्र भवन्त** इति। तिष्यपुनर्वस्वधीनस्थितिकत्वात् प्राणिनां तिष्यपुनर्वस्वोः कथंचित्प्राणत्वं वक्तुं शक्यते न तु प्राणित्वमिति भावः। ततश्चाप्राणिनामिति निषेधो न प्रवर्तत इत्याशयः।

[ज्ञा.] भ्रातृपुत्रौ स्वसृ (सू. १-२-६८)॥ **'पुमान् स्त्रिया'** (सू.१-२-६७) **इत्येव सिद्धे इदं सूत्रं 'यत्रोर्ध्वं प्रकृतेस्तल्लक्षणो विशेषस्तत्र वृद्धो यूनेत्याद्येकशेष इत्यर्थस्य ज्ञापकम्।**

[वि.] नन्वेकशेषप्रकरणे भ्रातुः स्वसा सह, पुत्रस्य दुहित्रा सह चोक्तौ भ्रातृपुत्रौ शिष्येते इत्यर्थकं 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' (सू. १-२-६८) इति

सूत्रम् अनर्थकम्। 'पुमान् स्त्रिया' (सू. १-२-६७) इति सूत्रेणैव गतार्थत्वादित्याशङ्क्य ज्ञापनपरतया सार्थक्यमाह - **पुमान् स्त्रियेत्येवेति।** यत्र प्रकृतेरूर्ध्वमेव स्त्रीपुंलक्षणः विशेषोऽस्ति न तु प्रकृतौ तत्रैव पुमांस्त्रिया इति सूत्रं प्रवर्तते। यथा हंसश्च हंसी च इत्यत्र हंस इति प्रकृतिरेकैवोभयत्र। ततः परमेव भेदो वर्तत इति तत्र पुमांस्त्रिया इत्येकशेषे हंसौ इति भवति। तेन हंसश्च वरटा चेत्यत्रैकशेषो न, प्रकृतावपि भेदात्। भ्राता च स्वसा चेत्यत्रापि प्रकृतावेव भेदोऽस्तीति 'पुमांस्त्रिया' इत्यस्याप्रवृत्त्या तत्रैकशेषविधायकतया 'भ्रातृपुत्रौ' इति सूत्रं सार्थकमिति भावः।

इति प्रथमाध्यायस्य द्वितीयः पादः।

[ज्ञा.] भूवादयः (सू. १-३-१)॥ आदिग्रहणं ज्ञापयति अस्ति च पाठो बाह्यश्च सूत्रादिति।

[वि.] ननु 'भूवादयो धातवः' इति सूत्रे आदिग्रहणं व्यर्थम्। तथा हि सूत्रकारेण भूप्रभृतीन् धातून् पठित्वा ते यदि भूवादिशब्देन परामृश्यन्ते तर्हि 'ते धातवः' इत्येव सूत्रं पठनीयम्। यदि च सूत्रकारेण भूवादयः अपठिताः तदापि भूवादयः इत्यादिग्रहेण ते परामर्ष्टुं न शक्यन्ते इत्याशङ्क्याह—**आदिग्रहण**मिति। सूत्राद्बहिर्भूतो धातुपाठो वर्तते यत्र स्थितानां धातूनां आदिशब्देन परामर्शः सुलभः इति ज्ञापनार्थम् आदिपदं प्रयुक्तवान् सूत्रकार इति भावः। तथा च सूत्रेषु ये पठ्यन्ते मृडमृदादयः तान् समाप्य 'ते धातवः' इति सूत्रकरणे तत्रापठितानां धातुसंज्ञा न स्यात्। क्रियावाचिनः धातवः इत्युक्तावपि धातुपाठे अपठितानां आणवयति इत्यादीनामपि धातुसंज्ञा स्यात्। अतः सूत्रवार्तिकभाष्यगणपाठेषु दृष्टानामेव धातुसंज्ञासिद्ध्यर्थं भूवादय इत्युक्तमित्यवधेयम्।

[ज्ञा.] 'न विभक्तौ' (सू. १-३-४)॥ अतद्धित इति वक्तव्यमिति थमो मस्येत्संज्ञापरित्राणार्थेनोकारेणानुबन्धेन विभक्तौ तद्धिते प्रतिषेधाभावज्ञापनात् प्रत्याख्यातम्। दानीं तु यान्तः करिष्यते लुप्तनिर्दिष्टयकारेण।

[वि.] ननु 'न विभक्तौ तुस्माः' इति सूत्रेण विभक्तिस्थानां तवर्गसकारमकाराणामित्संज्ञा निषिध्यते। ततश्च किम्शब्दात् 'किमोऽत्' (सू.५-३-१२) इति सूत्रेण अत् इति प्रत्यये तकारस्य 'हलन्त्यम्' (सू. १-३-३) इति सूत्रेणेत्संज्ञायां लोपे च 'क्वाति' (सू. ७-२-१०५) इति सूत्रेण किमः क्वादेशे च 'क' इति रूपमिष्यते। तत्र 'अत्' प्रत्ययस्य तद्धितस्य 'प्राग्दिशो विभक्तिः' (सू. ५-३-१) इति सूत्रेण विभक्तिसंज्ञकत्वात् तत्स्थस्य तकारस्य 'न विभक्तौ तुस्माः' (सू. १-३-४) इति सूत्रेण इत्संज्ञानिषेधः स्यादित्याशङ्क्य वार्तिककृता 'अतद्धित इति वक्तव्यम्' इत्युक्तम्। तद्धितभिन्नविभक्तिस्थानामेव

तवर्गादीनामित्संज्ञा निषिध्यत इति तद्धितस्थतकारस्येत्संज्ञा भवत्येवेति तदाशयः। इदं च वार्तिकं ज्ञापकेन तद्धितस्थतवर्गादीनां इत्संज्ञानिषेधो न भवतीति प्रसाध्य प्रत्याख्यातं भाष्यकृता। तदाह - **अतद्धित इति वक्तव्यमितीति**। अस्य च प्रत्याख्यातमित्यनेनान्वयः। 'इदमस्थमुः' (सू. ५-३-९४) इति सूत्रेण 'इदम्' शब्दात् प्रकारवचने थमुप्रत्ययो विधीयते। प्रत्यये च उकार इत्संज्ञकः। अत्र उकारासञ्ज्ञनं मास्तु 'थम्' इत्येव प्रत्ययोऽस्तु इति शङ्कायां, तथा सति मकारस्य 'हलन्त्यम्' इति सूत्रेणेत्संज्ञा स्यादिति तद्वारणार्थमुकारः संयोजितः। ततश्च उपदेशे मकारोऽन्त्यो न भवतीति नेत्संज्ञेति समाधानं वक्तव्यम्। परं तु थम् इति मान्ते प्रत्यये उपदिष्टेऽपि तस्य 'प्राग्दिशो विभक्तिः' (सू. ५-३-१) इत्यनेन विभक्तिसंज्ञकत्वात् 'न विभक्तौ तुस्माः' इति सूत्रेणैव मकारस्येत्संज्ञा न भविष्यतीति तस्य इत्संज्ञातः परित्राणार्थं क्रियमाणमुकारोच्चारणं व्यर्थम्। कृतं च तत् तद्धितविभक्तिस्थतुस्मानामित्संज्ञानिषेधो नेति ज्ञापयति। ततश्च थमो मकारस्येत्संज्ञा स्यादिति तन्निषेधार्थमुकारोच्चारणं सार्थकम्। तेनैव अत्प्रभृतितद्धितेऽपि इत्संज्ञाप्रतिषेधो न प्रवर्त्स्यतीति 'अतद्धित इति वक्तव्यम्' इति वार्तिकमनावश्यकमिति भावः।

ननु तद्धितविभक्तौ तुस्मानामित्संज्ञानिषेधो न प्रवर्तत इति ज्ञापने इदानीमित्यत्र 'दानीम् च' (सू. ५-३-१८) इति सूत्रेण विहितो यो दानीम् प्रत्ययस्तदन्त्यमकारस्येत्संज्ञा प्राप्नोतीत्याशङ्क्याह—**दानीम् तु यान्तः करिष्यत** इति। दानीम्यू इति यकारान्त एव प्रत्ययः। स च यकारः सूत्रे चकाररूपे वलि परे 'लोपो व्योर्वलि' (सू. ६-१-६६) इति लुप्तत्वान्न श्रूयते। तथा चोपदेशे मकारस्यान्त्यत्वं नास्तीति नेत्संज्ञा। न च प्रत्ययस्य यकारान्तत्वे इदानीमित्यादौ यकारश्रवणापत्तिरिति वाच्यम्। 'संयोगान्तस्य लोपः' (सू. ८-२-२३) इति यकारस्य लोपादित्याशयः। **लुप्तनिर्दिष्टयकारेणेति**। लोपो व्योर्वलीत्यनेनेति शेषः।

[ज्ञा.] तस्य लोपः (सू. १-३-९) 'ददातिदधात्योर्विभाषा' (सू. ३-१-१३९) इति ज्ञापकात् नानुबन्धकृतमसारूप्यम्। 'शित्सर्वस्य' (सू. १-१-५५) इति ज्ञापकात् नानुबन्धकृतमनेकाल्त्वम्। 'उदीचां माङः' (सू. ३-४-१९) इति सानुबन्धकस्यात्वभूतस्य निर्देशात् नानुबन्धकृतमनेजन्तत्वम्। एकान्ता अनुबन्धा इत्येव न्याय्यम्। सहेतुकत्वात्। अनुदात्तङितः (सू. १-३-१२) 'अनुपसर्गाद्वा' (सू. १-३-४३) इति विकल्पविधानं ज्ञापकम् विकरणेभ्यो नियमो बलीयानित्यस्य। विकरणव्यवधानेऽपि नियमप्रवृत्तेर्ज्ञापकमिति 'शदेः शितः' (सू. १-३-६०) इति सूत्रे भाष्ये ध्वनितम्।

इति प्रथमाध्यायस्य तृतीयः पादः।

[ज्ञा.] विप्रतिषेधे (सू. १-४-२) 'असिद्धं बहिरङ्गम्' इत्यस्यां 'वाह ऊठ्' (सू. ६-४-१३२) इत्यूठ्ग्रहणं ज्ञापकम्। इन्द्रे द्वावचौ। तत्रैको यस्येति लोपेनापह्रियते। अपर एकादेशेन। ततोऽनच्क इन्द्रः संपन्नः। तत्र वृद्धेः प्रसङ्गाभावान्निषेधो व्यर्थः सन् ज्ञापकः पूर्वोत्तरपदयोस्तावत्कार्यं भवति नैकादेशोऽन्तरङ्ग इति। यस्मात्प्रत्ययविधिः (सू. १-३-१३) 'गतिरनन्तरः' (सू. ६-२-४९) इत्यनन्तरग्रहणं कृद्ग्रहणे गतिकारकपूर्वस्यापीत्यस्याः ज्ञापकम्। सुप्तिङन्तम् (सू. १-४-१४) इदमन्तग्रहणं संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं न इत्यस्या ज्ञापकम्।

[वि.] एतानि सर्वाण्यपि परिभाषारूपाणि वचनानि परिभाषेन्दुशेखरे विवृतानीति नेह विव्रियन्ते। एवंजातीयकानां कासांचित्परिभाषाणामपि ज्ञापकसंग्रहेऽस्मिन् समावेशः कथमुपजात इति न जानीमः।

[ज्ञा.] बहुषु बहुवचनम् (सू. १-४-२१) बहुवचननिर्देशो ज्ञापको नानाद्रव्यवाचिबहुशब्दस्य ग्रहणं न वैपुल्यवाचिन इति।

[वि.] ननु बहुषु बहुवचनमिति सूत्रेण बहुत्वेऽर्थे बहुवचनं विधीयते। तत्र च बहुत्वं वैपुल्यं संख्याविशेषश्चेति द्विविधम्। तत्र विशेषकाभावात् द्वयोरप्यर्थयोर्बहुवचनं प्राप्नोति। ततश्च बहुरोदन इत्यत्र वैपुल्यस्य प्रकृतितो विवक्षितत्वात् बहुवचनप्रसङ्ग इत्याशङ्क्याह—**बहुवचननिर्देश** इति। बहुत्वस्यैकत्वात् बहौ बहुवचनमिति निर्देष्टव्ये सति यत् बहुषु इति बहुवचननिर्देशनं तज्ज्ञापयति नानाद्रव्यवाची यो बहुशब्दः स एव बहुषु इत्यत्रोपात्तो न

वैपुल्यवाची बहुशब्द इति। अयमाशयः—सूत्रे बहुत्वस्यैकत्वेऽपि बहुत्वाश्रयस्य बहुत्वात् आश्रयगतं बहुत्वं बहुत्वे आरोप्य बहुषु इति बहुवचननिर्देशः कृतः। तेन च यस्य बहुत्वस्याश्रयो बहुर्भवति तस्मिन् बहुत्वे बहुवचनं भवतीति सूत्रार्थः संपद्यते। वैपुल्यरूपस्य बहुत्वस्याश्रय एक इति एकाश्रिते वैपुल्यात्मके बहुत्वे बहुवचनं न भवति। अतो बहुरोदन इत्यादिरेकवचनान्तबहुशब्दप्रयोगोऽप्युपपन्नः। संख्यारूपस्य बहुत्वस्याश्रयो नानेति संख्यारूपे बहुत्व एव बहुवचनमिति।

[ज्ञा.] तत्रैतेषु प्रत्ययनियमे अव्ययानां पदत्वाप्राप्तेरर्थनियमो वक्तव्यः। प्रकृतार्थापेक्षो वा प्रत्ययनियमः।

[वि] 'द्व्येकयोर्द्विवचनैकवचने', 'बहुषु बहुवचनम्' (सू. १-४-२१) इत्यादीनां नियमार्थत्वमाश्रीयते। नियमश्च द्विविधः प्रत्ययनियमः अर्थनियमश्चेति। एकस्मिन्नेवैकवचनम्, द्वयोरेव द्विवचनम्, बहुष्वेव बहुवचनमिति प्रत्ययनियमः एकस्मिन्नेकवचनमेव, द्वयोर्द्विवचनमेव, बहुषु बहुवचनमेवेति चार्थनियमः। तत्र प्रत्ययनियमाश्रयणे उच्चैस् नीचैस् इत्यादीनामव्ययानां पदसंज्ञा न प्राप्नोति, असुबन्तत्वात्। प्रत्यया हि विशिष्टायां संख्यायां नियता इति निःसंख्येभ्योऽव्ययेभ्यः सुबनुत्पत्तेः सुबन्तत्वप्रयुक्ता पदसंज्ञा न स्यात्। पदत्वाभावे च रुत्वाद्यभावप्रसङ्ग इत्याशङ्क्य, अत एवानुपपत्तेः प्रत्ययनियमं परित्यज्य अर्थनियम आश्रयणीय इत्याह—**तत्रैतेषु** इति। **एतेषु** बहुवचनादिषु।

प्रत्ययनियमपक्षेऽपि न दोषः। प्रकृतार्थानपेक्ष्य नियमः क्रियते। एकत्वादयश्च प्रकृताः। ततश्च एकस्मिन्नेवैकवचनमिति प्रत्ययनियमेन संख्यात्वेन एकत्वसजातीययोर्द्वित्वबहुत्वयोरेकवचनव्यावृत्तिर्लभ्यते। तावता निःसंख्येभ्योऽव्ययेभ्यः प्रातिपदिकार्थे एकवचनं न व्यावर्त्यते। ततश्चाव्ययेभ्योऽपि स्वाद्युत्पत्तिसिद्धेः पदत्वमविरुद्धमित्याशयेनाह—**प्रकृतार्थापेक्षो वेति**।

पूर्वोक्तनियमद्वयप्रतिपादकं वार्तिकं पठति—

[ज्ञा.] सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्।
प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा ॥

[वि.] **नियमस्तत्रेति**। अर्थनियम इत्यर्थः। **नियमः प्रकृतेषु वेति**। प्रत्ययनियम इत्यर्थः।

[ज्ञा.] तत्रार्थे 'अव्ययादाप्सुपः' (सू.२-४-८२) इति ज्ञापकाद्धा अव्ययेभ्यः सुपः। अव्ययेभ्य औत्सर्गिकमेकवचनमिति पक्षान्तरं 'तद्धितश्च' (सू. १-१-३१) इति सूत्रे भाष्ये।

[वि.] भवतु सामान्यापेक्षः प्रत्ययनियमः एकत्व एवैकवचनं नान्यस्मिन् कस्मिंश्चिदप्यर्थ इति। तथापि ज्ञापकादव्ययेभ्यः स्वाद्युत्पत्तिः सिध्यतीत्याह— **तत्रार्थ** इति। एकत्वाद्यर्थ एवैकवचनादिकमिति पक्षेऽपीत्यर्थः। प्रत्ययनियमेन निःसंख्येभ्योऽव्ययेभ्यो यदि सुपो व्यावर्त्यन्ते तर्हि अव्ययेभ्यः सुपामनुत्पत्त्या तेषाम् 'अव्ययादाप्सुपः' (सू. २-४-८२) इति लुग्विधानमनर्थकं स्यात्। कृतं च तत् अव्ययेभ्यः सुबुत्पत्तिरस्तीति ज्ञापयति। अतो न पदत्वानुपपत्तिरिति भावः। **अव्ययेभ्यः सुप** इति। सुप इति प्रथमाबहुवचनम्। उत्पद्यन्त इति शेषः।

वस्तुतस्तु - अव्ययान्न सर्ववचनान्युत्पद्यन्ते, किं त्वेकवचनमेवेत्याह— **अव्ययेभ्य** इति। 'तद्धितश्चासर्वविभक्तिः' इति सूत्रभाष्ये 'द्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इति सूत्रन्यासं भङ्क्त्वा 'एकवचनम्' 'द्वयोर्द्विवचनम्' 'बहुषु बहुवचनम्' इति सूत्रविन्यासं कृत्वा एकवचनमुत्सर्गतः करिष्यते, द्विबह्वोरर्थयोस्तस्य द्विवचनबहुवचने बाधके इत्युक्तम्। ततश्च एकवचनमिति सामान्यविधिना द्वित्वबहुत्वाभावे एकवचनमिति लभ्यते। अतोऽसंख्यानामव्यय'नां द्वित्वबहुत्वाभावात् सामान्यसूत्रोक्तमेकवचनमेव भविष्यतीति भावः।

किं सामान्यसूत्रेण प्रथमाया एवैकवचनं भवति, उत सर्वविभक्त्येकवचनमिति त्वन्यत्।

[ज्ञा.] अधिपरी अनर्थकौ (सू. १-४-९३)॥ एतज्ज्ञापयति अनर्थकानामपि निपातानामर्थवत् कृतमिति। इदं हि गत्युपसर्गसंज्ञाबाधेन कर्मप्रवचनीयसंज्ञार्थम्। यद्वा अर्थान्तराभावादनर्थकौ धातुनोक्तां क्रियामाहतुः। उक्तार्थानामपि प्रयोग इत्यर्थज्ञापकम्।

[वि.] ननु 'अधिपरी अनर्थकौ' इति सूत्रेणानर्थकयोः अधिपर्योः कर्मप्रवचनीयसंज्ञाविधानमनर्थकम्। न च गत्युपसर्गसंज्ञाबाधनार्थं तद्विधानम् इति वाच्यम्। क्रियायोगे हि गतिसंज्ञोपसर्गसंज्ञा च विधीयते। अनर्थकयोश्च क्रियान्वितार्थकत्वरूपक्रियायोगाभावात्तयोः संज्ञयोरप्रसक्तेः इत्याशङ्क्य ज्ञापनार्थतया सूत्रसार्थक्यमाह—**एतज्ज्ञापयतीति**। अनर्थकानामप्यधिपर्यादीनामर्थवतः शब्दस्य यत्कार्यं भवति तद्भवतीति ज्ञाप्यते। अर्थवतः क्रियायोगनिमित्तके गत्युपसर्गसंज्ञे भवतः। ते अनर्थकयोरधिपर्योरपि भवेतामिति तद्वारणार्थं कर्मप्रवचनीयसंज्ञाविधानम्। ज्ञापनफलं तु 'निपातस्यानर्थकस्यापि प्रातिपदिकसंज्ञा वक्तव्या' इति अर्थवत्सूत्रे प्रोक्तं वचनमनावश्यकमिति।

वस्तुतस्तु अधिपरी अपि नानर्थकौ। 'सर्वेऽप्युपसर्गा धात्वर्थद्योतकाः' इति हि मतम्। तत्र धात्वर्थक्रियागतविशेषद्योतकत्वमन्येषामुपसर्गाणाम्। अधिपरी तु धातुवाच्यां क्रियां द्योतयतः न तु तद्गतं विशेषम्। एतदभिप्रायेणैव 'अनर्थका' विति सूत्रे उक्तम्। तथा च क्रियाद्योतकत्वमेव क्रियायोगः। तस्य चाधिपर्योरपि सद्भावात् प्राप्तां गतिसंज्ञामुपसर्गसंज्ञां च बाधितुमनेन कर्मप्रवचनीयसंज्ञाविधानमिति न सूत्रवैयर्थ्यम्। अत एव च नोक्तवचनज्ञापकत्वमपीत्याशयेनाह **—यद्वा अर्थान्तराभावादिति**। धातुवाच्यक्रियाव्यतिरिक्तस्य तद्गतविशेषरूपस्य द्योत्यार्थस्याभावादित्यर्थः। **आहतुरिति**। द्योतयत इत्यर्थः।

ननु धातूक्तमेवार्थं यद्यधिपरी आहतुस्तर्हि तयोः प्रयोगो व्यर्थः, उक्तार्थानामप्रयोग इति न्यायादित्यत आह—**उक्तार्थानामपीति**। अत एवोक्तार्थानामपि प्रयोगोऽस्तीति ज्ञाप्यत इति भावः। यथा ब्राह्मणौ द्वावानयेत्यत्र द्विवचनेनैव द्वित्वेऽवगते स्फुटतरप्रतिपत्त्यर्थं पुनः प्रयोगस्तद्वत् पुनः प्रयोगो न विरुध्यत इति 'अधिपरी अनर्थकौ' इति सूत्रं ज्ञापयतीति यावत्।

[ज्ञा.] 'लः परस्मैपदम्' (सू. १-४-९९)॥ सिचि वृद्धौ परस्मैपदग्रहणं ज्ञापकं पुरुषसंज्ञा परस्मैपदसंज्ञां न बाधत इति।

[वि.] ननु 'लः परस्मैपदम्' इत्यत्र परस्मैपदग्रहणं न कर्तव्यम्। किं तु 'लस्य' (सू. ३-४-७७) इत्यत्रैव प्रकरणे परस्मैपदग्रहणं कर्तव्यम्। इह प्रथमाध्याये परस्मैपदसंज्ञावचने एकसंज्ञाधिकारात् तिप्तस्झिप्रभृतीनां पुरुषसंज्ञाया अपि विधानात् परभूता सा परस्मैपदसंज्ञां बाधेत। परस्मैपदसंज्ञाविधानं तु शतृक्वस्वोः सावकाशमित्याशङ्क्याह—**सिचि वृद्धाविति**। यदि हि पुरुषसंज्ञया परस्मैपदसंज्ञायास्तिबादिषु बाधः स्यात्तदा 'सिचि वृद्धिः परस्मैपदेषु' (सू. ७-२-१) इति सूत्रे परस्मैपदशब्देन तिबादीनां निर्देशोऽसंगतः स्यात्। अतः पुरुषसंज्ञया परस्मैपदसंज्ञा न बाध्यत इति ज्ञाप्यत इति भावः।

[ज्ञा.] विभक्तिश्च (सू.१-४-१०४)॥ त्रीणि त्रीणीत्यनुवृत्तौ 'अष्टन आ' (सू. ७-२-८४) इत्यादिवचनाद् भवति। तन्निवृत्तौ 'तस्माच्छसो नः पुंसि' (सू. ५-१-१०३) इति नत्वविधानात्, औजसोरिति वक्तव्ये प्रथमयोरित्युक्त्या च पूर्वसवर्णदीर्घविधौ त्रिकग्रहणमिति ज्ञाप्यते।

[वि.] ननु 'विभक्तिश्च' (सू. १-४-१०४) इति सूत्रे 'तिङस्त्रीणि त्रीणि' (सू. १-४-१००) इति सूत्रात् त्रीणि त्रीणि इत्यनुवर्तते न वा?

यद्यनुवर्तते तदा त्रिकस्यैव विभक्तिसंज्ञा भवति नैकस्येति लभ्यते। तथा सति अष्टन्शब्दस्य जसादौ एकैकस्मिन् परतः आत्वं न स्यात्। 'अष्टन आ विभक्तौ' (सू. ७-२-८४) इति सूत्रेण हि विभक्तौ परत आत्वं विधीयते। न ह्यष्टन् शब्दात्परं युगपत्त्रिकमस्तीति दोषः। यदि त्रीणि त्रीणीति नानुवर्तते तदा स्वादीनां प्रत्येकं विभक्तिसंज्ञकत्वं लभ्यत इत्येकैकस्मिन् परतोऽप्यात्वमष्टनः सिध्यति। तथापि 'प्रथमयोः पूर्वसवर्णः' (सू. ६-१-१०२) इत्यत्र प्रथमयोर्विभक्त्योरित्यनेन समुदायस्याग्रहणात् विभक्तिसंज्ञकयोः प्रथमयोः सु औ इत्यनयोरेव अचीत्यनुवृत्त्या औजसोरेव वा परतः पूर्वसवर्णदीर्घो भवेत् जसादौ परतो न भवेत् इति पक्षद्वयेऽपि दोषमाशङ्क्य समाधत्ते—**त्रीणि त्रीणीत्यनुवृत्ताविति**। अनुवृत्तिपक्षे त्रिकात्मकसमुदायस्यैव विभक्तिसंज्ञकत्वेऽपि त्रिकस्य युगपत्प्रयोगाभावात् आत्ववचनसामर्थ्यात् विभक्तिशब्दो विभक्त्यवयवे वर्तत इति विभक्त्यवयवे परत आत्वविधानात् एकैकस्मिन् परतोऽप्यात्वं सिध्यतीति न दोषः। **भवतीति**। अष्टन आत्वमिति शेषः।

त्रीणि त्रीणीति नानुवर्तत इति पक्षे प्रत्येकं विभक्तिसंज्ञायामपि 'प्रथमयोः पूर्वसवर्णः' इति सूत्रे प्रथमयोस्त्रिकयोरेव ग्रहणं न प्रत्यययोरिति प्रतिपादयति—**तन्निवृत्ताविति**। त्रीणि त्रीणीत्यस्याननुवृत्तावित्यर्थः। 'तस्माच्छसो नः पुंसि' इति सूत्रं हि तच्छब्देन पूर्वसवर्णदीर्घं परामृश्य ततः परस्य शसवयवस्य सकारस्य नत्वं विधत्ते। तत्र तस्मादित्यस्यानुपादाने एतान् गाः पश्येत्यत्र गो + शस् इति स्थिते 'औतोऽम्शसोः' (सू. ६-१-९३) इति सूत्रेण ओकार - अकारयोः आकारे एकादेशे गास् इत्यवस्थायां सकारस्यापि नत्वं स्यादिति तद्वारणार्थं तस्मादित्युच्यते। गास् इत्यत्रत्य आकारः न पूर्वसवर्णदीर्घ इति पूर्वसवर्णदीर्घात्परत्वं सकारस्य नास्तीति न नत्वम्। यदि च 'प्रथमयोः पूर्वसवर्णः' इत्यनेन प्रथमयोः प्रत्यययोः औजसोरेव पूर्वसवर्णदीर्घो विधीयेत तदा शसि पूर्वसवर्णदीर्घाप्रसक्त्या शसः सकारः पूर्वसवर्णदीर्घात्परो न भविष्यतीति किं तस्मादित्यनेन।

तत्क्रियमाणं प्रथमयोरित्यनेन त्रिकद्वयमेव गृह्यत इति ज्ञापयति। अतः अम्शसोरपि पूर्वसवर्णदीर्घसिद्ध्या न कोऽपि दोषः। अथवा औजसोरेव पूर्वसवर्णदीर्घस्येष्टत्वे 'औजसोः पूर्वसवर्ण' इत्येव सूत्रं कुर्यात्। तथा अकरणाच्च प्रथमयोश्शिकयोरेव ग्रहणमिति ज्ञापयतीति भावः। **इत्युक्त्या चेत्यत्र** चकारेण नत्वविधानं समुच्चीयते॥

इति प्रथमोऽध्यायः।

॥ अथ द्वितीयोऽध्यायः ॥

[ज्ञा.] पारेमध्ये षष्ठ्या वा (२-१-१८) ॥ वेत्येतत् ज्ञापयति समासतद्धितानां वृत्तिर्विभाषा (वृद्धि) [वृत्ति] विषये नित्योऽपवाद इति। कृते त्वस्मिन्नेकया वृत्तिर्विभाषा अपरया वृत्तिविषयेऽनित्योऽपवाद इति।

[वि.] ननु 'पारेमध्ये षष्ठ्या वा' इति सूत्रे वाग्रहणमनर्थकम्। न च विकल्पेन समासविधानार्थं तत्, तेन समासाभावपक्षे पारं गङ्गाया इति वाक्यस्यापि साधुत्वं लभ्यत इति वाच्यम्। महाविभाषाधिकारादेव विकल्पसिद्धेः। न च महाविभाषया एतत्समासाभावपक्षे वाक्यस्य साधुत्वलाभेऽपि 'षष्ठी' इति सूत्रविहितषष्ठीतत्पुरुषस्य साधुत्वं न लभ्यत इति गङ्गापारमिति समाससाधुता न स्यादिति षष्ठीसमाससाधुत्वबोधनार्थं वाग्रहणमिति वाच्यम्। षष्ठीसमाससूत्रे 'पारेमध्ये' इति सूत्रे चोभयत्र महाविभाषानुवृत्त्या षष्ठीसमासापवादस्यापि 'पारे मध्ये' इत्यव्ययीभावसमासस्य महाविभाषाधिकारात् विकल्पेन बाधकत्वमिति एतदभावपक्षे षष्ठीसमासः, तस्यापि वैकल्पिकत्वात् तदभावपक्षे वाक्यस्यापि साधुत्वमितीष्टसिद्धेः। अतो वाग्रहणं व्यर्थमित्याशङ्क्य वचनविशेषज्ञापकतया सार्थक्यमाह—**वेत्येतदिति**। पूर्वोक्तरीत्या व्यर्थं सत् वाग्रहणं एवं ज्ञापयति यत् समासवृत्तिर्महाविभाषया विकल्पेन भवति। तत्र यदि कश्चिदपवादो भवति स उत्सर्गसमासस्य नित्यमेवापवादः भवतीति। तेनापवादसूत्रे महाविभाषानुवृत्तावपि पक्षे वाक्यस्य साधुत्वमेवानुमन्यते, न तु उत्सर्गसमासस्य। तथा च प्रकृतेऽपि वाग्रहणाभावे महाविभाषानुवृत्तावपि षष्ठीसमासापवादभूतस्य एतस्याभावपक्षे वाक्यसाधुत्वमेव लभ्येत, न तु षष्ठीसमासस्य। तदर्थं वाग्रहणम्। सति च तस्मिन् महाविभाषया वाक्यसाधुत्वं, वाग्रहणेन उत्सर्गोऽपि पक्षेऽभ्यनुज्ञायते इति वाक्यस्य षष्ठीसमासस्य अव्ययीभावस्येति त्रयाणामपि साधुत्वं सिध्यति।

इत्थं च महाविभाषाधिकारमध्यपतितेऽपवादसूत्रे वाग्रहणं नास्ति चेत् तत् उत्सर्गस्य नित्यं बाधकत्वात् उत्सर्गशास्त्रं नानुमन्यत इति निर्णयो लभ्यत इत्यवधेयम्। अत्र षष्ठीसमासापवादभूतः एकदेशिसमासः वैकल्पिकोऽपि पक्षे वाक्यसाधुत्वमनुमन्यमानः न षष्ठीसमासमनुमन्यत इति च ज्ञापनफलमवसेयम्। **कृते त्वस्मिन्निति।** वाग्रहणे कृत इत्यर्थः। तथा च विभाषा वा इति विकल्पवाचकपदद्वयसद्भावात् तत्रैकेन समासः विकल्पेन विधीयते। तेन वाक्यमपि पक्षे साधु इति लभ्यते। अपरेण च अपवादः विकल्पेनोच्यते। तेनोत्सर्गोऽपि भवतीति लभ्यत इत्यर्थः।

[ज्ञा.] चतुर्थी तदर्थार्थ (सू. २-१-३६)। 'चतुर्थी तदर्थे' (सू. ६-२-४३) इति पूर्वपदप्रकृतिस्वरः प्रकृतिविकृतिभाव एव, 'अर्थे' (सू. ६-२-४४) 'क्ते च' (सू. ६-२-४५) इत्यर्थग्रहणाच्च ज्ञापकात्। तथा हितसुखग्रहणात् तादार्थ्यचतुर्थ्या एव तदर्थेति समास इति।

[वि.] ननु 'चतुर्थी तदर्थ' (सू. २-१-३६) इति सूत्रेण तादर्थ्ये विकृतिवाचकचतुर्थ्यन्तस्य प्रकृतिवाचकेन सुबन्तेन समासो विधीयत इति वक्तव्यम्। अन्यथा रन्धनाय स्थाली इत्यादावपि तादर्थ्यसमासापत्तेः। एवं च अश्वघासादयः न सिध्यन्ति अश्वघासयोः प्रकृतिविकृतिभावाभावात्। न चाश्वस्य घासः अश्वघास इत्येवं तादर्थ्यात्मकसंबन्धवाचिषष्ठ्यन्तघटितसमासरूपता अश्वघासादीनां भविष्यतीति तत्र चतुर्थीसमासाभावेऽपि न क्षतिरिति वाच्यम्। चतुर्थीसमासपक्षे 'चतुर्थी तदर्थे' (सू. ६-२-४३) इति सूत्रेण पूर्वपदप्रकृतिस्वरः, षष्ठीसमासपक्षे 'समासस्य' (सू. ६-१-२२३) इति सूत्रेण समासान्तोदात्तस्वर इति स्वरे भेदात् चतुर्थीसमासकार्यं षष्ठीसमासेन सिध्यति इति वक्तुं अशक्यत्वात् इत्याशङ्क्य, पूर्वपदप्रकृतिस्वरोऽपि प्रकृतिविकृतिभावस्थल एव प्रवर्त्तते। तथा चाश्वाय घास इति समासपक्षेऽपि समासान्तोदात्त एव भवतीति स्वरे

भेदाभावात् अश्वघासादीनां षष्ठीसमासत्वेनैव साधुत्वमिति समाधानं मनसिकृत्य 'चतुर्थी तदर्थे' (सू. ६-२-४३) इति सूत्रेण विधीयमानः पूर्वपदप्रकृतिस्वरोऽपि प्रकृतिविकृतिभावस्थल एवेत्यत्र ज्ञापकमाह—**'चतुर्थी तदर्थे'** इत्यादिना। अयमाशयः- यदि 'चतुर्थी तदर्थे' इति सूत्रेण विधीयमानः पूर्वपदप्रकृतिस्वरः प्रकृतिविकृतिभावविरहस्थलेऽपि स्यात् तदा 'अर्थे' (सू. ६-२-४४) 'क्ते च' (सू. ६-२-४५) इति सूत्रद्वयं व्यर्थम्। देवतार्थम् इत्यादौ चतुर्थ्यन्तस्य देवतादि-पदस्य अर्थशब्दे परे पूर्वपदप्रकृतिस्वरः 'अर्थे' इति सूत्रेण विधीयते। गोहितम् इत्यादौ क्तान्ते परे पूर्वपदस्य चतुर्थ्यन्तस्य प्रकृतिस्वरः 'क्ते च' इति सूत्रेण विधीयते। तत्रोभयत्रापि 'चतुर्थी तदर्थे' इति सूत्रेणैव पूर्वपदप्रकृतिस्वरे सिद्धे पुनर्विधानं न कर्तव्यम्। कृतं च तत् 'चतुर्थी तदर्थे' इति सूत्रविहितः स्वरः प्रकृतिविकृतिभावे एवेति ज्ञापयति। ततश्च देवतार्थम् गोहितम् इत्यादौ प्रकृतिविकारभावाभावात् स्वराप्राप्तौ तत्प्राप्तये 'अर्थे' 'क्ते च' इति सूत्रद्वयम्। तथा च अश्वघासादीनां षष्ठीसमासत्वेनापि स्वरादिकं सिध्यतीति प्रघट्टकार्थः।

'अर्थेन नित्यसमासो वक्तव्य' इति वार्तिकप्रत्याख्यानार्थं महाभाष्ये योगविभागः कृतः। 'चतुर्थी' इत्येकं सूत्रम्। 'तदर्थार्थ' इत्यपरं सूत्रम्। तत्र 'चतुर्थी' इति सूत्रस्य चतुर्थ्यन्तं सुबन्तेन सह समस्यत इत्यर्थः। 'तदर्थार्थ' इत्यस्य च तदर्थस्योत्तरपदस्य 'अर्थ' शब्द आदेशो भवति इत्यर्थः। ततश्च ब्राह्मणाय पयः इति समासे कृते पयःशब्दस्य स्थाने अर्थशब्दादेशो भवति। ब्राह्मणार्थमिति च रूपम्। ब्राह्मणार्थं पय इति पुनः पयःशब्दप्रयोगस्तु अर्थशब्दः पयःशब्दस्यादेश इति स्फोरणार्थम् इति फलति। यद्येवं योगविभागः क्रियते तर्हि छात्राय रुचितमित्यत्रापि रुचितशब्दस्य अर्थशब्दादेशः स्यात् इत्याशङ्कायां भाष्यकारैरुक्तम्—

> 'आचार्यप्रवृत्तिर्ज्ञापयति—'तादर्थ्ये या चतुर्थी सा समस्यते, न चतुर्थीमात्रम्' इति। यदयं हितसुखग्रहणं करोति' इति।

योगविभागपक्षेऽपि 'चतुर्थी' इति सूत्रेण तादर्थ्ये या चतुर्थी तस्या एव समासः। न चतुर्थीसामान्यस्य। अन्यथा गोभ्यो हितं गोहितमित्यत्रापि चतुर्थीत्यनेनैव समासे सिद्धे तत्र समाससिद्धिफलकस्य हितसुखग्रहणस्य वैयर्थ्यापत्तेः। तथा च छात्राय रुचितमित्यत्र या चतुर्थी न सा तादर्थ्ये। अतस्तत्र समासस्यैवाभावात् 'तदर्थार्थ' इत्यनेन समासावयवोत्तरपदस्य विधीयमानः अर्थ इत्यादेशोऽपि न भवतीति भाष्याभिप्रायः।

तमिमं संदर्भं मनसिकृत्याह—**तथा हितेति।**

[ज्ञा.] तद्धितार्थो (सू. २-१-५१) ॥ समासेनोक्तेऽपि तद्धितार्थे तद्धितो भवति। 'द्विगोर्लुगनपत्ये' (सू. ४-१-८८) इति द्विगोरुत्तरतद्धितस्य लुग्विधानात् ज्ञापकात्।

[वि.] ननु 'तद्धितार्थोत्तरपदसमाहारे च' इति सूत्रेण तद्धितार्थे दिक्-संख्ययोः सुबन्तेन सह समासः उच्यते। तस्य चायमर्थः पर्यवस्यति—तद्धितस्य योऽर्थस्तस्मिन् वाच्ये समासो भवतीति। एवं चेत् समासेनैव तद्धितार्थस्योक्तत्वात् प्रकृत्यर्थव्यतिरिक्तप्रत्ययार्थाभावात् पाञ्चनापितिरित्यादौ तद्धितो न प्राप्नोतीत्याशङ्क्याह—**समासेनोक्तेऽपीति।** 'द्विगोर्लुगनपत्ये' इति सूत्रेण द्विगुसमासादुत्तरस्य अनपत्यार्थकस्य तद्धितस्य लुग्विधीयते। यथा पञ्चसु कपालेषु संस्कृतः पुरोडाश इत्यत्र 'संस्कृतः पुरोडाशः' इत्यर्थे 'संस्कृतं भक्षाः' (सू. ४-२-१६) इति सूत्रेण अणो विधानात् अणः अर्थे पञ्चन् सु कपाल सु अनयोः समासे 'तद्धितार्थ' इति सूत्रेण कृते ततः अणि तस्य 'द्विगोर्लुगनपत्ये' (सू. ४-१-८८) इत्यनेन लुकि पञ्चकपालः इति भवति। अत्र तद्धितार्थे द्विगुसमासविधानात् समासेनोक्तेऽर्थे तद्धितस्याणः अनुत्पत्त्या लुग्विधानमनर्थकम्। अणः उत्पत्तौ हि तस्य लुग्विधानम् अर्थवत्। ततश्च लुग्विधानं ज्ञापयति समासेनोक्तेऽपि तद्धितार्थे तद्धितो भवति इति। ततश्च जातस्य तद्धितस्य लुग्विधायकतया सूत्रं सार्थकम्। तेन पाञ्चनापितिरित्यादौ समासेनोक्तेऽप्यपत्यार्थे तद्धितसिद्धिर्निष्प्रत्यूहेत्याशयः।

वस्तुतस्तद्धितार्थे वाच्ये इत्यस्य स्थाने तद्धितार्थे विषये इति व्याख्याने नायं दोषः प्राप्नोति । तथापि लुग्विधानमेव तद्धितार्थे विषये इति विवक्षितमिति ज्ञापयतीति भावः । तदुक्तमुद्योते—

'एवं तद्धितार्थे विषयभूत इत्यर्थेन च सिध्यति । वस्तुतो ज्ञापकेनायमेवार्थो बोध्यत इति बोध्यम् ॥'

इति (उद्योतः ; २-१-५१)

[ज्ञा.] उपमितं व्याघ्रा (सू. २-१-५६) ॥ सामान्यप्रयोगे सापेक्षत्वादसामर्थ्येन वृत्तेरप्राप्तेः स निषेधो ज्ञापयति - भवति प्रधानस्य सापेक्षस्यापि वृत्तिरिति ।

[वि.] ननु 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' (सू. २-१-५६) इति सूत्रे सामान्याप्रयोगे इति व्यर्थम् । न च पुरुषो व्याघ्र इव शूर इत्यत्र सामान्यधर्मवाचिशूरादिशब्दप्रयोगे समासवारणार्थं तदिति वाच्यम् । समस्यमानपुरुषशब्दस्य समासाघटकशूरपदसापेक्षत्वेन समासाघटकपदनिरपेक्षत्वरूपस्य सामर्थ्यस्याभावादेवात्र समासस्य वारयितुं शक्यत्वादित्याशङ्क्य ज्ञापकतया तत्सार्थक्यमाह—**सामान्यप्रयोग** इत्यादिना । समस्यमानयोः पदयोर्मध्ये विशेष्यवाचिपदस्य समासाघटकपदसापेक्षत्वेऽपि समासो भवतीति ज्ञाप्यते । तथा च पुरुषो व्याघ्र इव शूर इत्यत्र विशेष्यसमर्पकस्य पुरुषपदस्य शूरपदसापेक्षत्वेऽपि समासप्राप्तौ तन्निवृत्त्यर्थं सामान्याप्रयोग इति वचनम् । सामान्यवाचिशूरपदप्रयोगान्न तत्र समासः इति भावः । एवं ज्ञापनस्य प्रयोजनं तु राजपुरुषोऽभिरूप इत्यादौ विशेष्यवाचिपुरुषपदस्य समासाघटकाभिरूपादिपदसापेक्षत्वेऽपि समाससिद्धिरिति । **वृत्तिरिति** । समास इत्यर्थः । भाष्ये—

'भवति वै प्रधानस्य सापेक्षस्यापि समासः' इत्येव वचनशरीरस्यापि दर्शनात् ।

[ज्ञा.] युवा खलति (सू. २-१-६७) ॥ इदं ज्ञापयति प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति ।

[वि.] परिभाषेयं व्याख्याता परिभाषेन्दुशेखर इत्युदास्महे ।

[ज्ञा.] द्वितीयतृतीय (सू. २-२-३) ॥ महाविभाषायां प्रकृतायामन्यतरस्यांग्रहणं ज्ञापकं यत्रोत्सर्गापवादं महाविभाषया विकल्प्यते तत्रापवादेन मुक्त उत्सर्गो न भवतीति ।

[वि.] वचनमेतत् पूर्वं 'पारेमध्ये षष्ठ्या वा' इति सूत्रस्थवाग्रहणेन ज्ञापिततयोपात्तं व्याख्यातप्रायम् । प्रयोजनं तु पक्षे षष्ठीसमासोऽपीति भिक्षाद्वितीयमित्यादेः साधुत्वसिद्धिरिति ।

[ज्ञा.] उपपदम् (सू. २-२-१९) ॥ अतिङिति प्रतिषेधो ज्ञापयति अनयोर्योगयोर्निवृत्तं 'सुप्सुपा' (सू. २-१-४) इति । तेन गतिकारकोपपदानामिति सिद्धम् ।

[वि.] परिभाषेयमिति न व्याख्यायते ।

[ज्ञा.] अनेकमन्यपदार्थे (सू. २-२-२४) ॥ अर्थग्रहणसामर्थ्यात् पदार्थः कृत्स्नः सद्रव्यः सलिङ्गः ससंख्यश्च गृह्यते ।

[वि.] 'अनेकमन्यपदार्थे' (सू. २-२-२४) इति सूत्रे बहुव्रीहिणा यद्यन्यपदार्थोऽभिधीयते तदा चित्रगुर्देवदत्त इति बहुव्रीह्यनन्तरं देवदत्तस्यानुप्रयोगो नोपपद्यते, बहुव्रीहिणैव अन्यपदार्थस्य देवदत्तस्याप्यभिहितत्वात् इत्याशङ्क्य, चित्रगुशब्देन चित्रगोमत्त्वेन सामान्येन देवदत्ताभिधानेऽपि देवदत्तत्वेन विशेषरूपेणानभिधानात् देवदत्तशब्दानुप्रयोग उपपद्यत इति समाधानमुक्त्वा, अथवा विभक्त्यर्थोऽभिधीयते इति पक्षान्तरमुक्तं भाष्ये । पदेन प्रकृत्यर्थविशेषणकः प्रत्ययार्थोऽभिधीयत इति विभक्त्यर्थस्यैव प्राधान्यात् अन्यपदार्थग्रहणेन

ग्रहणम्। तथा च बहुव्रीहिसमासेन विभक्त्यर्थः संबन्धादिरभिधीयते। अतः उक्तार्थत्वात्समासेन, विभक्तेरनुप्रयोगो मास्तु। समासानभिहितद्रव्यवाचिदेवदत्तादि-शब्दानुप्रयोगे न कापि क्षतिरिति तस्य भाष्यस्य आशयः।

तदनन्तरं समासेन विभक्त्यर्थाभिधाने द्रव्याभिधानं न सिध्यति। चित्रगुशब्देन हि चित्रगोसंबन्ध इव तद्वद्द्रव्यमप्यभिधीयते इति शङ्कायां भाष्य एवं समाधानमुक्तम्—'अर्थग्रहणसामर्थ्यात्' इति। अस्मिन् सूत्रे अनेकमन्यपदे इत्यनेनापि पदे वाच्ये समासासंभवात् समासवचनबलात् पदार्थे समास इति लभ्यत एव। सति चैवं यत् अन्यपदस्य अर्थे इत्युक्तं तज्ज्ञापयति आचार्यः यत् विभक्त्यर्थः आश्रयसहित एव समासेन बुध्यत इति। तदेतदाह—**अर्थग्रहण-सामर्थ्यादिति**। कृत्स्न इत्यस्यैव विवरणं **सद्रव्य** इत्यादि।

[ज्ञा.] अदो जग्धिः (सू. २-४-३६)॥ ल्यब्ग्रहणं ज्ञापयति अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधत इति।

[वि.] परिभाषेयम्। अतोऽत्र न व्याख्यायते।

इति द्वितीयोऽध्यायः।

॥ अथ तृतीयोध्यायः ॥

[ज्ञा.] आद्युदात्तश्च (सू. ३-१-३) ॥ 'यासुट् परस्मैपदेष्वपिच्च लिङ्' इति न्यासेन सिद्धे 'यासुट् परस्मैपदेषूदात्तो ङिच्च'(३-४-१०३)इति आगमा अनुदात्ता इति ज्ञापयति। इदमेव आगमा अविद्यमानवदित्यर्थस्यापि ज्ञापकमित्युक्तम्। इदं द्वयमप्येकदेश्युक्तिः।

[वि.] ननु 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रे उदात्तग्रहणं किमर्थम्? प्रत्ययस्वरेणैव प्रत्ययभक्तस्य यासुटोऽप्युदात्तत्वसिद्धेः। न च लिङादेशानां पितां तिप्सिप्मिपां 'अनुदात्तौ सुप्पितौ' (सू. ३-१-४) इति सूत्रेणानुदात्तत्वात् तद्भक्तस्य यासुटोऽपि अनुदात्तत्वे प्राप्ते तद्बाधनार्थमुदात्तवचनमिति वाच्यम्। तथा सति 'यासुट् परस्मैपदेष्वपिच्च लिङ्' इत्येव सूत्रयेत् तत्र अपिच्च लिङ् इत्यनेन लिङादेशानां सर्वेषामपित्त्वातिदेशेन पित्त्वप्रयुक्तानुदात्तत्वासिद्धेः प्रत्ययस्वरेणोदात्तत्वस्यैव प्राप्तेः उदात्तग्रहणवैयर्थ्यात् इत्याशङ्क्य, 'आगमा अनुदात्ताः' इति वचनज्ञापकतया सार्थक्यमाह—**यासुडिति**। तथा चागमानामनुदात्तत्वात् यासुटोऽप्यनुदात्तत्वं मा प्रसाङ्क्षीदिति उदात्तवचनं कृतमिति भावः। **इदमेवेत्यादि**। **ज्ञापकमुक्तमिति**। 'आद्युदात्तश्च' (सू. ३-१-३) इति सूत्रे इति शेषः। यासुड्विशिष्टस्यैव प्रत्ययत्वेन प्रत्ययाद्युदात्तस्वरेणैव यासुट उदात्तत्वे सिद्धे यासुट उदात्तवचनं आगमा अविद्यमानवदित्यर्थज्ञापकम्। सति चाविद्यमानत्वे तद्रहितप्रत्ययस्यैवाद्युदात्तत्वे शेषनिघातेनागमानामनुदात्तत्वं सिद्धमिति तत्र प्रतिपादितम्। तथा च शेषनिघातप्राप्तानुदात्तत्वव्यावृत्तये उदात्तग्रहणं चरितार्थमिति तदाशयः।

ननु यासुटः परस्मैपदनिमित्तकत्वात् लादेशोत्तरं प्रवृत्त्या पूर्वमेवान्तरङ्गत्वात्परत्वाद्वा प्रत्ययाद्युदात्तत्वे ततः यासुडस्वरको वा स्यात् शेषनिघातेनानुदात्तो वेति उदात्तसिद्ध्यर्थं क्रियमाणमुदात्तवचनं चरितार्थं कथं ज्ञापकमिति आशङ्क्य अत एवेयमेकदेश्युक्तिरित्याह—**इदं द्वयमपीति**।

[ज्ञा.] सुप आत्मनः क्यच् (सू. ३-१-८) ॥ 'अश्वाघस्यात्' (सू. ७-४-३७) इति क्यचि ईत्वबाधनार्थाकारविधानात् ज्ञापकात् अघशब्दाच्छन्दसि परेच्छायां क्यजिति।

[वि.] ननु 'सुप आत्मनः क्यच्' इति सूत्रे आत्मनः इत्येतत् सुप इत्यत्रान्वेति। ततश्च आत्मसंबन्ध्यर्थबोधकं यत् सुबन्तं ततः इच्छायामर्थे क्यच्प्रत्ययो भवतीति सूत्रार्थो लभ्यते। एवं सति छन्दसि 'मा त्वा वृका अघायवः' इत्यत्र अघमिच्छन्त इत्यर्थे अघशब्दात् क्यच् न स्यात् वृका हि न आत्मसंबन्धि अघमिच्छन्ति किन्तु परस्याघम्। तथा च अघशब्दस्य एषितृ-वृकसंबन्ध्यघबोधकत्वाभावात् कथं ततः क्यजित्याशङ्क्याह—**अश्वाघस्यादितीति**। छन्दसि परं परसंबन्धिविषयकेच्छायामपि क्यच् भवति। तत्र ज्ञापकं तु 'अश्वाघस्यात्' इति सूत्रम्। तस्य च सूत्रस्य अश्व अघ इत्येतयोः क्यचि परतः आकारादेशो भवतीत्यर्थः। तत्राघशब्दात् परेच्छायामेव क्यच् संभवति। यतो लोके न कोऽप्यात्मनः अघमिच्छेत्। किं तु परस्यैवाघमिच्छति। एवं च क्यचि परतः अघशब्दस्य आकारं विदधत् पाणिनिः अघशब्दात् क्यचमनुमन्यते। अतो ज्ञापकात् अघशब्दात् छन्दसि परस्याघमिच्छतीत्यर्थेऽपि क्यच् भवतीति सिध्यतीति भावः।

[ज्ञा.] 'नमोवरिवः' (सू. ३-१-१९) ॥ क्यजाद्यन्ताः क्रियावचनाः। 'सनाद्यन्ताः' (सू. ३-१-३२) इति धातुसंज्ञाविधानात् ज्ञापकात्। तत्प्रयोजनं च तत्कार्यतव्यदादयः। साधने च तव्यदादयः। क्रियाया एव च साधनम्। भावोऽपि क्रियैवेति। परसाधने तु नैषामुत्पत्तिः। साधन इति ससंबन्धिकत्वात्। यस्य धातोर्यत् साधनं तत्र तद्धातोरेव प्रत्ययोत्पत्तेः।

[वि.] 'नमोवरिवश्चित्रङः क्यच्' इति सूत्रे 'क्यजादिषु प्रत्ययार्थनिर्देशः' इति वार्तिककारेणोक्तम्। तस्य चायमर्थः—नमस्शब्दात् पूजायामर्थे क्यच्, वरिवस्शब्दात् सपर्यायामर्थे क्यच्, चित्रङः आश्चर्येऽर्थे क्यच् भवतीत्येवं क्यच्प्रत्ययस्यार्थोऽपि निर्देष्टव्यः। अन्यथा क्यजन्तस्य क्रियावाचकत्वं न भवेत् इति। इदं च वार्तिकं प्रत्याचिख्यासुना भाष्यकृता ज्ञापकेन क्यजाद्यन्तस्य क्रियावाचकत्वं समर्थितम्। तदाह—**क्यजाद्यन्ताः** इति। आदिशब्देन णिङ्परिग्रहः। 'सनाद्यन्ता धातवः' (सू. ३-१-३२) इति सूत्रेण क्यजाद्यन्तस्य धातुसंज्ञा विधीयते। तत्प्रयोजनं च धातोरित्यधिकृत्य विहितानां तव्यदादीनां सिद्धिः। कर्मादिरूपे साधने च तव्यदादयो विधीयन्ते। साधनं च क्रियायाः। तद्यदि क्यजाद्यन्तस्य क्रियावाचकत्वं न स्यात् तद्वाच्यक्रियाया अभावात् क्रियासाधने विधीयमानाः तव्यदादयः क्यजाद्यन्तेभ्यो न भवेयुः। ततश्च तव्यदादिफलकधातुसंज्ञाविधानमनर्थकं स्यात्। यतो धातुसंज्ञा उक्ता अतः क्रियावाचकत्वं क्यजाद्यन्तस्य ज्ञायत इति भावः।

ननु साधने तव्यदादय इति कथम्। 'तयोरेव कृत्यक्तखलर्थाः' (सू. ३-४-७०) इति सूत्रेण भावेऽपि तव्यदादीनां विधानात् इत्याशङ्क्य, अस्त्वेवम्। तथापि भावशब्दस्य यदुत्तरं तव्यादयो भवन्ति तद्वाच्यक्रियापरत्वात् क्यजाद्यन्तस्य क्रियावाचकत्वाभावे तदुत्तरं भावेऽपि तव्यदादिर्दुर्लभ इति भावे तव्यदादिविधानं तत्फलकधातुसंज्ञाविधानं च गमयत्येव क्यजाद्यन्तस्य क्रियावाचकतामिति समाधानमाह—**भावोऽपि क्रियैवेति**।

ननु क्यजाद्यन्तानां क्रियावाचकत्वाभावेऽपि स्वार्थिकत्वेन द्रव्यवाचित्वेऽपि च शब्दान्तरवाच्यक्रियाकारके तव्यदादीनाम् उत्पत्तिः धातुसंज्ञायाः फलम्, यथा द्रव्यवाचिवृक्षशब्दात् दृशिक्रियाकर्मत्वविवक्षया वृक्षं पश्येत्यादौ द्वितीया इत्याशङ्क्याह—**परसाधने त्विति**। साधनशब्दस्य ससंबन्धिकत्वात् कस्य साधने तव्यदादय इत्याकाङ्क्षायां यस्य धात्वोरर्थस्य यत् साधनं तस्माद्धातोः

प्रत्यय इत्येव लभ्यते। यथा मातरि वर्तितव्यमित्युक्ते कस्य मातरि इति शङ्कायां स्वस्यां मातरि इति लभ्यते तद्वत्। तथा च द्वितीयादीनां प्रातिपदिकाद्विधानात् प्रातिपदिकस्य च द्रव्यवाचकत्वात् वचनप्रामाण्यात् परसाधने उत्पत्तिर्भवति। तव्यदादयस्तु क्रियावाचिषु धात्वन्तरेषु स्वसाधने सावकाशाः क्यजाद्यन्तेभ्यः परसाधने नोत्पद्यन्ते। एवं च स्वसाधने तव्यदादिफलकं धातुसंज्ञाविधानमेवैषां क्यजाद्यन्तानां क्रियावाचकत्वे मानमिति भावः।

[ज्ञा.] मुण्डमिश्र (सू. ३-१-२१) ॥ हलिकल्योरत्वविधानात् ज्ञापकात् वृद्धौ कृतायां लोपः।

[वि.] ननु 'मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्' (सू. ३-१-२१) इति सूत्रेण मुण्डादिभ्यः करोतीत्यर्थे णिच्प्रत्ययो विधीयते। तत्र च हल, कल इति द्वौ शब्दौ पठितौ। हलि, कलि अनयोरिकारान्तयोः णिचि परतः अत्वं निपात्यत इति तेन प्रतीयते। हलिं गृह्णाति हलयति कलिं गृह्णाति कलयति इति चोदाहृतम्। अत्र हलि कलि इति इकारान्ताभ्यामेव णिच् इत्येवास्तु। किमर्थं कृतात्वाभ्यां हलिकलिभ्यां णिच् इति व्याख्यायते। न च सन्वद्भावनिषेधार्थं तथा व्याख्यायते, तथा हि—हलि कलि आभ्यां णिचि लुङि चङि अचकलत् अजहलत् इति रूपे इष्येते। ते च निपातितात्वात् णिचि सत्येव घटेते। अ हल इ अत् इत्यत्र 'णाविष्ठवत्' इत्यकारलोपे 'चङि' (६-१-११) इति द्वित्वे णिलोपे च अजहलत् इति स्थिते अङ्गस्याग्लोपित्वेन 'अनग्लोपे' (७-४-९३) इति सन्वद्भावप्रतिषेधात् 'सन्यतः' (सू. ७-४-८९) इति अभ्यासस्य इत्वं न भवति। यदि च हलि इतीकारान्तात् णिच् स्यात् तदा 'णाविष्ठवत्' इति इष्ठवद्भावातिदेशात् 'टेः' (सू. ६-४-१५५) इति इकारस्य लोपे 'अचो ञ्णिति' (सू. ७-२-११५) इति वृद्धौ च प्राप्तयोः परत्वात् वृद्धौ ऐकारे तस्य 'टेः' इति लोपे ऐकारस्याक्त्वाभावात् तल्लोपः अग्लोपो न भवतीति 'अनग्लोपे' इति प्रतिषेधाप्रवृत्तेः 'सन्वल्लघुनि' (सू. ७-४-९३)

इति सन्वद्भावे 'सन्यतः' इत्यभ्यासस्य इत्वे अजीहलत् अचीकलत् इति भवेत्। अतः कृतात्वाभ्यां हलिकलिभ्यां णिजिति 'व्याख्यायत इति वाच्यम्। 'नाग्लोपिशास्वृदिताम्' (सू. ७-४-२) इति सूत्रे भाष्ये अग्रहणाद्वृद्धेर्लोपो बलीयान् इति ज्ञापितत्वेन अ हलि इ अत् इत्यत्रापि वृद्धिं बाधित्वा हलि इतीकारस्य टेःलोपे अग्लोपित्वं अङ्गस्यास्तीति 'अनग्लोपे' इति निषेधात् सन्वद्भावाप्राप्तेः। तथा चादन्तत्वनिपातनं व्यर्थमित्याशङ्क्याह—**हलिकल्योरिति।** पूर्वोक्तरीत्या व्यर्थं सददन्तत्वनिपातनं हलिकलिशब्दविषये वृद्धौ कृतायां लोप इति ज्ञापयति। तथा च इकारान्ताण्णिचि आदौ वृद्धौ ततो लोपे अग्लोपित्वाभावेन सन्वद्भावे 'सन्यतः' इति इत्वं भवेदिति कृतात्वाभ्यां णिच् उक्तः। इत्थं च हल कल इत्यदन्ताभ्यां णिचि वृद्धौ कृतायामाकारे तस्य लोपेऽपि अग्लोपो भवतीति 'अनग्लोपे' इति निषेधान्न सन्वद्भाव इति नाभ्यासस्यात इत्वमिति भावः।

भाष्ये तु—'हलिकल्योरत्वनिपातनं सन्वद्भावप्रतिषेधार्थम्' इति दृश्यते। तस्यापि कथंचिदुक्तार्थे तात्पर्यमवसेयम्।

[ज्ञा.] च्लेः सिच् (सू. ३-१-४४)॥ सिचः कित्करणात् ज्ञापकात् सिजन्तस्य नलोपो नेति। एवं च सिच इदित्त्वं प्रत्याख्येयम्। स्थानिवद्भावेनेदित्त्वसिद्धेश्च।

[वि.] ननु च्लेः स्थाने यः सिजादेशः तस्मिन्नादेशे चकारः इकारश्चोभावित्संज्ञकाविष्येते। तत्रेकाराख्यानुबन्धसंयोजनम् व्यर्थम्। न च सिजन्तस्य इदित्त्वप्रयुक्तकार्यार्थं तत्संयोजनम्। तथा हि अमन् स् त इत्यत्र सिचः इदित्त्वाभावे सिजन्तस्याङ्गस्यानिदित्त्वेन तदुपधाया नकारस्य 'अनिदिताम्' (सू. ६-४-२४) इति लोपः स्यात् इति वाच्यम्। 'हनः सिच्, (सू. १-२-१४) इति सूत्रेण हन्तेः परस्य सिचः किद्विधानात् ज्ञापकात् सिजन्तस्य नलोपो नेति ज्ञापनात् अमंस्तेत्यत्र नलोपाभावसिद्धेः। तथा हि—आङ्पूर्वकहनधातोर्लुङि च्लिः च्लेः

सिच् त, 'आ हन् स् त' इति स्थिते 'हनः सिच्' इत्यनेन सिचः कित्त्वात्। तस्मिन् परतः 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' (सू. ६-४-३७) इति सूत्रेण नकारस्यानुनासिकस्य लोपे 'ह्रस्वादङ्गात्' (सू. ८-२-२७) इति सूत्रेण सकारस्य लोपे आहत इति रूपम्। अत्र सिचः कित्त्वविधानं व्यर्थं यदि सच् इति अनिदित्त्वं तस्य स्यात्। तदा हि आहन् स् इति सजन्ताङ्गस्यानिदित्त्वेन 'अनिदितां हल उपधायाः क्ङिति' (सू. ६-४-२४) इति सूत्रेण नलोपे इष्टसिद्धेः किं सिचः कित्त्वविधानेन। कृतं च तत् सिजन्तस्य उपधाया नकारस्य 'अनिदितां हल उपधायाः' इति लोपो न भवतीति ज्ञापयति। तथा च हन्तेर्नकारस्य लोपसिद्धये सिचः कित्त्वविधानं सार्थकम्। अमंस्तेत्यत्र च सिजन्तस्य नलोपो न भवतीत्युक्त्या नलोपाभावः सिध्यतीति तदर्थं सिच इदित्त्वं नावश्यकम्। तथा च सिच इदित्त्वं मास्तु। सच् इत्येवास्तु इति निर्णयः। तदेतदाह—**सिचः कित्करणात्** इत्यादिना। च्लि इत्यस्येदित्त्वात् तत्स्थाने जातस्य सिचः स्थानिवद्भावेनैवेदित्त्वं लभ्यते। तथा च सर्वथा सिच इदित्त्वं व्यर्थमेवेत्याह—**स्थानिवद्भावेनेति**। वस्तुतस्तु इदित्त्वं विनापि सकलेष्टसिद्धेः प्रदर्शितत्वात् स्थानिवद्भावेनेदित्त्वसाधनं मुधा। अत एव 'इदिद्वा स्थानिवत्त्वात्' इति वार्तिकं एकदेश्युक्तिः' इति भाष्यप्रदीपोद्योते ग्रन्थकारेणैवोक्तमिति अवधेयम्।

[ज्ञा.] वासरूपोऽस्त्रियाम् (सू. ३-१-९४)॥ **'ददातिदधात्योर्विभाषा'** (सू. ३-१-१३९) **इति ज्ञापकात् नानुबन्धकृतमसारूप्यम्। 'हशश्वतोर्लङ् च'** (सू. ३-२-११६) **इति ज्ञापकात् लादेशेषु वासरूपविधिर्नास्ति इति।**

[वि.] अनयोर्वचनयोः परिभाषारूपत्वादिह न व्याख्यायेते।

इति तृतीयाध्यायस्य प्रथमः पादः।

[ज्ञा.] 'चरेष्टः' (सू. ३-२-१६) ॥ 'भिक्षासेनादायेषु च' (सू. ३-२-१७) इत्यत्र भिक्षाग्रहणात् ज्ञापकात् अधिकरण एव न कर्मणि ।

[वि.] ननु सुबन्ते उपपदे चरधातोः 'चरेष्टः' (सू. ३-२-१६) इति सूत्रेण विधीयमानः टप्रत्ययः कुरूंश्चरति इत्यत्र कुतो न भवति । न च 'चरेष्टः' इत्यत्र 'अधिकरणे शेतेः' (३-२-१५) इत्यतः अधिकरणे इत्यस्यानुवृत्तेः कर्मण्युपपदे न भवतीति वाच्यम् । कर्मणीत्यस्याप्यनुवृत्तेः । अन्यथा उत्तरसूत्रैर्विधीयमानानां प्रत्ययानां कर्मण्युपपदे प्राप्त्यसंभवात् इत्याशङ्क्य 'चरेष्टः' इति सूत्रं परम् अधिकरणे उपपद एव भवति न कर्मणि इति ज्ञापकात् साधयति—**भिक्षासेनादायेषु चेत्यत्रेति** । यदि 'चरेष्टः' इति सूत्रं कर्मण्युपपदेऽपि प्रवर्त्तेत तर्हि भिक्षां चरतीत्यत्र अनेनैव टप्रत्ययेन भिक्षाचर इति रूपसिद्धेः 'भिक्षासेनादायेषु च' (सू. ३-२-१६) इति सूत्रे भिक्षाग्रहणं व्यर्थम् । कृतं च तत् 'चरेष्टः' इति सूत्रम् अधिकरणे उपपद एव भवतीति ज्ञापयति । तथा च कर्मण्युपपदे टप्रत्ययार्थं भिक्षाग्रहणमिति स्वांशे चारितार्थ्यम् । प्रयोजनं तु कुरूंश्चरति इत्यादौ कर्मण्युपपदे चरेष्टो न भवतीति भावः ।

[ज्ञा.] सत्सूद्विष (सू. ३-२-६१) ॥ अत्रोपसर्गेऽपीति ज्ञापयति अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं नेति । तेन वदः सुप्यनुपसर्गग्रहणं चोदितम् । तन्न वक्तव्यं भवति ।

[वि.] 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' (सू. ३-२-६१) इति सूत्रे वर्तिककारेण 'सदादिषु सुब्ग्रहणम्' इति प्रोक्तम् । सुबन्ते उपपदे सदादिभ्यः क्विप् भवतीति तदर्थः। वेद्यां सीदतीत्यत्र सुबन्ते वेदिशब्दे उपपदे सदधातोः क्विपि वेदिषत् इति उदाहरणम् । भाष्यकारस्तावत् यदि सुबन्ते उपपदे क्विबित्युच्यते तर्हि उपसर्गस्यापि सुबन्तत्वात् सुपीत्यनेनैव तदुपसंग्रहात् सूत्रे

उपसर्गेऽपीति न वक्तव्यमित्याशङ्क्य ज्ञापकार्थं तद्वक्तव्यमित्युक्तवान्। सुपीत्यनेनैव उपसर्गस्यापि ग्रहणे सिद्धे उपसर्गग्रहणं क्रियमाणमेवं ज्ञापयति यत् यत्र सुपि उपपदे प्रत्ययश्चोद्यते तत्र उपसर्गे उपपदे न भवतीति तदाशयः। तथा च उपसर्गे उपपदेऽपि क्विप्प्रत्ययार्थं 'सत्सूद्विष' इति सूत्रे उपसर्गग्रहणं कृतमिति चारितार्थ्यम्। प्रयोजनं तु—'वदः सुपि क्यप् च' (सू. ३-१-१०६) इति सूत्रेण विधीयमानः क्यप् प्रत्ययः उपसर्गे उपपदे न भवतीति। एवं च तत्सूत्रे 'अनुपसर्गग्रहणं कर्तव्यम्' इति वार्तिकं न कर्तव्यं भवतीति सिद्धम्। अत एव प्रवाद्यमित्यादौ उपसर्गे उपपदे वदेः क्यप् न भवति। सर्वमिदमभिप्रेत्याह—**अत्रोपसर्गेऽपीति।**

[ज्ञा.] आत्ममाने (सू. ३-२-८३)॥ तासेः परस्य लसार्वधातुकस्यानुदात्तत्वविधानं ज्ञापयति सति शिष्टेऽपि विकरणस्वरः सार्वधातुकस्वरं न बाधत इति।

[वि.] 'आत्ममाने खश् च' इति सूत्रे 'कर्मकर्तरि च' इति वार्तिकेन आत्मकर्मकमनने वर्तमानात् मन्यतेः सुप्युपपदे कर्मकर्तर्यर्थे खश् भवतीति कथितम्। एवं वक्तुश्चायमभिप्रायः यत् अस्मिन् खशि परे 'कर्मवत् कर्मणा तुल्यक्रियः' (सू. ३-१-८७) इति सूत्रेण कर्मवद्भावात् 'सार्वधातुके यक्' (सू. ३-१-६७) इति यक् भवति। तथा च दर्शनीयंमन्य इत्यत्र यकारश्रवणं फलमिति। तदुपरि एवमाशङ्का भवति—अत्र कर्मकर्तृग्रहणं मास्तु। कर्तर्येवायं खश् विधीयताम्। दिवादित्वात् अस्य मनधातोः कर्त्रर्थके सार्वधातुके खशि परे श्यनि दर्शनीयंमन्य इति यकारघटितं रूपं सिध्यत्येव। न च रूपं यद्यपि सिध्यति, तथापि स्वरे भेदो भवति यकि सति अन्तोदात्तस्वरः प्रत्ययस्वरेण, श्यनि सति 'ञ्नित्यादिर्नित्यम्' (सू. ६-१-१९७) इत्याद्युदात्तस्वरः इति वाच्यम्। खश्स्वरेण श्यन्स्वरस्य बाधात् अन्तोदात्तत्वसिद्धेः। एवमपि आदौ खश् तस्य स्वरश्च, तदनन्तरं श्यन् तत्प्रयुक्त-

स्वरश्चेति श्यन्स्वरस्य खश्स्वरे सति विहितत्वात् बलीयस्त्वमित्याद्युदात्तत्वमेव भवेदिति ।

अस्याः शङ्कायाः ज्ञापकसिद्धं वचनमालम्ब्य समाधानं ब्रूते—**तासेः परस्येति** । अत्रायमाशयः—'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तम्' (सू. ६-१-१८६) इति सूत्रेण तास् इत्यतः परस्य लसार्वधातुकस्यानुदात्तत्वं विधीयते । यथा कर्ता इत्यादौ 'आ' इत्यस्य तासः परस्य लुडादेशस्य अनुदात्तत्वं भवति । प्रत्ययस्वरस्यापवादोऽयम् । यदि सति शिष्टः स्वरः बलीयान् स्यात् तर्हि प्रत्ययस्वरे सति शिष्टः तास्स्वरः प्रत्ययस्वरं बाधत इति तेनैव प्रत्ययस्यानुदात्तत्वे सिद्धे तासेः परस्य लसार्वधातुकस्य अनुदात्तविधानं नावश्यकम् । यतोऽनुदात्तत्वं विहितं तेनैवं ज्ञाप्यते यत् सति शिष्टेऽपि विकरणस्वरः सार्वधातुकस्वरं न बाधते इति । तथा च कर्ता इत्यादौ प्रत्ययस्वरो भवेदिति तद्बाधनार्थं तासेः परस्यानुदात्तविधानम् । एवं च दर्शनीयंमन्य इत्यादौ यदि श्यन् तदा स खश्स्वरं न बाधत इति अन्तोदात्तैव, यक्यपि अन्तोदात्तैवेति स्वरेऽपि भेदाभावात् श्यनैवेष्टसिद्धेः कर्तर्येवायं खश् उचित इति कर्मकर्तृग्रहणं न कर्तव्यमिति स्थितम् ।

[ज्ञा.] लट् स्मे (सू. ३-२-११८) ॥ इदं ज्ञापयति—स्मलक्षणः पुरालक्षणश्चाद्यतने न भवत इति ।

[वि] 'लट् स्मे' इति सूत्रस्य स्मशब्दे उपपदे भूतानद्यतनपरोक्षे लट्प्रत्ययो भवतीत्यर्थः । लिटोऽयमपवादः । नलेन स्म पुराधीयत इत्यादिकमुदाहरणम् । तत्र च सूत्रे वार्तिकद्वयम्—'स्म पुरा भूतमात्रे, न स्म पुराद्यतने' इति । तस्य चायमर्थः—प्रथमे वार्तिके स्मपुराशब्दाभ्यामाद्यन्ताभ्यां 'लट् स्मे' 'अपरोक्षे च' 'ननौ पृष्टप्रतिवचने' 'नन्वोर्विभाषा' 'पुरि लुङ् चास्मे' (सू. ३-२-११८—३-२-१२२) इति पञ्चसूत्री लक्ष्यते । तत्र भूतमात्रे प्रत्ययो भवति । स्मपुरालक्षणस्तु प्रत्ययः अद्यतने न भवति । अर्थात् 'लट् स्मे' 'अपरोक्षे च' 'पुरि लुङ्

चास्मे' इति सूत्रत्रयेण अनद्यतने भूतविशेषे प्रत्ययो विधीयते। 'ननौ पृष्टप्रतिवचने' 'नन्वोर्विभाषा' इत्येताभ्यां तु भूतमात्रे प्रत्ययो विधीयत इति व्यवस्था आश्रयणीया इति। इयं च व्यवस्था सूत्रतो न लभ्यत इति वर्तिककारस्याशयः।

वस्तुतस्तु सूत्रादेवेयं व्यवस्था लभ्यत इत्याह—**इदं ज्ञापयतीति।** 'अपरोक्षे च' (सू. ३-२-११९) इति उत्तरसूत्रारम्भात् 'लट् स्मे' (सू. ३-२-११८) इति सूत्रे परोक्षग्रहणमनुवर्तते इति ज्ञायते। ततश्च परोक्षग्रहणसंबद्धमनद्यतनग्रहणमपि तत्र अनुवर्तत इति 'लट् स्मे' इति सूत्रं परोक्षानद्यतनविषयमिति सिध्यति। 'अपरोक्षे च' (सू. ३-२-११९) इत्ययमपरोक्षानद्यतनविषयः। 'पुरि लुङ् चास्मे' (सू. ३-२-१२२) इत्यत्र तु लुङ्ग्रहणमहिम्ना अनद्यतनविषयकत्वं लभ्यते। यदि ह्ययं भूतमात्रे विधिः स्यात् तदा 'नन्वोर्विभाषा' (सू. ३-२-१२१) इत्यतो विभाषाग्रहणानुवृत्त्या विकल्पेन लटो विधानात् तदभावपक्षे भूतसामान्ये विहितो लुङ् भविष्यतीति लुङ्ग्रहणमनर्थकम्। कृतं च तत् 'पुरि' इति सूत्रस्यानद्यतनविषयकत्वं ज्ञापयति। तथा च विभाषानुवृत्तावपि लडभावे लुङ् न लभ्येत, अनद्यतने लुङः अविधानात् इति पक्षे लुङ्लाभार्थं लुङ्ग्रहणम्। इत्थं चेयं त्रिसूत्री अनद्यतनभूतविषयिणीति सिद्धम्। मध्यमयोः 'ननौ पृष्टप्रतिवचने' (सू. ३-२-१२०) 'नन्वोर्विभाषा' (३-२-१२१) इति सूत्रयोस्तु परोक्षग्रहणस्यापरोक्षग्रहणस्य च निवृत्त्या तत्सहचरितानद्यतनग्रहणस्यापि निवृत्तेर्भूतमात्रविषयकत्वमिति विषयविभागस्य सूत्रेणैव लाभाद्वार्तिकमनवसरमिति भावः।

[ज्ञा.] निन्दहिंस (सू. ३-२-१४६)॥ निन्दादिभ्यो वुञ्वचनात् ज्ञापकात् ताच्छीलिकेषु सर्व एव तृजादयो वासरूपेण न भवन्ति।

[वि.] ननु 'निन्दहिंस' (सू. ३-२-१४६) इत्यादिसूत्रेण निन्दादिभ्यो वुञ्विधानमनर्थकम्। 'ण्वुल्तृचौ' (सू. ३-१-१३३) इति सूत्र-

विहितण्वुलैवेष्टसिद्धेः। रूपस्वरयोर्विशेषाभावात्। निन्दक इत्यत्र ण्वुल्पक्षे 'लिति' (सू. ६-२-१९३) इति सूत्रेण प्रत्ययात्पूर्वमुदात्तं भवतीति धातोरिकारः उदात्तः। वुञ्पक्षेऽपि 'ञ्नित्यादिर्नित्यम्' (सू. ६-१-१९७) इति सूत्रेण समुदायादिः स एवोदात्त इति स्वरेऽपि भेदाभावात्। न च एकाच्धातुविषये स्वरे भेदो यद्यपि नास्ति, तथाप्यनेकाच्धातुविषये स्वरभेदो भवत्येव। अत्र सूत्रे असूयधातुरपि निर्दिष्टः। ततो वुञि असूयकशब्दे समुदायादिरुदात्तः। ण्वुलि तु प्रत्ययात्पूर्वः सकारोत्तर ऊकार उदात्त इति स्वरे भेदोऽस्तीति तदर्थं सूत्रमिति वाच्यम्। तर्हि 'असूयो वुञ्' इत्येव सूत्रमस्तु, निन्दादिग्रहणस्य व्यर्थत्वादित्याशङ्क्य वचनविशेषज्ञापकतया सार्थक्यमाह—**निन्दादिभ्य** इति। अयमर्थः—निन्दादिग्रहणाभावे निन्दक इत्यादिरूपं न सिध्यति। न च ण्वुला सिद्धिः। तच्छीलादिष्वर्थेषु विशेषविहितेन तृना ण्वुलो बाधात्। न च वासरूपन्यायेन तृनः विकल्पेन ण्वुल्बाधकत्वात् पक्षे ण्वुल् सिध्यतीति वाच्यम्। तर्हि तत एवेष्टसिद्धेः निन्दादिग्रहणं व्यर्थं सत् तच्छीलादिष्वर्थेषु वासरूपन्यायो न प्रवर्तत इति ज्ञापयतीति तृना नित्यं ण्वुलो बाधा स्यात्। तथा च निन्दक इत्यस्य रूपस्य सिद्ध्यर्थं वुञसूत्रे निन्दादिग्रहणमिति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं ताच्छीलिकप्रकरणविहितप्रत्ययविषये सामान्यसूत्रं न प्रवर्तत इति।

वासरूपन्यायेन प्राप्तास्तृजादयः ताच्छीलिकेषु न भवन्तीत्यन्वयः।

[ज्ञा.] जुचङ्क्रम्य (सू. ३-२-१५०)॥ अत्र पदग्रहणात् ज्ञापकात् ताच्छीलिकास्ताच्छीलिकेषु वासरूपेण न भवन्ति। 'सूददीपे' त्यत्र दीपग्रहणात् ज्ञापकात् भवति युचो रेण समावेशः।

[वि.] ननु 'जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः' इति सूत्रेण जुप्रभृतिभ्यो धातुभ्यः तच्छीलादिषु कर्तृषु 'युच्' प्रत्ययो विधीयते। तत्र पदधातोर्ग्रहणमनर्थकम्। तस्य अनुदात्तेत्त्वेन हलादित्वेन च 'अनुदात्तेतश्च

हलादेः' (सू. ३-२-१४९) इति सामान्यसूत्रेणैव युच्प्रत्ययसिद्धेः। न च 'लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्' (सू. ३-२-१५४) इति विशेषविहितेन उकञा सामान्यविहितस्य युचो बाधे प्राप्ते उकञा सह समावेशसिद्धयर्थं पदेः अत्र युच्सूत्रे ग्रहणमिति वाच्यम्। वासरूपन्यायेन असरूपस्य उकञः विकल्पेन युच्बाधकत्वात् पक्षे युचोऽपि सिद्धेः इत्याशङ्क्य ज्ञापनार्थं पदग्रहणमित्याह—**अत्र पदग्रहणादिति**। पूर्वोक्तरीत्या व्यर्थं सत् पदग्रहणमेवं ज्ञापयति यत् ताच्छीलिकेष्वपवादविधिषु ताच्छीलिका उत्सर्गविधयः वासरूपन्यायेन प्रसक्ताः प्रतिषिद्धा भवन्तीति। इत्थं च उकञा युचः बाधात् युचोऽपि सिद्धयर्थं पदग्रहणं सार्थकमिति भावः।

ननु यद्येवं ज्ञाप्यते तर्हि 'सूददीपदीक्षश्च' (सू. ३-२-१५३) इति सूत्रे दीपिग्रहणं व्यर्थम्। तेन हि सूत्रेण दीपेर्युच् निषिध्यते। युच्च 'अनुदात्तेतश्च हलादेः' (सू. ३-२-१४९) इति सूत्रेण प्राप्तः। तस्य 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' (३-२-१६७) इति सूत्रविहितो रप्रत्ययः अपवादः। उभयोरपि ताच्छीलिकत्वात् ताच्छीलिकापवादरप्रत्ययविषये ताच्छीलिकस्योत्सर्गस्य युचः उक्तज्ञापकमहिम्ना अप्राप्तेः तन्निषेधसिद्धयर्थं 'सूददीपदीक्षश्च' इति सूत्रे दीपिग्रहणमनर्थकमित्याशङ्क्य, अत एव 'युचो रेण समावेशः' इति वचनज्ञापनद्वारा तत् सार्थकम् इत्याह—**सूददीपेत्यत्रेति**। रप्रत्ययेन युच्प्रत्ययसमावेशात् कदाचित् दीपेः युजपि स्यादिति तन्निषेधलाभार्थं दीपिग्रहणमिति भावः। एवं ज्ञापनस्य प्रयोजनं तु कम्रा कन्या इत्यादौ पक्षे युजपि भवति तेन कमना कन्या इत्यादिसिद्धिरिति।

॥ इति तृतीयाध्यायस्य द्वितीयः पादः ॥

[ज्ञा.] तुमुन्ण्वुलौ (सू. ३-३-१०)। पुनर्ण्वुल्विधानं ज्ञापयति क्रियार्थायां क्रियायामुपपदे वासरूपेण तृजादयो नेति। एवं च बाधक(लट्रिषये) [लृट्रिषये] ण्वुलर्थं तत्।

[वि.] 'ननु तुमुन्ण्वुलौ क्रियार्थायां क्रियायाम्' इति सूत्रेण ण्वुल्विधानमनर्थकम्। 'ण्वुल्तृचौ' इति सामान्यसूत्रेणैव क्रियार्थायां क्रियायामुपपदे भविष्यति काले ण्वुल्सिद्धया भोक्तुं व्रजतीत्यर्थे भोजको व्रजतीत्यादिसिद्धेः। न च 'लट् शेषे च' (सू. ३-३-१३) इति सूत्रेण क्रियार्थायां क्रियायामुपपदे भविष्यति लट्प्रत्ययविधानात् विशेषविहितेन तेन ण्वुलो बाधा मा भूदित्येतदर्थं ण्वुल्ग्रहणमिति वाच्यम्। वासरूपन्यायेन विकल्पेन लटः ण्वुल्बाधकत्वात् पक्षे ण्वुलोऽपि सिद्धेः इत्याशङ्क्याह—**पुनर्ण्वुल्विधानमिति**। तथा च क्रियार्थायां क्रियायामुपपदे वासरूपन्यायो न प्रवर्तत इति ज्ञापनात् लटा ण्वुलो बाधो मा भूदित्येतदर्थं पुनर्ण्वुल्विधानम्। ततश्च बाधकल्लृट्रिषयेऽपि ण्वुल् सिद्धयति। तेन च ण्वुल्भिन्नाः तृजादयः प्रत्ययाः लटा नित्यं बाध्यन्ते। अतः करिष्यामीति व्रजतीत्यर्थे कारको व्रजतीतिवत् कर्ता व्रजतीत्यादयो न प्रयोगाः इति भावः।

[ज्ञा.] ग्रहवृदृनिश्चि (सू. ३-३-५८)॥ स्तेयस्य (सुज्विधौ) [घञ्विधौ] प्रतिषेधात् अस्तेये चानिष्टत्वात्। एवं च निश्चिग्रहणं ज्ञापयति — 'थाथघञ्क्ताबित्रकाणाम्' (सू. ६-२-१४४) इत्यन्तोदात्तत्वं निष्पूर्वाच्चिनोतेरेति।

[वि.] ननु अब्विधायके 'ग्रहवृदृनिश्चिगमश्च' इति सूत्रे निष्पूर्वस्य चिधातोर्ग्रहणमनर्थकम्। 'एरच्' (सू. ३-३-५६) इत्यच्प्रत्ययेनैव निश्चय इति रूपसिद्धेः। अच्पक्षे चित्त्वात् अन्तोदात्तता, अप्पक्षेऽपि 'थाथघञ्क्ताबित्रकाणाम्' इत्यनेन अन्तोदात्ततेति स्वरेऽपि विशेषाभावात्। न च 'हस्तादाने चेरस्तेये' (सू. ३-३-४०) इति सूत्रेणास्तेये घञ्प्राप्तौ तद्बाधनार्थमब्विधानमिति वाच्यम्। 'अस्तेये' इति प्रतिषेधेन स्तेये घञोऽप्राप्तेः। अस्तेये च हस्तादानविषये

निश्चाय इत्येवं घञेवेष्यते नाप्। तथा च निष्पूर्वाच्चिनोतेरबविधानमनर्थकमित्याशङ्क्य, अत एव 'थाथ' इत्यादिसूत्रेण विहितः अन्तोदात्तस्वरः निष्पूर्वाच्चिनोतेर्नेति ज्ञापयति। तथा च अप्प्रत्ययपक्षे थाथादिस्वराप्रवृत्त्या धातुस्वरेण चयशब्दे चकारोत्तराकारः उदात्तः। स एव निश्चयशब्देऽपि 'गतिकारकोपपदात् कृत्' (सू. ६-२-१३९) इति सूत्रेण भवतीति मध्योदात्तो निश्चयशब्दः। अच्पक्षे चान्तोदात्त इति स्वरभेदात् हस्तादानविषये स्तेये अचा स्वरपर्यन्तेष्टसिद्धेरसंभवात् निष्पूर्वाच्चेरप्प्रत्ययविधानमिति समाधानमाह— **स्तेयस्येत्यादिना। घञ्विधौ** इति। 'हस्तादाने चेरस्तेये' (सू. ३-३-४०) इति विधावित्यर्थः। **अनिष्टत्वादिति**। अप्प्रत्ययस्येति शेषः।

[ज्ञा.] प्रैषातिसर्ग (सू. ३-३-१६३)॥ इदं कृत्यवचनं लोटा बाधाभावार्थं सत् स्त्र्यधिकारादूर्ध्वं वासरूपविधिर्नेति ज्ञापयति।

[वि.] ननु 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इति सूत्रे कृत्यग्रहणं मास्तु। सामान्येन भावकर्मणोर्विहिताः कृत्याः प्रैषादिष्वन्यत्र च भविष्यन्ति। न च प्रैषादिषु विशेषविहितेनानेन लोटा कृत्यानां बाधा मा भूदित्येतदर्थं कृत्यग्रहणमिति वाच्यम्। वासरूपन्यायेन लोटो विकल्पेन बाधकत्वात् पक्षे कृत्यानामपि सिद्धेः इत्याशङ्क्य, एवं तर्हि स्त्र्यधिकारादूर्ध्वं वासरूपविधिर्नेति ज्ञापनार्थं तत्। तथा च अस्य 'प्रैषातिसर्ग' इति सूत्रस्य 'स्त्रियां क्तिन्' (सू. ३-३-९४) इत्यधिकारात्परं विद्यमानत्वेन अत्र वासरूपन्यायानवतारात् लोटा कृत्यानां नित्यं बाधे प्राप्ते समावेशसिद्ध्यर्थं कृत्यग्रहणमित्याह—**इदं कृत्यवचनमिति**। न च 'वासरूपोऽस्त्रियाम्' इत्यत्र अस्त्रियामित्यनेनैवास्यार्थस्य सिद्धेः ज्ञापनानवसरमिति वाच्यम्। तेन हि स्त्रियामित्यधिकारे वासरूपो नेति ज्ञायते। स्त्रियामित्यधिकारादूर्ध्वं नेति न लभ्यते इत्याशयात्। स्त्रियां इत्यधिकारश्च 'नपुंसके भावे क्तः' (सू. ३-३-११४) इत्यत्रैव विच्छिन्न इति ध्येयम्।

इति तृतीयाध्यायस्य तृतीयः पादः

[ज्ञा.] उदीचां माङो (सू. ३-४-१९) ॥ अत्र सानुबन्धकस्यात्वभूतस्य ग्रहणं ज्ञापयति नानुबन्धकृतमनेजन्तत्वमिति।

[वि.] परिभाषेयम्। अतो न व्याख्यायते।

[ज्ञा.] लस्य (सू. ३-४-७७) ॥ णलो लित्करणात् लकाराणां लस्य नेत्त्वम्।

[वि.] ननु पचतीत्यादौ लटः स्थाने तिबादेशः। लकारश्च 'लशक्वतद्धिते' (सू. १-३-८) इति सूत्रेणेत्संज्ञकः। ततश्च लटः लित्त्वात् तदादेशस्य तिबादेरपि स्थानिवद्भावेन लित्त्वात् पचतीत्यादौ लित्स्वरः प्राप्नोतीत्याशङ्क्याह— **णलो लित्करणादिति।** लिटः स्थाने तिप् तस्य स्थाने णल् तत्र स्थानिवद्भावेनैव णलो लित्त्वे सिद्धे णलो लित्करणं लडादिलकाराणां लस्येत्संज्ञा नेति ज्ञापयति। तथा च स्थानिन एव लित्त्वाभावात् आदेशे तदृदुर्लभमिति णलि लित्करणं सार्थकम्। एवं च पचतीत्यादावपि तिबादेर्लित्त्वं नेति न लित्स्वरप्रसङ्ग इति भावः। भाष्ये तु—

'न लादेशेषु लित्कृतं भवति'

इति वचनशरीरं दृश्यते। उभयत्र फलमेकमेवेत्यवधेयम्।

[ज्ञा.] टित आत्मनेपदानां टेरे (सू. ३-४-७९)॥ टित आत्मनेपदानामिति सूत्रे आनस्य प्रतिषेधो वक्तव्यः। उक्तं वा। ज्ञापकं वा सानुबन्धकस्यादेशवचनमित्कार्याभावस्येति।

[वि.] ननु 'टित आत्मनेपदानां टेरे' इति सूत्रेण टितो लकारस्य स्थाने यान्यात्मनेपदानि तेषां टेः एत्वं विधीयमानं, पचमान इत्यादौ आनस्य टेरपि प्राप्नोति। आनस्यापि टित्स्थानिकात्मनेपदत्वादित्याशङ्क्य, 'टित एत्वे आत्मनेपदेष्वानप्रतिषेधः' इति वार्तिकात् आनस्य न एत्वमित्याह— **इति सूत्र इत्यादिना।**

वस्तुतो 'गाङ् लिटि' (सू. २-४-४९) इति सूत्रे इङः धातोः गाङ् आदेशो विधीयते। तत्र धातोः ङित्त्वात् आदेशस्य गा इत्यस्यापि स्थानिवद्भावेन ङित्त्वं भविष्यतीति आदेशे ङकारानुबन्धो व्यर्थः सन् यत्र सानुबन्धकस्य आदेशः उच्यते तत्र आदेशे इत्संज्ञाप्रयुक्तानि कार्याणि न प्रवर्तन्त इति ज्ञापयतीत्युक्तम्। तथा च 'लटः शतृशानचौ' इति सानुबन्धकस्य स्थाने शानचः विधानात् शानचि टित्त्वप्रयुक्तमेत्त्वं न प्रवर्तिष्यते। पचते इत्यादौ 'लस्य' इति सूत्रेण अनुबन्ध-रहितस्य स्थाने विधानात् तादीनां एत्वं प्रवर्त्स्यति, अतो न दोष इत्याशय-वानाह—**उक्तं वेति**। 'गाङ् लिटि' इति सूत्रे वार्तिके इति शेषः।

अत्र च—

'सानुबन्धाद्यत्र षष्ठी उच्चार्यते तत्राकृतायामेवेत्संज्ञायामादेशः प्रवर्तते। कृतायां वा इत्संज्ञायां तन्निबन्धनानि कार्याणि न प्रवर्त्तन्ते'

इति 'गाङ् लिटि' इति सूत्रस्थः प्रदीपग्रन्थोऽनुसन्धेयः।

इति तृतीयोऽध्यायः

॥ अथ चतुर्थोऽध्यायः ॥

[ज्ञा.] अजाद्य (सू. ४-१-४) ॥ 'शूद्रा चामहत्पूर्वा' (वा) इति ज्ञापयति इह तदन्तविधिरिति ।

[वि.] 'अजाद्यतष्टाप्' इति सूत्रे 'शूद्रा चामहत्पूर्वा जातिः' इति वार्तिकम् । तस्य च शूद्रजातिः वाच्या चेत् अमहत्पूर्वः शूद्रशब्दः स्त्रियां टापं लभते इत्यर्थः । अजादिगणे पठितस्य शूद्रशब्दस्य टाप् सामान्यतः प्राप्तः । तत्र जातिवाचकत्वं महच्छब्दपूर्वकत्वाभावश्चेति विशेषणद्वयं यद्यस्ति शूद्रशब्दस्य तदैव टाप् इति व्यवस्था वार्तिककृता कृता भवति । तत्र अमहत्पूर्वा इति विशेषणं व्यर्थम् । महाशूद्रशब्दस्य अजादिगणे पाठाभावादेव टापोऽप्रसक्तेः । न च शूद्रशब्दोऽजादिषु पठ्यते । तेन च तदन्तविधिना महाशूद्रशब्दोऽपि गृह्येतेति वाच्यम् । ग्रहणवता प्रातिपदिकेन तदन्तविधेः प्रतिषेधात् इत्याशङ्क्य स्त्री-प्रत्ययेषु तदन्तविधिरस्तीति ज्ञापनार्थं तदित्याह—**शूद्रा चेति** । तथा च तदन्त-विधिना शूद्रशब्देन महाशूद्रशब्दोऽपि गृह्येतेति तद्व्यावृत्त्यर्थममहत्पूर्वग्रहणम् । ज्ञापनप्रयोजनं तु 'भवती' इत्यत्र उगिदन्तात् भवच्छब्दात् यथा 'उगितश्च' (सू. ४-१-६) इति ङीप् तथा तदन्तविधिना उगिदन्तात् अतिभवच्छब्दा-दपि ङीप् भवतीति अतिभवतीति रूपसिद्धिः इति भावः । **इहेति** । स्त्रीप्रत्यय-प्रकरण इत्यर्थः ।

[ज्ञा.] टिड्ढाणञ् (सू. ४-१-१५) वामदेवाड्ड्यड्ड्यौ (सू.४-२-९) इति ङित्त्वम् 'अननुबन्धकग्रहणे न सानुबन्धक-ग्रहणम्' 'तदनुबन्धकग्रहणे अतदनुबन्धकग्रहणं न' इति परिभाषयोः ज्ञापकम् ।

[ज्ञा.] प्राग्दीव्यतोऽण् (सू. ४-१-८३) । अयमेव विकृतनिर्देशो ज्ञापयति—"एकदेशविकृतमनन्यव"दिति ।

[ज्ञा.] 'पीलाया वा' (सू. ४-१-११८) इति वाग्रहणं ज्ञापकं 'नापवादविषयेऽण् भवति' इति ।

[वि.] 'प्राग्दीव्यतोऽण्' (सू. ४-१-८३) इति सूत्रे किं प्राग्दीव्यतो याः प्रकृतयः ताभ्यः अण् इति विवक्षितम्, आहोस्वित् प्राग्दीव्यतो येऽर्थास्तेभ्यण् इति विवक्षितम्। आद्यपक्षे अपवादभूत - इञादिविषयेप्यण्प्रसङ्गः। द्वयोरेकविषयत्वेन विकल्प एव स्यान्न बाध्यबाधकभाव इति। द्वितीयपक्षे अर्थेभ्विदमण्-विधानमिति प्रकृत्यन्तरे सावकाशोऽण्प्रत्ययः एकस्मिन्नर्थे प्रकृतिविशेषादुत्पद्यमानेनेञादिना बाध्येतेति न दोषो भवति। तत्र प्रथमपक्षेऽपि दोषो नास्तीति साधयितुमाह—**पीलाया वेति वाग्रहणमिति।** यद्यपवादविषयेऽप्यण् भवेत्, तर्हि 'पीलया वा' इति सूत्रे वाग्रहणमनर्थकम्। पीलाशब्दात् अपत्यार्थे 'द्व्यचः' (सू. ४-१-१२१) इति अणपवादे ढकि प्राप्ते तदपवादतया पुनरण् विकल्पेन विधीयते 'पीलाया वा' इति सूत्रेण। यद्यपवादविषयेष्वप्यण् स्यात् वाग्रहणं अथवा एतत्सूत्रमप्यन्तरेण अण्ढकोः विकल्पेन समावेशसिद्ध्या सूत्रं व्यर्थं भवेदिति अपवादविषये अण् न भवतीति ज्ञाप्यते। अतः इञादिविषये अणो न प्रसक्तिरिति भावः।

[ज्ञा.] प्राक् ठकः इति वक्तव्ये 'प्राग्दीव्यतः' (सू. ४-१-८३) इत्युक्तिर्ज्ञापयति अर्थेभ्यमिति।

[वि.] ननु 'प्राग्दीव्यतः' इत्यस्य स्थाने 'प्राक्ठकः' इत्येव लाघवात् कुतो नोक्तम्। ठक्शब्देन च 'प्राग्वहतेष्ठक्' (सू. ४-४-१) इति सूत्रं परामृश्यते इत्याशङ्क्य—प्राग्दीव्यतो येऽर्थाः तेभ्यण् भवतीति ज्ञापनार्थं प्राग्दीव्यत इत्युक्तम्। तेन 'प्राग्दीव्यतः' (सू. ४-४-२) इति सूत्रपूर्वभाविठगर्थेऽप्यण् भवतीति लभ्यते। तत्र च प्राक् ठक इत्युक्ते ठभ्विषये अण् न प्राप्नुयादिति प्राग्दीव्यत इत्युक्तिश्चरितार्था। एवं ज्ञापनस्य प्रयोजनं तु समानेऽर्थे एकस्याः प्रकृतेर्द्वयोः अणञ्प्रत्ययोः प्रसक्तौ प्रकृत्यन्तरे सावकाशस्याणः इञ् बाधक इति

बाध्यबाधकभावो निर्णीतो भवतीति इत्याशयवानाह—**प्राक् ठक इति वक्तव्य इति। अयमिति।** अणित्यर्थः।

[ज्ञा.] यूनि लुक् (सू. ४-१-९०)॥ 'गोत्रोक्षोष्ट्र' (सू. ४-२-३९) इति वुञ्विधौ राजन्यमनुष्यग्रहणं ज्ञापकं लौकिकं परं गोत्रमिति। युवा च लोके गोत्रमित्युपचर्यते। किं-गोत्रोऽसि माणवक ! गार्ग्यायणः।

[वि.] 'यूनि लुक्' इति सूत्रस्य प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षिते युवप्रत्ययस्य लुग्भवति, तस्मिन्निवृत्ते सति यो यतः प्राप्नोति स ततो भवतीत्यर्थः। तस्य प्रयोजनपरिगणनवेलायां 'इञ्ण्यौ सर्वत्र' इति वार्तिकं प्रवृत्तम्। इञः उदाहरणम् औपगवीयाः इति। अत्र उपगोरपत्यमित्यण् औपगवः, ततः युवापत्ये इञि औपगविः, ततः छप्रत्यये विवक्षिते आदौ इञः युवप्रत्ययस्य लुक्, तस्मिन् लुप्ते छप्रत्ययः औपगवीयाः इति सिध्यति। अत्र लुकः किं प्रयोजनम्? इञ्यलुप्तेऽपि वृद्धलक्षणे छे औपगवीया इति रूपसिद्धेरित्याशङ्कायां भाष्यकारेण—'वृद्धवदतिदेशे सति इञो गोत्र इत्यण् प्राप्नोति' इति प्रोक्तम्। तस्यायमर्थः—'प्राग्दीव्यतोऽधिकारे यूनो वृद्धवदतिदेशः' इति वार्तिकेन युवप्रत्ययस्य गोत्रवत्कार्यातिदेशात् इञो लुगभावे 'इञो गोत्रे' (सू. ४-२-११२) इत्यण् प्राप्नुयात्। अस्माभिस्तु छप्रत्यय इष्यते। अतः इञो लुग्वक्तव्यः इति। तदुपरि 'नैष दोषः, प्रत्याख्यायतेऽसावतिदेशः' इति भाष्यम्। तथा च यूनो गोत्रवदतिदेशाभावात् इञः लुगभावेऽपि 'इञो गोत्रे' इत्यण् न भविष्यति, अपि तु वृद्धलक्षणश्छ एव भविष्यतीतीष्टसिद्धेः 'यूनि लुक्' इति लुकः औपगवीया इत्येतदुदाहरणं न भवितुमर्हतीति भाष्याशयः।

ततः यदि यूनो वृद्धवदतिदेशः (गोत्रवदतिदेशः) प्रत्याख्यायते तदा गोत्रवदतिदेशस्य यानि प्रयोजनान्युक्तानि तेषां कथं सिद्धिः इति शङ्कायां—'तानि ज्ञापकेन सिद्धानि' इति भाष्यकृता अभिहितम्। अयमत्राशयः—गार्ग्यायणानां

समूहः गार्ग्यायणकम्, गार्ग्यायणकानां किंचिद्गार्ग्यायणकम्, गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः, गोत्राश्रये वुञ् यथा स्यादिति यूनो वृद्धवदतिदेशस्य प्रयोजनान्युक्तानि। तत्र प्रथमे उदाहरणे गर्गस्यापत्यं गोत्रं गार्ग्यः गर्गादिभ्यो यञ्। गार्ग्यस्यापत्यं युवा गार्ग्यायणः 'यञिञोश्च' (सू.४-१-१०१) इति फक्। ततः समूहार्थे 'गोत्रोक्षोष्ट्रोरभ्र' (सू. ४-१-३९) इति वुञ्, गार्ग्यायणकम् इति रूपं भवति। अत्र फकः युवप्रत्ययस्य गोत्रवद्भावे सत्येव ततः 'गोत्रोक्षोष्ट्रोरभ्र' इति सूत्रेण समूहार्थे वुञ् भवेत् इति। एतच्च अतिदेशस्य प्रयोजनं ज्ञापकेन साधयित्वा अतिदेशः प्रत्याख्यातः। तथा हि—'गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्' (४-२-३९) इति सूत्रे राजन्यमनुष्यशब्दौ शास्त्रीयगोत्राभिधायिनौ। 'राजश्वशुराद्यत्' इति सूत्रे 'गोत्रे कुञ्जादिभ्यः' (सू. ४-१-९८) इत्यतः गोत्रग्रहणानुवृत्त्या राज्ञः गोत्रापत्यमित्यर्थे राजशब्दात् यति राजन्यशब्दः सिध्यति। 'मनोर्जातावञ्यतौ' (सू. ४-१-१६१) इति सूत्रेण यत्प्रत्यये मनुष्यशब्दः सिध्यति। तत्र 'गोत्रोक्षोष्ट्रो' इति सूत्रे गोत्रग्रहणेनैव राजन्यमनुष्याभ्यां वुञः सिद्धेः किं पृथक् राजन्यमनुष्यग्रहणेन। गृहीतौ तु ज्ञापयतः अपत्यधिकारादुत्तरं गोत्रग्रहणं लौकिकगोत्रपरमिति। लौकिकं च गोत्रमपत्यमात्रम्। किंगोत्रोऽसि माणवक! गार्ग्यायण इत्यादौ युवापत्येऽपि गोत्रशब्दस्य लोके प्रयोगात्। राजन्यमनुष्यशब्दौ च लौकिके प्रयोगे जातिविशेषवाचिनौ लौकिकगोत्राभिधायिनौ न भवत इति गोत्रग्रहणेन ग्रहीतुमशक्यत्वात् तयोः पृथग्ग्रहणम्। इत्थं च गार्ग्यायणशब्दस्य युवापत्यार्थकफक्प्रत्ययान्तस्यापि लौकिकगोत्रार्थकत्वात् गोत्रवद्भावातिदेशं विनापि गोत्रग्रहणेन ग्रहणात् ततः समूहार्थे 'गोत्रोक्षो' इति सूत्रेण वुञः सिद्धत्वात् अतिदेशः प्रत्याख्यायत इति।

तदेतत् सर्वं मनसिकृत्याह—**इति वुञ्विधावित्यादिना। परमिति।** अपत्याधिकारादुत्तरमित्यर्थः।

[ज्ञा.] अनृष्यानन्तर्ये (सू.४-१-१०४)॥ **ऋषावनन्तरे नेत्यर्थः। गोत्र इत्यधिकारात् सिद्धे यदिमं प्रतिषेधं शास्ति**

तज्ज्ञापयति बिदादिषु येऽनृषयः (कथ्यन्ते) [पठ्यन्ते] तेषामनन्तरेऽपि वृत्तिर्भवतीति ।

[वि.] ननु 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' (सू. ४-१-१०४) इति यथाश्रुतसूत्रात् बिदादिभ्योऽपत्यार्थेऽञ्प्रत्ययो भवति । ऋषीणामानन्तर्ये अव्यवधाने तु न भवतीति अर्थः प्रतीयते । तथा सति कुशिकस्य गोत्रापत्यमित्यर्थे कुशिकशब्दादञि कौशिक इति रूपमिष्यते, तन्न सिध्यति । कुशिकोऽपि ऋषिः तस्य पुत्रः गाधिरपि ऋषिः तस्य पुत्रः विश्वामित्रोऽपि ऋषिः इति ऋषीणामव्यवधानस्य सद्भावेन अनृष्यानन्तर्य इति निषेधादित्याशङ्क्याह— **ऋषावनन्तरे नेति** । अनन्तरमेवानन्तर्यम् । ऋषावित्यवधेरधिकरणत्वविवक्षया सप्तमी । तथा च ऋषिभ्योऽनन्तरापत्ये अञ्प्रत्ययो न भवतीति अनृष्यानन्तर्ये इत्यस्यार्थः । कुशिकशब्दाद्गोत्रापत्ये अञो न कोऽप्युपरोध इति भावः ।

ननु 'गोत्रे कुञ्जादिभ्यः ञ्चफञ्' (सू. ४-१-९८) इति सूत्रात् गोत्रे इत्यस्यास्मिन् सूत्रेऽनुवृत्त्या गोत्रापत्य एवेदं सूत्रं प्रवर्तते । तत्रानन्तरापत्ये प्रसक्त्यभावात् अनृष्यानन्तर्य इति वचनमनर्थकमित्याशङ्क्याह— **गोत्र इत्यधिकारादिति** । बिदादिगणे ऋषयः अनृषयश्च पठ्यन्ते । तत्रानृषिभ्यः अनन्तरापत्येऽप्यञ् भवतीति ज्ञापनार्थमनृष्यानन्तर्य इत्युक्तम् । तेन ननान्दुरनन्तरापत्यमित्यर्थे नानान्द्र इति अञ् सिध्यति । एवं पौत्रः दौहित्र इत्यपि सिध्यति । बिदादिगणपठितेभ्यः ऋषिवाचकशब्देभ्यस्तु गोत्रापत्य एवाञ् इति विषयव्यवस्था लभ्यत इति भावः ।

[ज्ञा.] आरगुदीचाम् (सू. ४-१-१३०) । रका सिद्धे आरग्वचनम् अन्यतोऽप्ययमिति ज्ञापयति ।

[ज्ञा.] ननु गोधाशब्दात् 'गोधाया ढ्रक्' (सू. ४-१-१२९) इति सूत्रेण अपत्यार्थे ढ्रकं विधाय 'आरगुदीचाम्' (सू. ४-१-१३०) इति सूत्रेण उदीचां मते आरग्विहितः । गौधार इति रूपम् । अत्र गोधाशब्दस्या-

कारान्तत्वात् ततः रक्प्रत्ययेनापि गौधार इति रूपसिद्धेः आरक्प्रत्ययविधानमनर्थकमित्याशङ्क्याह—**रका सिद्ध** इति। अनाकारान्तेभ्योऽपि शब्देभ्यः आरगिष्यते यथा मौण्डारः जाण्डारः पाण्डार इति। रक्प्रत्ययान्ततया तु ते न सिध्यन्तीत्यारग्वचनमिति भावः।

[ज्ञ.] अतश्च (सू. ४-१-१७७) ॥ अत इति तदन्ताग्रहणम्, अवन्त्यादिभ्यो लुग्वचनात्।

[वि.] ननु 'अतश्च' इति सूत्रे अत इत्यस्य तद्राजविशेषणत्वात्तदन्तविधौ सत्यां अकारान्तस्य तद्राजसंज्ञकपत्ययस्य स्त्रियां लुग्भवतीत्यर्थो लभ्यते। ततश्च आम्बष्ठस्यापत्यं सौवीरस्यापत्यमित्यर्थे जनपदक्षत्रियोभयवाचिनः आम्बष्ठशब्दात् सौवीरशब्दाच्च 'वृद्धेत्कोसलाजादाञ्ञ्यङ्' (सू. ४-१-१६९) इति सूत्रेण ञ्यङि तस्य ञ्यङः अकारान्तत्वेन आम्बष्ठ्या सौवीर्या इत्युभयत्रापि 'अतश्च' (सू. ४-१-१७७) इति लुक् प्राप्नोतीत्याशङ्क्याह—**अत इति तदन्ताग्रहणमिति**। तथा च 'अतश्च' इति सूत्रे तदन्तविधिर्न भवति। अकाररूपस्य तद्राजस्य स्त्रियां लुक् इत्येव सूत्रार्थः। शूरसेनी इत्यादिकमुदाहरणम्। शूरसेनशब्दादञि तस्य लुग्भवति। ञ्यङस्तु अकारान्तत्वेऽपि अकाररूपत्वाभावान्न लुगिति भावः। तदन्तग्रहणं न भवतीत्यत्र ज्ञापकमाह—**अवन्त्यादिभ्यो लुग्वचना**दिति। 'स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' (सू. ४-१-१७४) इति सूत्रेण अवन्त्यादिभ्यः परस्य तद्राजस्य ञ्यङः लुग्विधीयते। यदि 'अतश्च' इति सूत्रे तदन्तविधिना अकारान्तस्य तद्राजस्यापि लुग्विधीयेत तदा अवन्त्यादिभ्यः परस्य ञ्यङोऽपि 'अतश्च' इत्येनेनैव लुकि सिद्धे 'स्त्रियामवन्ति' इति सूत्रं किमर्थम्। कृतं च तत्सूत्रं 'अतश्च' इति सूत्रे तदन्तविधिर्नास्तीति ज्ञापयतीति भावः।

[ज्ञा.] 'न प्राच्यभर्गादियौधेयादिभ्यः' (सू. ४-१-१७८) इति प्रतिषेधो ज्ञापको भवति पर्श्वादिभ्यो लुगिति।

[वि.] 'अतश्च' (सू. ४-१-१७७) इति सूत्रे 'पर्श्वादिभ्यो लुग्वक्तव्यः। 'पर्शूः' इति भाष्यम्। तस्यायमर्थः पर्शोरपत्यं स्त्रीत्यर्थे पर्शुशब्दात् 'व्यन्मगध' (सू. ४-१-१७०) इति सूत्रेणाण्। तस्य 'अतश्च' (सू. ४-१-१७७) इति लुक्। ततः 'पर्श्वादियौधेयादिभ्योऽणञौ' (सू. ५-३-११७) इति स्वार्थेऽण्। तस्य च भिन्नप्रकरणस्थत्वात् अप्राप्तो लुगनेन भाष्येण विधीयते। ततः 'ऊङुतः' इत्यूङ् पर्शूरिति रूपसिद्धिरिति। इदं वचनं ज्ञापकेनैव लुक्सिद्धेः अनावश्यकमित्याशयेनाह—**न प्राच्येत्यादिना**। यौधेयादिगणपठितेभ्यः शब्देभ्यः परस्य अकारस्य तद्राजस्य लुक् प्रतिषिध्यते। 'न प्राच्यभर्गादियौधेयादिभ्यः' (४-१ १७८) इति सूत्रेण। यौधेयीत्युदाहरणम्। युधाया अपत्यं स्त्रीत्यर्थे 'द्व्यचः' (सू. ४-१-१२१) इति ढक्। ततः स्वार्थेऽञ् (५-३-११७) तस्य लुकि प्रतिषिद्धे अञन्तलक्षणे ङीनि 'शार्ङ्गरवाद्यञो ङीन्' (सू ४-१-७३) इत्यनेन कृते यौधेयीति भवति। यदि पाञ्चमिकस्यापि तद्राजस्य 'अतश्च' इति लुङ् न स्यात् तदा प्रसक्त्यभावात् यौधेयादिभ्यो विहितस्याञो लुक्प्रतिषेधविधानमनर्थकं स्यादिति स प्रतिषेधः पर्श्वादिभ्यः परस्य अकारस्य लुग्भवतीति ज्ञापयतीत्यर्थः।

ननु यौधेयशब्दात् ढक्प्रत्ययान्तात् अञं विनापि 'टिड्ढाणञ्' (सू. ४-१-१५) इति ङीपि यौधेयीति रूपसिद्धेः अत्र अञः का आवश्यकता इति चेन्न। ङीपि सति उदात्तनिवृत्तिस्वरेणान्तोदात्तं पदम्, ङीनि त्वाद्युदात्तमिति स्वरे भेदसद्भावादित्याशयात्।

॥ इति चतुर्थाध्यायस्य प्रथमः पादः ॥

[ज्ञा.] तदस्मिन्नस्तीति देशे (सू. ४-२-६७)॥ 'तदस्यास्त्यस्मिन्' (सू. ५-२-९४) इति द्विस्तद्ग्रहणाकरणात् क्वचिदेकयोगेऽप्यनुवृत्तिर्भवतीति ज्ञाप्यते। 'तदधीते तद्वेद' (सू.४-२-५९) इति तु प्रमादकृतमाचार्यस्य शक्यमकर्तुम्।

[वि.] ननु चातुरर्थिकप्रकरणस्यादौ 'तदस्मिन्नस्तीति देशे तन्नाम्नि' (सू. ४-२-६७) 'तेन निर्वृत्तम्' (सू. ४-२-६८) 'तस्य निवासः' (सू.४-२-६९) 'अदूरभवश्च' (सू. ४-२-७०) इति चत्वारि सूत्राणि अर्थचतुष्टयप्रतिपादकानि पठ्यन्ते। तत्र किमिमानि चत्वार्यपि मिलित्वा एकं सूत्रम् उत पृथक् पृथक् इमानि चत्वारि सूत्राणि इति कंचिद्विचारं प्रस्तुतवान् भाष्यकारः। 'देशे तन्नाम्नी' त्यस्य 'तदस्मिन्नस्तीति' 'तेन निर्वृत्तं' 'तस्य निवासः' 'अदूरभवश्च' इति चतुर्ष्वपि संबन्धो भवति। तदस्मिन्नस्तीत्यर्थे अणादयो भवन्ति प्रत्ययान्तेन प्रकृतिनामके देशे गम्ये, तेन निर्वृत्तमित्यर्थे तृतीयान्तादणादयो भवन्ति तन्नाम्नि देशे गम्ये, तस्य निवास इत्यर्थे षष्ठ्यन्तादणादयो भवन्ति तन्नाम्नि देशे गम्ये, तस्य अदूरभव इत्यर्थे षष्ठ्यन्तादणादयो भवन्ति तन्नाम्नि देशे गम्ये इति क्रमेण चतुर्णामर्थः। उदुम्बराः सन्त्यस्मिन् देशे औदुम्बरः, कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी, शिबीनां निवासो देशः शैबः, विदिशायाः अदूरभवं नगरं वैदिशम् इत्युदाहरणानि। तत्र चतुर्णां मिलित्वा एकसूत्रत्वमिति पक्षे 'देशे तन्नाम्नि' इत्यस्य चतुर्ष्वेवयवेषु संबन्धो न स्यात्। न ह्येकयोगघटकस्यावयवस्य तद्घटकावयवान्तरेऽनुवृत्तिः संभवति। तथा सति 'तदधीते तद्वेद' (सू. ४-२-५९) इति सूत्रे द्वितीयतच्छब्दस्य व्यर्थत्वात्। प्रथमतत्पदस्यैव वेद इत्यत्राप्यनुवृत्त्या इष्टलाभात् इत्याशङ्क्याह— **तदस्यास्त्यस्मिन्नितीति।** अयमाशयः। 'तदस्यास्त्यस्मिन्निति मतुप्' (५-२-९४) इति सूत्रे 'तत्' इत्यस्य अस्मिन्नित्यत्राप्यनुवृत्तिं स्वीकृत्य तदस्मिन्नित्यर्थे मतुप् इति व्याख्यानमिष्यते। अत्र एकस्मिन्नेव सूत्रे तद्घटकभागान्तरे अस्मिन्नित्यत्र तद् इत्यस्यानुवृत्तिरिष्यते। एकयोगेऽनुवृत्त्यभावे हि

तदस्यास्ति तदस्मिन्निति मतुप् इति द्विस्तद्ग्रहणं कुर्यात्। यतस्तथा न करोति अतो ज्ञापयति एकसूत्रेऽप्यस्त्यनुवृत्तिरिति।

नन्वेवं सति 'तदधीते तद्वेद' (४-१-५९) इति सूत्रे द्वितीयतत्पदं व्यर्थमित्याशङ्क्येष्टापत्तिरित्याह—**तदधीते** इति। **प्रमादकृतमिति**। शिष्याणां सुखावबोधाय लाघवं प्रत्यनवधानलक्षणेन प्रमादेन कृतमित्यर्थः इति कैयटः।

[ज्ञा.] (कर्त्रादिभ्यो) [कत्र्यादिभ्यो] (सू. ४-१-९५)॥ अत्र ग्रामादित्यनुवर्त्त्य ग्रामाच्चेति वक्तव्यमिति प्रत्याख्यातम्।

[वि.] 'कत्र्यादिभ्यो ढकञ्' इति सूत्रे 'ग्रामाच्चेति वक्तव्यम्। ग्रामेयक' इति वार्तिकम्। एतत्प्रत्याख्यातं भाष्ये—'तर्हि वक्तव्यम्। न वक्तव्यम्। कत्र्यादिभ्यो ढकञित्यत्र ग्रामादित्येतदनुवर्त्तिष्यते' इति। तदाह—अत्र **ग्रामादित्यनुवर्त्तेति**। 'ग्रामाद्यखञौ' (सू. ४-२-९४) इति सूत्रादिति शेषः।

॥ इति चतुर्थाध्यायस्य द्वितीयः पादः ॥

[ज्ञा.] विभाषा पूर्वाह्ण (सू. ४-३-२४)॥ 'घकालतनेषु' (सू. ६-३-१७) इत्यलुग्वचनं ज्ञापयति सुबन्तात्तद्धितोत्पत्तिः इति। यद्यपि सामर्थ्यं सुबन्तेनैव तथापि प्रातिपदिकाधिकारात् तत एव संभाव्येतेत्यतो ज्ञापकसाध्यमेतत्।

[वि.] 'विभाषा पूर्वाह्णापराह्णाभ्याम्' इति सूत्रेण पूर्वाह्णापराह्ण-शब्दाभ्यां विभाषा ट्युट्युलौ प्रत्ययौ तयोस्तुडागमश्च विधीयन्ते। पूर्वाह्णेतनम् अपराह्णेतनम् इत्युदाहरणम्। अत्र पूर्वाह्णापराह्णाभ्यां सप्तमीश्रवणार्थं तयोः सुबन्तत्वं वक्तव्यमिति वार्तिककारः अकथयत्। तस्य च 'ङ्याप्प्रातिपदिकात्' (सू. ४-१-१) इत्यधिकारात् प्रातिपादिकादेव तद्धित इत्याशयः। भाष्यकारस्तु सुबन्तात् तद्धितोत्पत्तिं ज्ञापकेन प्रसाध्य वार्तिकं प्रत्याचख्यौ। तदाह— **घकालतनेष्विति।** 'घकालतनेषु कालनाम्नः' (सू. ६-३-१७) इति सूत्रेण कालवाचकशब्दात् परस्याः सप्तम्याः घकालतनेषु परतः अलुग्वचनात् सुबन्तात तद्धितोत्पत्तिरिति ज्ञाप्यते। कथमन्यथा सप्तम्या एवाभावात् लुकः अलुको वा प्रसक्तिः इति भावः। **ननु न ज्ञापकसाध्यमेतत्।** 'समर्थानां प्रथमा'दित्यधिकारे तद्धितविधानात् 'किं पुनः समर्थम् अर्थाभिधाने यच्छक्तं कृतवर्णानुपूर्वीकं पदम्' इति समर्थसूत्रे भाष्योक्त्या सुबन्तपदादेव तद्धितोत्पत्तिलाभादित्यत्राह— **यद्यपीति। तथापीत्यादि।** ङ्याप्प्रातिपदिकादित्यप्यनुवर्तते तद्धितप्रकरणे। अतस्तदनुगुणतया समर्थशब्दार्थो वक्तव्यः। स च यत् सुपि सति अर्थबोधे शक्तं तत्समर्थमिति। तथा च सुपि सति अर्थबोधे शक्तात् प्रथमात् प्रातिपदिकात् तद्धित इत्यर्थः। ततश्च प्रातिपदिकाभ्यां पूर्वाह्णापराह्णाभ्यां ट्युट्युलोः सतोः सप्तमीश्रवणं न स्यादिति पूर्वोक्तज्ञापकमहिम्ना सुबन्तात् तद्धितोत्पत्तिं प्रसाध्य 'घकालतनेषु' इत्यनेन अलुका सप्तमीश्रवणं समर्थनीयमिति भावः।

[ज्ञा.] तस्य व्याख्यान (सू. ४-३-६६)॥ व्याख्यानं शब्दग्रन्थविषय एव प्रसिद्धमिति भाष्ये।

[वि.] ननु 'तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः' इति सूत्रेण व्याख्यातव्यवाचिनः षष्ठ्यन्तात् व्याख्यानेऽभिधेये यथाप्राप्तं तद्धितो भवतीति कथनात् सुपां व्याख्यानः सौपो ग्रन्थ इत्यादाविव पाटलिपुत्रस्य व्याख्यानी सुकोसला इत्यादावपि तद्धितः स्यात्। यादृशः सुकोशलायां प्राकारादिसन्निवेशः तादृशः पाटलिपुत्रे इत्येवं पाटलिपुत्रं सुकोसलया व्याख्यायत इति सूत्रप्रवृत्तियोग्यतायाः सद्भावादित्याशङ्क्य, व्याख्यातव्यनाम्न इत्यत्र नामग्रहणात् व्याख्यातव्यत्वेन प्रसिद्धस्य शब्दात्मकस्य ग्रन्थस्य यन्नाम तत एव तद्धितः अतो नोक्तदोष इत्याशयवानाह—**व्याख्यानं शब्दग्रन्थविषय एवेति**। शब्दात्मको यो ग्रन्थः तद्विषय एवेत्यर्थः। एवकारेण अशब्दात्मकपाटलिपुत्रादेः व्यवच्छेदः।

[ज्ञा.] वासुदेवार्जुना (सू. (४-३-९८)॥ अयमेव निर्देशो ज्ञापयति अभ्यर्हितं पूर्वमिति। वासुदेवेति च तत्र भगवतः संज्ञा।

[वि.] ननु 'वासुदेवार्जुनाभ्यां वुन्' इति सूत्रे अर्जुनवासुदेवाभ्यामिति निर्देष्टव्यम्। अर्जुनशब्दस्य वासुदेवशब्दापेक्षया अल्पाच्तरत्वेन 'अल्पाच्तरम्' (सू. २-२-३४) इति सूत्रेण पूर्वनिपातप्राप्तेरित्याशङ्क्याह—**अयमेवेति**। न केवलम् अल्पाच्तरं पूर्वं प्रयुज्यते किंतु बह्वचोऽपि अभ्यर्हितस्य पूर्वं प्रयोगो भवतीति ज्ञापनार्थमेवं निर्देशः। अर्जुनवासुदेवयोर्मध्ये वासुदेवोऽभ्यर्हितः, तस्य परमात्मत्वात्। अतः भगवद्रूपश्रेष्ठवाचिनो वासुदेवशब्दस्य पूर्वनिपातो युक्त इति भावः। तेन तापसगिरी इत्यादि सिध्यति।

[ज्ञा.] अनुदात्तादेश्च (सू. ४-३-१४०)॥ भिक्षादिषु गर्भिणीशब्दपाठो ज्ञापयति यावत्येव द्वितीयस्वरस्य प्रादुर्भावस्तावत्येव पूर्वनिघातः (प्रतीक्षेत) [प्रवर्तेत]। तर्हि गर्भशब्दादाद्युदात्तादिनि ततो ङीपि तदन्तादणेव प्राप्नोति

नानुदात्तलक्षणोऽञिति तद्वैयर्थ्यं स्पष्टमेव। पदग्रहणं परिमाणार्थम् वाक्यस्य मा भूदिति।

[वि-] 'अनुदात्तादेश्च' इति सूत्रस्य अनुदात्तादेः प्रातिपदिकात् विकारावयवयोरर्थयोरञ्प्रत्ययो भवतीत्यर्थः। दाधित्थं कापित्थमित्यादिकमुदाहरणम्। तत्र च सूत्रे 'अनुदात्तादेरञो विधाने आद्युदात्तान्ङीष उपसंख्यानम्' इति वार्तिकम्। तस्य चायमर्थः—आद्युदात्तप्रकृतिकङीषन्तादप्यञ् भवति विकारावयवयोरर्थयोरिति वक्तव्यमिति। कुवल्या विकारः कौवलमित्युदाहरणम्, कुवलशब्दो 'ग्रामादीनां च' (फिट्सूत्र) इत्याद्युदात्तः ततः गौरादित्वान्ङीष्। ततः विकारे अञ्।

ननु आद्युदात्तात्कुवलशब्दान्ङीषि ङीषः प्रत्ययस्वरेण उदात्तत्वे शेषनिघातेन कुवलीशब्दस्यानुदात्तत्वं वर्तत इति सूत्रेणैवात्र अञः सिद्धेः वार्तिकस्य का आवश्यकतेति चेन्न। ङीषः उदात्तत्वेऽपि शेषनिघातस्यात्राप्रवृत्तेः। 'अनुदात्तं पदमेकवर्जम्' (सू. ६-१-१५८) इति हि, अत्र शेषस्यानुदात्तो वक्तव्यः। तच्च सूत्रं पदविषयम्। कुवलीशब्दश्च न पदम्, सुबन्तत्वाभावात् इत्याशयात्।

तदुपरि 'न वा समर्थस्यानुदात्तादित्वात्' इति वार्तिकम्। तस्य चायमर्थः—'अनुदात्तादेः' इत्येतत् न ङ्याप्प्रातिपदिकात् इत्यस्य विशेषणम्। येन कुवलीशब्दस्य ङ्यन्तस्य पूर्वोक्तरीत्या अनुदात्तादित्वं नास्तीति कथं ततः अञ् स्यादिति शङ्काया अवसरो भवेत्। अपि तु समर्थस्य विशेषणम्। समर्थं च सुबन्तमेव। ततश्च अनुदात्तादेः सुबन्तात् अञ् इति सूत्रार्थः। अतः कुवलीशब्दात् सुबुत्पत्त्यनन्तरं सुबन्तादञ्। सुबन्तस्य च पदत्वात् 'अनुदात्तं पदमेकवर्जम्' इति सूत्रप्रवृत्त्या ईकार एकः उदात्तः अन्यत्सर्वमनुदात्तमिति कुवली ङस् इत्यस्य अनुदात्तादित्वसद्भावात् ततः अञि कौवल इति रूपं सिध्यति सूत्ररीत्यैवेति।

भाष्यकारस्तु अनुदात्तादेरित्येतत् ङ्याप्प्रातिपदिकादित्यस्यैव विशेषणम्, न सुबन्तादित्यस्य। तथा सति वाचो विकारः इत्यत्रापि 'सावेकाचः' (सू. ६-१-१८६) इति विभक्तेरुदात्ततया सुबन्तस्यानुदात्तादित्वादज् प्राप्नुयात्। तर्हि कुवली इति ङ्यन्तस्य पदत्वाभावेन शेषनिघाताप्राप्त्या अनुदात्तादित्वाभावात् कथं ततः अज् सिध्येदिति शङ्कायां एवं समाधीयते। कस्मिंश्चित् शब्दे यावत्येव द्वितीयस्य स्वरस्य प्रादुर्भावः तावत्येव पूर्वप्रवृत्तस्य स्वरस्य स्थाने अनुदात्तो भवतीत्याश्रीयते। कुवलशब्दः 'ग्रामादीनां च' इति आद्युदात्तः। ततः ङीषि ईकारस्य उदात्तः। अस्मिन् द्वितीये स्वरे प्रादुर्भूते पूर्वस्याद्युदात्तस्य निवृत्तिः अनुदात्तश्च भवति। तथा च कुवलीशब्दस्यानुदात्तादित्वात् सूत्रेणैव अज् सिध्यति। यावत्येव द्वितीयस्य स्वरस्येत्याद्याश्रयणे किं प्रमाणमिति चेत् — भिक्षादिषु गर्भिणीशब्दपाठ इति गृहाण। गर्भिणीनां समूह इत्यर्थे 'अनुदात्तादेरञ्' (सू. ४-२-४४) इत्यञि प्राप्ते तदपवादतया अण्सिद्ध्यर्थं भिक्षादिगणे (सू. ४-२-३८) गर्भिणीशब्दः पठ्यते। यदि पदस्य निघातः तर्हि तत्पाठो व्यर्थः। तथा हि गर्भशब्दः 'अर्तिगृभ्यां मन्' (उ. सू.) इत्युणादिसूत्रेण मन्नन्तत्वात् आद्युदात्तः। ततः इन्। ततः नान्तलक्षणः ङीप्। गर्भिणी इति ङ्यन्तस्य सुबन्तत्वाभावेन पदत्वभावात् 'अनुदातं पदम्' इति सूत्रप्रवृत्तौ आद्युदात्तत्वं गर्भिणीशब्दस्य नापैतीति 'अनुदात्तादेरञ्' इति सूत्राप्रवृत्त्या किं भिक्षादिषु गर्भिणीशब्दस्य अञ्बाधनार्थपाठेन। कृतश्च पाठः ज्ञापयति यावत्येव द्वितीयस्य स्वरस्य प्रादुर्भावः तदैव पूर्वप्रवृत्तस्वरः निघातो भवतीति। तथा च इन्स्वरकाले पूर्वप्रवृत्तः आद्युदात्तः निघातो भवतीति अनुदात्तादित्वलक्षणाञ्प्राप्तौ तद्बाधनाय गर्भिणीशब्दस्य भिक्षादिगणे पाठः चरितार्थः। प्रयोजनं तु कौवल-इत्यादावञ्सिद्धिरिति प्रत्यपादयत्।

सर्वमेतन्मनसिकृत्याह—**भिक्षादिष्विति। यावत्येवेति** यदैवेत्यर्थः। **तावत्येवेति।** तदैवेत्यर्थः। **तर्हीति।** अन्यथेत्यर्थः। **अनुदात्तलक्षणोऽञिति।** 'अनुदात्तादेरञ्' (सू. ४-२-४४) इति सूत्रेणेति शेषः।

तर्हि 'अनुदात्तं पदमेकवर्जम्' (सू. ६-१-१५८) इति सूत्रे पदग्रहणमनर्थकम्। सुबुत्पत्तेः पूर्वमपि द्वितीयस्वरप्राप्तिकाले शेषनिघातस्योपपादितत्वादित्यत आह—**पदग्रहणमिति**। **परिमाणार्थमिति**। यस्य पदत्वं भविष्यति तस्यैव एकवर्जमनुदात्तं यथा स्यात् पदसमूहस्य मा भूदित्येतदर्थं पदग्रहणमिति भावः॥

इति चतुर्थोऽध्यायः।

॥ अथ पञ्चमोऽध्यायः ॥

[ज्ञा.] प्राक्क्रीताच्छः (सू. ५-१-१) ॥ 'असमासे निष्कादिभ्यः' (सू. ५-१-२०)। निष्कादिष्वसमासग्रहणं ज्ञापकं पूर्वत्र तदन्तविधेः प्रतिषेधो नेति।

[वि.] ननु 'असमासे निष्कादिभ्यः' इति सूत्रे असमासग्रहणं व्यर्थम्। न च तदभावे परमनिष्कशब्दात्समासादप्यनेन ठक् स्यात्, ठञेवेष्यते। तथा च परमनिष्कशब्दव्यावर्तनार्थं असमासग्रहणमिति वाच्यम्। ग्रहणवता प्रातिपदिकेन तदन्तविधेः प्रतिषेधात् निष्कादिभ्यो विधीयमानष्ठक् निष्काद्यन्तान्न भविष्यतीति असमासग्रहणमन्तरेणापि परमनिष्कादिव्यावृत्तिसिद्धेरित्याशङ्क्य, एतत्सूत्रात्प्राक्तनेषु सूत्रेषु प्रातिपदिकग्रहणेन तदन्तस्यापि ग्रहणमिति ज्ञापनार्थम् असमासग्रहणम्। तथा च तन्न्यायेनात्र सूत्रेऽपि तदन्तविधिप्राप्तौ परमनिष्कादिभ्योऽपि ठक् स्यादिति तद्वारणार्थमसमासग्रहणं सार्थकम्। ज्ञापनप्रयोजनम् तु 'खलयवमाषतिलवृषब्रह्मणश्च' (सू. ५-१-७) इति सूत्रेण खलादिभ्यो विधीयमानः हितार्थे यत्प्रत्ययः खलाद्यन्तादपि भवति। तेन कृष्णतिलेभ्यो हितः कृष्णतिल्यः राजमाषेभ्यो हितं राजमाष्यमित्यादिकं सिध्यति। सर्वमिदमभिप्रेत्याह— **निष्कादिष्विति।**

[ज्ञा.] विंशतित्रिंशद्भ्याम् (सू. ५-१-२४) ॥ विंशतिकात्खः (सू. ५-१-३२) इति कप्रत्ययान्तोच्चारणं ज्ञापयति भवत्येतत्सूत्रोपात्ताभ्यां कन्निति।

[वि.] ननु 'विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्' इति सूत्रेण आर्हीयेषूर्थेषु विंशतित्रिंशद्भ्यां ड्वुन्प्रत्ययो विधीयते। विंशकः त्रिंशकः इत्युदाहरणम्। तत्रासंज्ञायामित्यनुक्तौ संज्ञायां विषयेऽपि ड्वुन् भवेत्, कनेव तु तत्र विंशतिकः त्रिंशत्कः इत्येवमिष्यते। अतः असंज्ञायामित्युक्तमिति वक्तव्यम्। परं तु प्रत्युदाहरणे विंशतिकः त्रिंशत्कः इत्युभयत्रापि कन्

दुर्लभः। 'संख्याया अतिशदन्तायाः कन्' (सू. ५-१-२२) इति सूत्रे त्यन्तायाः शदन्तायाश्च कन्प्रतिषेधादित्याशङ्क्य, 'विंशतिकात्खः' इति सूत्रे कन्प्रत्ययान्ततया उच्चारणेन विंशतित्रिंशद्भ्यां कन् भवतीति ज्ञापनान्न दोष इत्याह—**कप्रत्ययान्तोच्चारणमिति**। न च विंशतिकशब्द एव सूत्रकारेणोच्चारितः। तेन च विंशतिकशब्दस्य साधुत्वावगमेऽपि त्रिंशत्कशब्दस्य कथं साधुत्वमवगम्येत इति वाच्यम्। विंशतिकशब्देन विंशतिशब्दघटितसूत्रोपलक्षणेन तत्सूत्रोपात्ताभ्यां विंशतित्रिंशद्भ्यामुभाभ्यामपि कन्प्रत्ययस्य ज्ञापनादित्याशयः। योगापेक्षत्वात् ज्ञापकत्वस्येति यावत्।

[ज्ञा.] तत्र तस्येव (सू. ५-१-११६)॥ अस्मादेव ज्ञापकादिवशब्देन सप्तमी भवति।

[वि.] ननु 'तत्र तस्येव' इति सूत्रेण सप्तम्यन्तात् षष्ठ्यन्ताच्च इवार्थे वतिप्रत्ययो विधीयते। मथुरायामिव मथुरावत् सुघ्ने प्राकारः, देवदत्तस्येव देवदत्तवत् यज्ञदत्तस्य गावः इत्यादिकमुदाहरणम्। तत्रेवशब्दयोगे सम्बन्धसामान्ये षष्ठ्याः सम्भवेऽपि इवयोगे केनापि सूत्रेण सप्तम्याः अविधानेन सप्तम्यन्तादिवार्थे वतिविधानं कथं सङ्गच्छत इत्याशङ्क्य, अस्मादेव इवार्थे सप्तम्यन्ताद्वतिविधानात् ज्ञापकात् इवयोगे सप्तमीविभक्तिर्भवतीति ज्ञापनात् न कोऽपि दोष इति समाधत्ते—**अस्मादेवेति। इवशब्देनेति**। योग इति शेषः। ज्ञापनस्य फलं तु देवेष्विव नाम ब्राह्मणेष्विव नाम इत्यादिप्रयोग उपपन्नो भवतीति।

[ज्ञा.] किमिदंभ्याम् (सू. ५-२-४०)॥ एतदेव ज्ञापयति किमिदंभ्यां वतुबिति।

[वि.] ननु 'किमिदंभ्यां वो घः' इति सूत्रं किमिदंभ्यां परस्य वतुपो वकारस्य घत्वं विधत्ते। कियान् इयान् इत्युदाहरणम्। तत्र किमिदंभ्यां वतुपो दुर्लभत्वात् घत्वविधानमसंगतम्। 'यत्तदेतेभ्यः परिमाणे वतुप्' (सू. ५-२-३९) इति सूत्रे यत्तदेतच्छब्देभ्य एव वतुपो विधानादित्या-

शङ्क्याह—**एतदेवेति**। किमिदंभ्यां वतुपोऽभावे तदवयववकारस्य घत्व-विधानमनुपपन्नमिति आदेशविधानान्यथानुपपत्त्या वतुप्प्रत्ययः किमिदंभ्यां भवतीत्यनुमीयत इति भावः।

[ज्ञा.] (षष्ठादे) [षष्ठ्यादे] श्वासं (सू.५-२-५८) ॥ असंख्यादेरित्येतत् ज्ञापयति (भवति) हि [भवतीह] तदन्तविधिरिति। तेनैकविंशतितमः सिद्धः।

[वि.] ननु षष्ठ्यादेश्चासंख्यादेः' इति सूत्रेणासंख्यादेः षष्टिप्रभृतेः संख्यावाचकशब्दात् परस्य डटस्तमडागमो नित्यं विधीयते। षष्टितम इत्यादिकमुदाहरणम्। तत्रासंख्यादेरित्यनुक्तौ एकषष्ठः एकषष्टितमः इत्यत्रापि नित्यं तमडागमः स्यात्, 'विंशत्यादिभ्यस्तमडन्यतरस्यां' (सू. ५-२-५६) इत्यनेन विकल्पेन तु तमडिष्यते इति असंख्यादेरित्यस्य प्रयोजनं वक्तव्यम्। तन्न युक्तम्। ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात् षष्टिशब्देन षष्टिशब्दान्तस्य एकषष्टिशब्दस्य ग्रहणासंभवादेव ततः एतत्सूत्राप्रवृत्तेः इत्याशङ्क्याह-**असंख्यादेरित्येतदिति**। तथा च पूर्वोक्तरीत्या व्यर्थं सत् असंख्यादेरित्येतत् इह तमट्प्रकरणे तदन्तविधिरस्तीति ज्ञापयति। ततश्च एकषष्टिशब्दादपि तदन्तविधिना अनेन सूत्रेण नित्यं डटस्तमडागमप्रसक्तौ तद्वारणार्थं असंख्यादेरिति। एकषष्टिशब्दस्य संख्यावाचकैककशब्दाद्यवयवकत्वेनासंख्यादित्वं नास्तीति न दोषः।

ज्ञापनफलमाह - **तेनैकविंशतितमः सिद्ध** इति। 'विंशत्यादिभ्यस्तमडन्यतरस्यां' (सू. ५-२-५६) इति सूत्रे तदन्तविधिना विंशत्याद्यन्तस्यापि ग्रहणात् एकषष्टिशब्दादपि तेन डटस्तमटि एकषष्टितम इति सिध्यति। डटस्तमट्प्रकरणे तदन्तविध्यभावे तु षष्टिशब्दान्तस्य एकषष्टिशब्दस्य 'विंशत्यादिभ्यः' इति सूत्रे ग्रहणाभावात् डटस्तमट् न स्यात् एकषष्ठ इत्येव रूपं भवेदिति भावः।

[ज्ञा.] सिध्मादिभ्यश्च (सू. ५-२-९७) ॥ अदन्तपिच्छादितुन्दाद्यन्यतरपाठेनैव सिद्धे भेदेन पाठो ज्ञापयति लजन्यतर-

स्यामिति समुच्चय इति। 'केशाद्वोऽन्यतरस्यां' (सू.५-२-१०९) इत्यन्यतरस्यांग्रहणस्य पुनःकरणाच्चेदं समुच्चयार्थम्। द्युद्रुभ्यां नित्यार्थमेके एतदन्यतरस्यांग्रहणमिच्छन्ति विभाषयोर्मध्ये ये विधयस्ते नित्या भवन्तीति।

[वि.] ननु 'सिध्मादिभ्य' इति सूत्रे 'प्राणिस्थादातो लजन्यतरस्यां' (सू. ५-२-९६) इति सूत्रादन्यतरस्यामित्यनुवर्तते। तथा च सिध्मादिभ्यः मत्वर्थेऽन्यतरस्यां लच् भवतीति सूत्रार्थो लभ्यते। एवं सति सिध्यादिगणे यान्यकारान्तानि तेभ्यो विकल्पेन लचि विहिते लजभावपक्षे 'अत इनिठनौ' (सू. ५-२-११५) इति सूत्रेण इनिठनावपि प्राप्नुतः। मतुबेवेष्यते। कथमेतत्सिध्यतीत्याशङ्क्याह - **अदन्तेत्यादिना**। अयमाशयः—निपातानामनेकार्थत्वादत्र सूत्रेऽनुवृत्तः अन्यतरस्यांशब्दः समुच्चयार्थकः न विकल्पार्थकः। अतः अन्यतरस्यांग्रहणेन प्रकृतः मतुप् समुच्चीयते। सिध्मादिभ्यः लच् मतुप् च भवतः इति सूत्रार्थः। अतः इनिठनोः न प्रसक्तिः। समुच्चयार्थोऽयमन्यतरस्यांशब्द इत्यत्र किं ज्ञापकमिति चेत् पिच्छादीनां तुन्दादीनां च पृथक् सूत्रे ग्रहणमिति ग्रहाण। तथा हि - 'तुन्दादिभ्य इलच्च' (५-२-११७) इत्येकं सूत्रम्। तत्र च चत्वारः प्रत्ययाः इष्यन्ते इलच् इनिठनौ मतुप् चेति। यद्यन्यतरस्यांग्रहणानुवृत्त्या प्रत्ययचतुष्टयं सिध्मादिभ्योऽपि भवेत् तर्हि अस्यैवान्यतरस्यांशब्दस्य 'लोमादिपामादिपिच्छादिभ्यः शनेलचः' (सू. ५-२-१००) इति सूत्रेऽप्यनुवृत्त्या पिच्छादिभ्योऽपि चत्वारः प्रत्यया भवेयुः। तथा सति तुन्दादीनां पिच्छादिगणे पाठेनैव तुन्दादिभ्यः 'लोमादिपामादि' इति प्रत्ययचतुष्टयसिद्धेः 'तुन्दादिभ्य इलच्च' इति पृथक्सूत्रमनर्थकम्। यद्वा तुन्दादिगणे पिच्छादीनां पाठेनैव पिच्छादिभ्यः 'तुन्दादिभ्यः इलच्च' इति सूत्रेण प्रत्ययचतुष्टयसिद्धौ 'लोमादिपामादि' सूत्रे पिच्छादिग्रहणमनर्थकम्। एवं चानयोः पिच्छादितुन्दाद्योः पृथक्पाठः पृथग्योगकरणं चायुक्त-

मिति 'सिध्मादिभ्यश्च' इति सूत्रे अन्यतरस्यांशब्दः समुच्चयार्थो न विकल्पार्थ इति ज्ञापयति। तथा च प्रकृतस्य मतुपः समुच्चयेन प्रत्ययद्वयसिद्धावपि प्रत्ययचतुष्टयं तुन्दादिभ्यो न सिध्येदिति पिच्छादिभ्यः पृथक्कृत्य 'तुन्दादिभ्य इलच्च' इति सूत्रं प्रणीतम्। तस्य च इनिठन्भ्यामनन्तरं प्रवृत्तत्वात् चकारेण मतुप् इनिठनौ च समुच्चीयेते इति प्रत्ययचतुष्टयसिद्धिः। सिध्मादिपिच्छादिसूत्रयोस्तु इनिठनोः पूर्वं पाठात् समुच्चयार्थकेनान्यतरस्यांग्रहणेन पूर्वकृतो मतुबेव समुच्चीयत इति तेभ्यः प्रत्ययद्वयमेवेति व्यवस्था सिध्यति। विकल्पार्थकत्वपक्षे तु अभावपक्षे पूर्वेण परेण वा विहिताः सर्वेऽपि प्रत्यया यथाप्राप्तं भवेयुरिति भावः।

'सिध्मादिभ्यश्च' (५-१-९७) इति सूत्रेऽनुवृत्तं अन्यतरस्यांग्रहणं समुच्चयार्थकमित्यत्र ज्ञापकान्तरमुपन्यस्यति **'केशाद्वः'** इत्यादिना। 'केशाद्वोऽन्यतरस्याम्' (सू. ५-२-१०९) इति सूत्रेऽन्यतरस्यांग्रहणं मास्तु। 'प्राणिस्थादातो लजन्यतरस्याम्' (५-२-९६) इत्यतोऽन्यतरस्यांग्रहणानुवृत्त्यैव तत्फलसिद्धेः। अतः व्यर्थं सत् तत् पूर्वत्र अन्यतरस्यांग्रहणं समुच्चयार्थकमिति ज्ञापयति। तथा च तस्य केशाद्व इत्यत्रानुवृत्तौ समुच्चयार्थ एव लभ्येत। विकल्पार्थस्त्विष्यते। तेन इनिठनावपि प्राप्येते। अत एव केशवः केशी केशिकः केशवानिति रूपचतुष्टयं सिध्यति इति भावः।

अन्ये तु - 'केशाद्वोऽन्यतरस्याम्' (सू. ५-२-१०९) इति सूत्रे अन्यतरस्यांग्रहणं 'द्युद्रुभ्यां मः' (सू. ५-२-१०८) इति पूर्वसूत्रस्य नित्यत्वज्ञापनाय। अन्यथा तत्रापि अन्यतरस्याम् इत्यस्यानुवृत्तौ तस्याप्यनित्यत्वापत्तेः। तथा च तत्र सूत्रेऽन्यतरस्यामित्यस्य निवृत्तिं सूचयति। एतदेव विभाषयोर्मध्ये ये विधयस्ते नित्या भवन्तीति शब्दान्तरेणोक्तम्। तथा च 'केशाद्व' इति सूत्रस्थान्यतरस्यांग्रहणस्य प्रयोजनान्तरसद्भावात् तत्कथं समुच्चयार्थे ज्ञापकं भवेदिति वदन्ति। तदनुवदति—**द्युद्रुभ्यां नित्यार्थमेक** इति।

वस्तुतस्तु-'द्युद्रुभ्यां मो नित्यं' इति नित्यपदं संयोज्य नित्यत्वे साधयितुं शक्ये सति तदर्थं उत्तरसूत्रे अन्यतरस्यांग्रहणोपादानमित्येतन्न युज्यते इति

अन्यतरस्यांग्रहणं ज्ञापकमेव। इदमेवास्वारस्यम् **एके** इत्यनेन सूचितमित्यवधेयम्।

[ज्ञा.] एकगोपूर्वात् (सू. ५-२-११८) ॥ नित्यग्रहणं ज्ञापयति प्रागेतस्माद्योगाद्विभाषानुवर्तत इति।

[वि.] ननु 'एकगोपूर्वाट्ठञ् नित्यम्' इति सूत्रे नित्यग्रहणं व्यर्थम्। न च तदभावे 'केशाद्वोऽन्यतरस्यां' (सू. ५-२-१०९) इति सूत्रात् अन्यतरस्यामित्यनुवर्तेत। ततश्च पक्षे मतुबपि स्यादिति तन्निवृत्त्यर्थं नित्यग्रहणमिति वाच्यम्। पूर्वसूत्र एव अन्यतरस्यामित्यस्य निवृत्तेरत्रानुवृत्त्यसम्भवादित्यतः ज्ञापकार्थत्वमाह—**नित्यग्रहण**मिति। यतोऽत्र सूत्रे नित्यग्रहणं कृतं तेन पूर्वसूत्रेऽन्यतरस्यांग्रहणमनुवर्तत इति ज्ञापयति। एवं चात्रापि तदनुवृत्तौ पक्षे मतुप् स्यादिति तन्निवृत्त्यर्थं नित्यग्रहणमिति भावः। ज्ञापनफलं तु 'व्रीह्यादिभ्यश्च' (सू. ५-१-११६)इति सूत्रस्य वैकल्पिकत्वमिति।

[ज्ञा.] प्रशस्यस्य श्रः (सू. ५-३-६०) ॥ अजाद्योरेतदादेशविधानं ज्ञापयत्येतेभ्योऽगुणवचनेभ्योऽप्यजादी इति।

[वि.] ननु 'प्रशस्यस्य श्रः' इति सूत्रे 'अजादी गुणवचनादेव' (सू. ५-३-५८) इति सूत्रात् अजादी इत्यनुवर्त्य तत् सप्तम्यन्ततया विपरिणम्य अजाद्योः प्रत्यययोः परतः प्रशस्यशब्दस्य श्रादेशो भवतीति सूत्रार्थो वर्ण्यते। अजादी प्रत्ययौ च इष्ठन्नीयसुनौ। तत्र प्रशस्यशब्दस्य गुणवाचकत्वाभावात् 'अजादी गुणवचनादेव' इति सूत्रविहितौ इष्ठन्नीयसुनौ दुर्लभाविति तयोः परतः प्रशस्यस्य श्रादेशविधानं न सङ्गच्छत इत्याशङ्क्य, अत एवागुणवाचकेभ्योऽपीष्ठन्नीयसुनौ भवत इति ज्ञापयति। ततश्च अगुणवचनादपि प्रशस्यशब्दादिष्ठेयसुनोः सम्भवात् तयोः परतः श्रादेशविधानं उपपद्यते इत्याशयवानाह—**अजाद्योरिति**। इष्ठन्नीयसुनोः परत इत्यर्थः। **एतदादेशविधानमिति**।

श्रादेशविधानमित्यर्थः । उपलक्षणमेतत् ज्याद्यादेशविधानस्यापि । **एतेभ्य** इति । प्रशस्यवृद्धादिभ्य इत्यर्थः ।

[ज्ञा.] 'णचः स्त्रियाम्' (सू. ५ ४-१४) ॥ अत्र स्त्रीग्रहणं ज्ञापयति स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्त इति ।

[वि.] ननु 'णचः स्त्रियामञ्' इति सूत्रे णजन्तात् स्वार्थे अञ्प्रत्ययो विधीयते स्त्रियां विषये । स्त्रियामित्येतत् अञ्प्रत्ययेऽन्वेति । तत्र स्त्रियामिति व्यर्थम् । 'कर्मव्यतिहारे णच् स्त्रियां' (सू. ३-३-४३) इति सूत्रेण स्त्रियां णचो विधानात् णजन्तत्वात् स्वार्थे विधीयमानोऽञपि 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्त' इति न्यायेन स्त्रियामेव भविष्यतीति इत्याशङ्क्य, एवं तर्हि सिद्धे सति यत् स्त्रीग्रहणं करोति तज्ज्ञापयति स्वार्थिकाः प्रत्यया: प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते च इति । अतः लिङ्गान्तरप्रसक्तौ तद्व्यावर्तनेन अञन्तस्य स्त्रीत्वसिद्ध्यर्थं स्त्रियामिति उक्तं इत्याशयेनाह—**अत्र स्त्रीग्रहणमिति ।** ज्ञापनफलं तु गुडकल्पा द्राक्षा तैलकल्पा प्रसन्ना पयस्कल्पा यवागूरित्येतत्सिद्धं भवतीति भाष्ये उक्तम् ॥

इति पञ्चमोऽध्यायः ॥

अथ षष्ठोऽध्यायः

[ज्ञा.] दाश्वान् साह्वान् (सू. ६-१-१२)-'अभ्यासस्यासवर्णे' (सू. ६-४-७८) इत्यसवर्णग्रहणं ज्ञापयति वार्णादाङ्ग बलीय इति। न ह्यन्तरेण गुणवृद्धी असवर्णपरोऽभ्यासो भवति।

[वि.] परिभाषेयमिति न व्याख्यायते।

[ज्ञा.] न सम्प्रसारणे (सू. ६-१-३७) ॥ अयमेव निषेधो ज्ञापयति (पूर्वस्य) [परस्य] न (परस्येति) [पूर्वस्येति]।

[वि.] ननु 'न सम्प्रसारणे सम्प्रसारणं' इति सूत्रेण सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न भवतीत्युच्यते। यून इत्यादिकमुदाहरणम्। युवन् शब्दात् शसि युवन् अस् इति स्थिते वकारस्य 'श्वयुवमघोनामतद्धिते' (सू. ६-४-१३३) इति सूत्रेण सम्प्रसारणे उकारे यु उ अन् इति स्थिते 'सम्प्रसारणाच्च' (सू. ६-१-१०८) इति पूर्वरूपे यु उन् इति स्थिते सवर्णदीर्घे यूनः इति रूपं सिध्यति। तत्र यकारस्यापि सम्प्रसारणे प्राप्ते 'न सम्प्रसारणे' इति सूत्रेण वकारस्थानिके उकाररूपे सम्प्रसारणे परे यकारस्य संप्रसारणं न भवतीति निषिध्यते। तदेतत् तदा घटते यदि युवन्शब्दे वकारस्य पूर्वं सम्प्रसारणं स्यात्। यदा तु आदौ यकारस्य सम्प्रसारणं क्रियते तदा सम्प्रसारणपरकत्वाभावान्निषेधो न प्रवर्तेत। तथा च आदौ यकारस्य सम्प्रसारणं पश्चाद्वकारस्येत्येवमुभयोः सम्प्रसारणं प्रसज्यत इत्याशङ्क्याह—**अयमेव निषेधो ज्ञापयतीति**। यदि हि द्वयोः सम्प्रसारणं स्यात् निषेधारम्भो व्यर्थो भवेत्। निषेधमहिम्ना च परस्य यणः पूर्वं सम्प्रसारणं न पूर्वस्येति ज्ञापयति। ततश्च परस्य सम्प्रसारणे कृते पूर्वस्यापि प्राप्तौ सत्यां निषेध आरभ्यते इति निषेधस्य चरितार्थतेति भावः।

[ज्ञा.] प्रथमयोः पूर्व (सू. ६-१-१०२) ॥ अत्र विभक्त्योर्ग्रहणे 'तस्माच्छसो नः' (६-१-१०३) इति पूर्वसवर्णदीर्घपरामर्शकं तस्मादिति ज्ञापकम् ।

[वि.] 'प्रथमयोः पूर्वसवर्णः' इति सूत्रे, प्रथमशब्दः क्वचित् सन्निवेशे क्रमेण सन्निविष्टानामादिभूतं बोधयति । 'दीर्घाज्जसि च' (सू. ६-१-१०५) इति लिङ्गात् सुबात्मकसन्निवेशघटकानामादिभूतयोरित्यर्थः पर्यवस्यति । तत्रादिभूतयोः कयोः ? किं विभक्त्योः ? उत प्रत्यययोः इति सन्देहः । ननु 'इको यणचि' (सू. ६-१-७७) इत्यत अचीत्यनुवर्तते । तच्च प्रथमयोरित्यस्य विशेषणम् । तेन अजाद्योः प्रथमयोरित्यर्थः सम्पन्नः । तत्र प्रथमत्रिके सु इत्यस्याजादित्वासम्भवेऽपि अवयवान्तरगतमजादित्वमादाय प्रथमयोर्द्वयोर्विभक्त्योरजादित्वं वक्तुं शक्यते । प्रत्यययोस्तु ग्रहणे सुशब्दस्याजादित्वासम्भवात् औजसोश्चाप्रथमत्वात् प्रथमयोरजाद्योः प्रत्यययोरिति व्याख्यानं न सम्भवति । तथा च प्रथमयोः विभक्त्योरेव ग्रहणमिति क्व सन्देहावकाश इति चेन्न । अजादी इत्येतदेव प्रथमावित्यस्य विशेषणम् । तथा च अजादित्वेन सिद्धौ यौ प्रथमौ इतराजादिप्रत्ययापेक्षयेति यावत् तयोः परतः पूर्वसवर्णदीर्घ इत्यपि व्याख्यानसम्भवेन औजसोः प्रत्यययोरेव ग्रहणमित्यपि वक्तुं शक्यत्वात् । ततश्च प्रथमयोर्विभक्त्योर्ग्रहणं उत प्रथमयोः प्रत्यययोरिति सन्देहस्तदवस्थ इत्यत आह—अत्रेति । 'तस्माच्छसो नः पुंसि' (सू. ६-१-१०३) इति सूत्रे हि कृतपूर्वसवर्णदीर्घादिति तस्मादित्यस्यार्थः । 'प्रथमयोः पूर्वसवर्णः' इति सूत्रे प्रथमयोरजाद्योः प्रत्यययोर्ग्रहणे औजसोरेव पूर्वसवर्णदीर्घः तेन सूत्रेण लभ्येत । शसि तु पूर्वसवर्णदीर्घाप्राप्त्या कृतपूर्वसवर्णदीर्घात्परत्वं शसवयवसकारस्य कथं भवितुमर्हति । अतस्तस्मादित्यनेन शस्यपि पूर्वसवर्णदीर्घमनुमन्यमानः सूत्रकारः 'प्रथमयो'रिति सूत्रे प्रथमयोर्विभक्त्योरेव ग्रहणमभिप्रेतीति भावः ।

[ज्ञा.] सम्प्रसारणाच्च (सू. ६-१-१०८) ॥ आङि पररूपं ज्ञापकमन्तरङ्गबलीयस्त्वस्य । अद्य आ ऊढा अद्योढा धातूपसर्ग-

(योगः) [योः] कार्यं गुणोऽन्तरङ्गः। पूर्वमुपसर्गस्य धातुना योगः नाद्यशब्देन। अद्यशब्दस्य तु समुदायेन योगादिति।

[वि.] 'सम्प्रसारणाच्च' इति सूत्रे 'आद्गुणात्सवर्णदीर्घत्वमाङभ्यासयोः' इति वार्तिकम्। आङि अभ्यासे च परे आद्गुणसवर्णदीर्घयोः प्राप्तौ सवर्णदीर्घ एव भवति न आद्गुण इति तदर्थः। आङि अद्योढा इत्युदाहरणम्। अद्य आ ऊढा इति स्थिते अद्य आ अनयोः सवर्णदीर्घे अद्या ऊढा इति स्थिते आद्गुणे अद्योढा इति सिध्यति। आदौ आ ऊढा अनयोर्गुणे तु अद्य ओढा इति स्थिते वृद्धौ अद्यौढा इति भवेत् इति वार्तिकाशयः।

नन्वेतद्वार्तिकमयुक्तम्। आदौ सवर्णदीर्घे सति 'ओमाङोश्च' (सू.६-१-९५) इति सूत्रेण आङि पररूपविधानस्य वैयर्थ्यापत्तेः। तथा हि शिव आ इहीत्यत्र आ इहीत्यनयोराद्गुणे शिव एहि इति स्थिते 'वृद्धिरेचि' (सू. ६-१-८८) इत्यनेन वृद्धौ प्राप्तायां तदपवादत्वेन पररूपं विधीयते। यदि च आद्गुणात्सवर्णदीर्घः आदौ भवेत् तदा शिव आ अनयोः सवर्णदीर्घे पश्चाद्गुणे शिवेहि इतीष्टं रूपं सिद्धमेवेति किमाङि पररूपविधानेन इत्याशङ्क्याह—**आङि पररूपमिति**। तथा च 'अन्तरङ्गं बलीयः' इति वचनज्ञापनार्थं आङि पररूपविधानम्। धातूपसर्गयोर्यत्कार्यं तदन्तरङ्गम्। आद्गुणस्य च धातूपसर्गकार्यत्वेनान्तरङ्गत्वात् आ इहि इत्यनयोर्गुणे पश्चात् वृद्धौ सत्यां शिवैहि इत्यनिष्टं रूपं प्रसज्येतेति वृद्धिबाधनार्थमाङि पररूपविधानं सार्थकमिति भावः।

उपसर्गस्य पूर्वं धातुनैव योगः न अद्यशब्देनेत्यत्र नियामकमाह **अद्यशब्दस्य तु** इति। अद्य इत्यस्याधारार्थस्य आङा सम्बन्धो नास्ति, क्रियासापेक्षत्वादाधारस्य आङश्च क्रियावाचित्वाभावात्। क्रिया च धातूपसर्गसमुदायेनोच्यते। अतः धातूपसर्गसमुदायेनैव अद्यशब्दस्य सम्बन्धः, न तु क्रियाया अवाचकेन केवलेन आङा इति भावः।

[ज्ञा.] अनुदात्तस्य च यत्रो (सू. ६-१-१६१) ॥ अयचश्चित्करणादत्र अन्त इत्यस्यासम्बन्धो ज्ञाप्यते । एवं चार्थादादिरुदात्तः ।

[वि.] 'अनुदात्तस्य च यत्रोदात्तलोपः' इति सूत्रस्य यस्मिन्ननुदात्ते परे उदात्तो लुप्यते तस्यानुदात्तस्य उदात्तो भवतीत्यर्थः । अत्र अविद्यमानोदात्तकं यं निमित्तीकृत्य उदात्तलोपः तस्योदात्त इति वा, निमित्तत्वानादरेण अविद्यमानोदात्ते यस्मिन् वर्णे परत उदात्तलोपस्तस्य वर्णस्योदात्त इति वा व्याख्यानं वितुमर्हति । तत्र प्रथमपक्षे 'कर्षात्वतो घञोऽन्त उदात्तः' (सू. ६-१-१५९) इति सूत्रात् अन्त इत्यनुवर्त्य अविद्यमानोदात्तकस्यान्त उदात्त इति सूत्रार्थः सम्पद्यते । द्वितीयपक्षे तु अनुदात्तस्य वर्णस्यैवोदात्तविधानात् अन्त इति नानुवर्तते फलाभावात् । तथा च द्वितीयपक्षे अनुदात्तस्यादेरुदात्त इति फलितम् । प्रथमपक्षे अनुदात्तस्यान्त उदात्त इति फलितम् । तत्र कतरः पक्षः श्रेयान् इति शङ्कायां द्वितीयः पक्ष एव श्रेयानित्याह—**अयचश्चित्करणादिति** । द्वावयवावस्य त्रयोऽवयवा अस्येति चार्थे 'संख्याया अवयवे तयप्' (सू. ५-२-४२) इति सूत्रेण द्वित्रिभ्यां तयप् । तयपश्च 'द्वित्रिभ्यां तयस्यायज्वा' (सू. ५-२-४३) इति सूत्रेणायजादेशः । तयप् पित्त्वादनुदात्तः । तत्स्थानिकोऽयच् अपि स्थानिवद्भावेनानुदात्तः तस्मिन् परे च 'यस्येति च' (सू. ६-४-१४८) इतीकारलोपे द्वयं त्रयमित्यत्र 'अनुदात्तस्य च यत्रोदात्तलोपः' इति प्रकृतसूत्रेण अय इत्यस्यादेरकारस्योदात्तत्वे प्राप्ते अन्तोदात्तत्वाय अयचश्चित्करणम् । यदि च 'अनुदात्तस्य च' इति सूत्रे अन्त इत्यनुवर्तेत तदा अनुदात्तस्य अय इत्यस्यान्त एवोदात्तो भविष्यतीति इष्टसिद्धेः किमयचश्चित्करणेन । अतश्चित्करणमयचो ज्ञापयति यदत्र सूत्रेऽन्त इति नानुवर्तते इति । यदि नानुवर्तते तदा अनुदात्तस्य अय इत्यस्य उदात्त इत्युक्ते प्रथमातिक्रमे कारणाभावादर्थादादेरेव भवेदिति अन्तस्योदात्तत्वार्थमयचश्चित्करणं सार्थकमिति भावः । ज्ञापनफलं तु विन्दाते इत्यत्र आकारस्योदात्तत्वसिद्धिः । अन्यथा अन्तः एकार उदात्तः

स्यात्। 'विद विचारणे' इति धातोः परस्य आते इत्यस्य 'तास्यनुदात्तेन्ङिदुपदेशाल्लसार्वधातुकमनुदात्तं' (सू. ६-१-१८६) इति सूत्रेण अनुदात्तत्वम्। श्नमः प्रत्ययत्वादुदात्तत्वम्। ततः श्नसोरल्लोपे आकारस्योक्तसूत्रेण उदात्तत्वमिष्यते। अन्तग्रहणानुवृत्तौ तु एकार एवोदात्तो भवेदिति।

[ज्ञा.] अष्टनो दीर्घात् (सू. ६-१-१७२)॥ अष्टनो दीर्घग्रहणं षट्संज्ञायां ज्ञापकं आकारान्तस्य नुडर्थम्। आत्वविकल्पस्य च ज्ञापकमेतत्।

[वि.] ननु 'अष्टनो दीर्घात्' इति सूत्रस्य दीर्घादष्टन्शब्दात्परा शसादिर्विभक्तिरुदात्तेत्यर्थः। अष्टासु इत्युदाहरणम्। अत्र दीर्घग्रहणं मास्तु। न च तदभावे 'अष्टसु' इत्यत्र ह्रस्वादष्टन्शब्दात्परस्याः सु इति विभक्तेरुदात्तत्वं स्यात्, तद्वारणार्थं दीर्घग्रहणमिति वाच्यम्। 'अष्टसु' इत्यत्र 'झल्युपोत्तमम्' (सू. ६-१-१८०) इति सूत्रेण परेण षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं स्यादित्यर्थकेन उपोत्तमस्य टकारोत्तराकारस्यैवोदाततया 'सु' इत्यस्य पूर्वेण 'अष्टनः' (सू ६-१-१७२) इत्यनेनोदात्तत्वाप्राप्तेः। न च 'अष्टासु'. इत्यत्रापि उपोत्तमस्वरः परत्वात्स्यादिति प्रश्ने येन नाप्राप्तिन्यायेन 'अष्टनः' इति स्वरस्योपोत्तमस्वरबाधकत्वमिति समाधातव्यम्। तथा च तुल्ययुक्त्या 'अष्टसु' इत्यत्रापि परं उपोत्तमस्वरं बाधित्वा अपवादत्वात् 'अष्टनः' इति विभक्तिस्वरः स्यादिति तद्वारकतया दीर्घग्रहणं सार्थकमिति वाच्यम्। अष्टासु इत्यत्र हि नकारस्यात्वे कृते नकारान्तत्वाभावेन षट्संज्ञाविरहात् षट्संज्ञामाश्रित्य विधीयमानः झल्युपोत्तमम् इति स्वरो नैव भविष्यतीति तस्मिन्नवश्यं प्राप्ते सति अष्टनः इति सूत्रमारभ्यत इति वक्तुमशक्यतया अपवादत्वाभावात्। तथा च अष्टसु इत्यत्र परत्वात् उपोत्तमस्वर एव भविष्यति। नलोपे कृतेऽपि तस्यासिद्धत्वात् नकारान्तत्वेन षट्संज्ञकत्वादुपोत्तमस्वरप्रवृत्तेः। तथा च दीर्घग्रहणं व्यर्थमित्यत आह—**अष्टनो दीर्घग्रहणमिति।** तथा च दीर्घग्रहणं

आत्वे कृतेऽपि षट्संज्ञा भवतीति ज्ञापनार्थम्। तथा च अष्टासु इत्यत्रापि षट्संज्ञकत्वात् उपोत्तमस्वरे प्राप्त एव 'अष्टनः' इति सूत्रारम्भात् येन नाप्राप्तिन्यायेनापवादत्वं 'अष्टन' इत्यस्य सूत्रस्येति अष्टासु इत्यत्र उपोत्तमस्वरो न प्रवर्तते। तुल्यन्यायेन अष्टसु इत्यत्राप्यपवादत्वात् विभक्तिस्वरे प्राप्ते तद्द्वारकतया दीर्घग्रहणमिति स्वांशे चारितार्थ्यम्। अन्यत्र ज्ञापनस्य फलमाह—**आकारान्तस्य नुडर्थमिति।**

अष्टन् आम् इत्यत्र 'अष्टन आ विभक्तौ' (सू. ७-१-८४) इति नकारस्य आत्वे कृते आकारान्तस्याप्युक्तज्ञापकेन षट्संज्ञकत्वात् 'षट्चतुर्भ्यश्च' (सू. ७-१-५५) इति आमः नुटि अष्टानामिति रूपं सिध्यतीति भावः।

यद्वा 'अष्टन आ विभक्तौ' इति सूत्रविहितस्य आत्वस्य नित्यत्वात् सप्तमी-बहुवचने 'अष्टासु' इति दीर्घघटितमेव रूपं न ह्रस्वघटितं 'अष्टसु' इति रूपम्। तथा च तद्व्यावर्तकं दीर्घग्रहणं व्यर्थमित्याशङ्क्य, अष्टनः विधीयमानमात्वं वैकल्पिक-मिति ज्ञापनार्थं दीर्घग्रहणम्। तथा च आत्वाभावपक्षे अष्टसु इति रूपस्यापि सद्भावात् तत्र 'अष्टनः' इति सूत्रविहितस्वरापवृत्त्यर्थं तत्सूत्रे दीर्घग्रहणं सार्थकमित्याह—**आत्वविकल्पस्य च** इति। तथा च एकमेव दीर्घग्रहणं वचनद्वयस्य ज्ञापकम्। अन्यथानुपपत्त्या अनेकस्याप्यर्थस्य ज्ञापनसम्भवादि-त्याशयः। तदेतत्सूचनाय चेत्युक्तम्।

वस्तुतस्तु अष्टन् आम् इत्यत्र आत्वापेक्षया अन्तरङ्गत्वात् षट्संज्ञायाः षट्संज्ञायां कर्तव्यायां आत्वस्य बहिरङ्गतया असिद्धत्वात् नान्तत्वादेव षट्संज्ञासिद्धेः तन्निमित्तकनुटि 'नोपधायाः' (सू. ६-४-७) इति दीर्घे नलोपे च अष्टाना-मितीष्टरूपस्य सिद्धेः ज्ञापनफलाभावात् 'भवत्यात्वे कृते षट्संज्ञा' इति न ज्ञापनीयम्। विभाषा आत्वमिति वचनज्ञापकतयैव दीर्घग्रहणम्। प्रयोजनं च अष्टभिः अष्टाभिरित्यादिरूपद्वयसिद्धिः। तथा च आत्वविकल्पस्य चेत्यत्र चकारो वाकारार्थे इति प्रतिभाति।

[ज्ञा.] तित्स्वरितम् (सू. ६-१-१८५) ॥ 'दिव (औत्) [उत्] (सू. ६-१-१३१) इति तपरत्वं ज्ञापयति (ऊकारेण) [उकारेण] भाव्यमानेन सवर्णानां ग्रहणमिति। एवं च ऊठि दीर्घवारणाय तपरत्वम्। तिति प्रत्ययग्रहणं कर्तव्यमित्येतदादेशेषु दकारमाश्रित्य प्रत्याख्यातम्। तपरसूत्रे दकारोऽपि चर्त्वभूतः प्रश्लिष्यते ॥

[वि.] 'तित्स्वरितं' इति सूत्रे 'तिति प्रत्ययग्रहणं' इति वार्तिकम्। तस्य चायमर्थः तित् प्रत्ययः एव स्वरितो भवति इति वक्तव्यम्। अन्यथा 'किरति' इत्यत्र 'ऋत इद्धातोः' (सू. ७-१-१००) इति सूत्रेण विधीयमानस्य इकारस्यापि तित्त्वेन स्वरितत्वापत्तेरिति। एतद्वार्तिकं प्रत्याचिख्यासुः भाष्यकारः ऋतः इद् इति दित् इकारः आदेशः स च न तित् इति स्वरितो न प्रवर्तिष्यते इति अवदत्। तदुपरि ऋतः इद् इति यदि छेदः क्रियते तदा स्थानिनः दीर्घस्य अन्तरतमः दीर्घ एव इकारः स्यात्। तपरकरणे तु तत्कालो ह्रस्व एव भविष्यतीत्याशङ्क्य, भाव्यमानेन सवर्णानां ग्रहणं नेति परिभाषया ह्रस्व एव इकारो भवति अतः इद् इति दकारानुबन्धवानेवादेश इति समाधाय, यदि भाव्यमानेन सवर्णानां ग्रहणं नेत्युच्यते तदा अमूभ्यामित्यत्र अदा भ्यामित्यवस्थायां दकारात् परस्य आकारस्य 'अदसोऽसेर्दादु दो मः' (सू. ८-२-८०) इति सूत्रविहितः उकारः विधीयमानत्वात् सवर्णस्य ऊकारस्य ग्राहको न भवेत्। ततश्च अमुभ्यामिति ह्रस्व एव उकारः स्यादिति पुनः आक्षिप्य भाष्ये उक्तम्—

> 'एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्युकारेण भाव्यमानेन सवर्णानां ग्रहणमिति। यदयं 'दिव उत्' (सू. ६-१-१३१) इति उकारं तपरं करोति'

इति। तदेतन्मनसिकृत्याह—**इति तपरत्वं ज्ञापयतीत्यादिना।** स्वांशे चारितार्थ्यमाह—**एवं च ऊठीति।** द्युभ्यामित्यत्र दिव् भ्यामिति स्थिते

झल्परकत्वात् वकारस्य 'च्छ्वोः शूडनुनासिके च' (सू. ३-४-१९) इति सूत्रेण ऊठि दिऊभ्यामिति स्थिते ऊकारस्य 'दिव उत्' (सू. ६-१-१३१) इति उकारे यणि च द्युभ्यामिति सिध्यति। अत्र भाव्यमानस्य उकारस्य सवर्णग्राहकत्वेन स्थान्यान्तर्यात् ऊकारे प्राप्ते तन्निवर्तकतया उत् इति तपरकरणं सार्थकमिति भावः। अन्यत्र प्रयोजनं तु अमूभ्यामिति।

ननु 'दिव उत्' इति सूत्रविहितस्य उकारस्य तित्त्वेन 'तित्स्वरितं' इति स्वरितवारणाय तिति प्रत्ययग्रहणं कर्तव्यमेवेत्यत आह—**तिति प्रत्ययग्रहण**मिति। तथा च 'दिव उद्' इति सूत्रेऽपि उद् इत्येव आदेशः। तथा च तित्त्वाभावेनैव स्वरितस्वरो न प्राप्स्यतीति प्रत्ययग्रहणमनावश्यकमित्ति भावः।

ननु यदि उद् इत्यादेशस्तदा 'तपरस्तत्कालस्य' (सू. १-१-७०) इति सूत्राप्रवृत्त्या ऊकारोऽप्यादेशो भवेदित्याशङ्क्याह—**तपरसूत्र** इति। तथा च दूतपरः इत्यत्र दकारस्य चर्त्वेन त्तपर इति सूत्रम्। दपरः तपरश्च, तत्कालस्य संज्ञेति सूत्रार्थः। ततश्च उद् इत्यस्यापि तत्कालस्यैव प्रवृत्तेः न दीर्घस्यापत्तिरिति भावः।

[ज्ञा.] भीह्रीभृ (सू. ६-१-१९२) ॥ अत्रत्यप्रत्ययग्रहणं ज्ञापकं स्वरविधौ सङ्घातः कार्यीति। पूर्वग्रहणं ज्ञापकं स्वरविधौ सप्तम्यस्तदन्तसप्तम्य इति।

[वि.] ननु 'भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति' (सू. ६-१-१९२) इति सूत्रेण भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यादिति विधीयते। जुहोति इत्युदाहरणम्। अत्र प्रत्ययात्पूर्वस्य ओकारस्य उदात्तत्वम्। एतत्सूत्राभावे 'अनुदात्ते च' (सू. ६-१-१९०) इत्याद्युदात्तस्वरः स्यात्। तत्र प्रत्ययग्रहणं किमर्थम्। न च तदभावे 'बिभयानि' इत्यत्र 'नि' इति पिति परे पूर्वस्य आटः उदात्तत्वं भवेत्। आटः पूर्वस्यैव चेष्यते। तदर्थं प्रत्ययग्रहणम्। सति च तस्मिन् यदागमन्यायेन आट्सहितस्य

प्रत्ययत्वात् प्रत्ययात्पूर्वस्य उदात्तत्वमित्युक्ते 'आनि' इत्यतः पूर्वस्य मकारोत्तराकारस्यैवोदात्तत्वं भविष्यतीत्येतदर्थं प्रत्ययग्रहणमिति वाच्यम्। प्रत्ययग्रहणाभावेऽपि पिति पूर्वमुदात्तमित्युक्ते पितः नेर्भक्तः आडपि पिद्ग्रहणेन ग्रहीष्यत इति आनि इत्यस्मिन् परे ततः पूर्वस्यैवोदात्तत्वमिति आटः उदात्तत्वाप्रप्त्या प्रत्ययग्रहणवैयर्थ्यादित्याशङ्क्य ज्ञापकतया तत्सार्थक्यमाह—**अत्रत्यप्रत्ययग्रहणं** इति। तथा च पूर्वोक्तरीत्या व्यर्थं सत् प्रत्ययग्रहणं स्वरविधौ संघातः कार्यीति ज्ञापयति। ततश्च आनि इत्यतः पूर्वस्य संघातस्य उदात्तत्वं मा भूत् अपि तु प्रत्ययात्पूर्वस्याचः उदात्तत्वं यथा स्यादित्येवमर्थं प्रत्ययग्रहणमिति भावः। ज्ञापनफलं तु भाष्ये एवमुक्तम्

> 'चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं विप्रतिषेधेनेति यदुक्तं तदुपपन्नं भवति'

इति। अयमस्याशयः—आसीनः शयान इत्यत्र शानचः चित्त्वात् चितोऽन्त उदात्तः प्राप्तः। 'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तं' (सू. ६-१-१८६) इति शानचः अनुदात्तोऽपि प्राप्तः। उभयोः प्राप्तौ 'विप्रतिषेधे परं कार्यं' (सू. १-४-२) इति परत्वात् अनुदात्त एव भवतीति वार्तिककारेणोक्तं 'तास्यनुदात्तेत्' इति सूत्रे। तच्च स्वरविधौ यदि संघातस्य कार्यित्वं स्यात् तदैवोपपद्यते। अन्यथा 'आदेः परस्य' (सू. १-१-५४) इति परिभाषया शानचः आदेः आकारस्यानुदात्तत्वं, अन्तस्य च 'चितः' इत्यन्तोदात्तत्वमिति विरोधाभावात् विप्रतिषेधसूत्रसञ्चारो नोपपद्येत। संघातस्य स्वरकार्यित्वे तु आन इति संघातस्यानुदात्तत्वं तदन्तस्योदात्तत्वेन विरुध्यत इत्येवं विप्रतिषेधात् वार्तिकरीत्या परत्वादनुदात्तत्वोक्तिः साधु सङ्गच्छत इति।

'भीह्री' (सू. ६-१-१९२) इति सूत्र एव 'पिति' इति सप्तमीश्रवणात् 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (सू. १-१-६६) इति परिभाषया पूर्वस्येति लभ्यत इति 'प्रत्ययात्पूर्वं पिति' (सू. ६-१-१९२) इति

पूर्वग्रहणं किमर्थमित्याशङ्क्याऽह—**पूर्वग्रहण**मिति । तथा च स्वरविधौ सप्तम्यस्तदन्तसप्तम्यो भवन्तीति ज्ञापनार्थं पूर्वग्रहणम् । तदन्तपक्षे च भीप्रभृतिभ्यो विहितः यः पित् तदन्तमुदात्तं भवतीति सूत्रार्थः स्यात् । एवं च सर्वेषामचां पर्यायेणोदात्तत्वं स्यात् । एकस्य प्रत्ययात्पूर्वस्यैवेष्यत इति तदर्थं पूर्वग्रहणमिति स्वांशे चारितार्थ्यम् । ज्ञापनप्रयोजनं तु 'उपोत्तमं रिति' (सू. ६-१-२१७) इत्यादौ । तत्र हि रिति प्रत्यये परतः उपोत्तमस्योदात्तत्वं नेष्यते, अपि तु रित्प्रत्ययान्तस्य यदुपोत्तमं तस्योदात्तत्वमिष्यत इति ।

[ज्ञा.] संज्ञायामुपमानम् (सू.६-१-२०४) ॥ उपमानस्याद्युदात्तवचनं ज्ञापकं अनुबन्धलक्षणे स्वरे प्रत्ययलक्षणप्रतिषेधस्य ।

[वि.] ननु 'संज्ञायामुपमान' मिति संज्ञायामुपमानस्याद्युदात्तत्वविधायकं सूत्रं व्यर्थम् । न च तदभावे चञ्चेव चञ्चा इत्यादौ 'संज्ञायाम्' (सू. ५-३-९७) इति विहितस्य कनः 'लुम्मनुष्ये' (सू. ५-३-९८) इति लुपि चञ्चा इति शब्दे आद्युदात्तः कथं सिध्येदिति वाच्यम् । लुप्तस्य कनः प्रत्ययलक्षणमाश्रित्य 'ञ्नित्यादिर्नित्यम्' (सू. ६-१-१९७) इति सूत्रेणैव आद्युदात्तत्वसिद्धेः । आद्युदात्तत्वस्य अङ्गाधिकारीयत्वाभावेन 'न लुमताङ्गस्य' (सू. १-१-६३) इति प्रत्ययलक्षणनिषेधस्याप्रवृत्तेरित्याशङ्क्याह—**उपमानस्य** इति । तथा च चञ्चेत्यादौ प्रत्ययलक्षणेनैव सिद्धे स्वरे 'संज्ञायामुपमानम्' इति सूत्रं व्यर्थं सत् अनुबन्धनिमित्तके स्वरे प्रत्ययलक्षणं न भवतीति ज्ञापयति । एवं च 'ञ्नित्यादिर्नित्यं' इति स्वरस्य इत्संज्ञानिमित्तकत्वात् तस्मिन् कर्तव्ये कन्लुपः प्रत्ययलक्षणाभावात् चञ्चा इत्यस्य ञ्निदन्तत्वं नास्तीति आद्युदात्तस्वराप्राप्तौ तत्प्रापकं 'संज्ञायामुपमानं' इति सूत्रं सार्थकमिति भावः ।

ज्ञापनस्य फलं तु गर्गा इत्यादौ गर्गस्य गोत्रापत्यानीत्यर्थे 'गर्गादिभ्यो यञ्' (सू. ४-१-१०५) इति सूत्रविहितस्य यञः 'यञञोश्च' (सू. २-४-६४)

इति लुकि तस्य प्रत्ययलक्षणमाश्रित्य 'ञ्नित्यादिर्नित्यं' इत्याद्युदात्तः प्राप्तः। स च अनुबन्धलक्षणे स्वरे प्रत्ययलक्षणं नेति ज्ञापनान्न भवतीति।

[ज्ञा.] 'नोत्तरपदेऽनुदात्तादावपृथिवी' (सू. ६-२-१४२) इत्यादावपृथिवीत्यादिपर्युदासो ज्ञापकः 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति। 'यतोऽनावः' (सू. ५-१-२१३) इत्यत्रानाव इति प्रतिषेधो ज्ञापकः 'हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानव'दिति।

'गतिरनन्तरः' (सू. ६-२-५९) अनन्तरग्रहणं ज्ञापयति कृद्ग्रहणे गतिकारकपूर्वस्यापीति।

[वि.] एतासां तिसृणामपि परिभाषाणां परिभाषेन्दुशेखरे पठितत्वादिह न विवियन्ते।

[ज्ञा.] द्वित्रिभ्यां पात् (सू. ६-२-१९७)॥ मूर्धस्विति निर्देशो ज्ञापयति विभाषा समासान्त इति।

[वि.] 'द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ (सू. ६-२-१९७) इति सूत्रेण द्वित्रिभ्यां परेषु पाद् दन् मूर्धन् इत्येतेषु बहुव्रीहिसमासे अन्तोदात्तस्वरः विधीयते। तत्र मूर्धन् शब्दस्योदाहरणं द्विमूर्धः त्रिमूर्धः इति। 'द्वित्रिभ्यां ष मूर्ध्नः' (सू. ५-४-११५) इति सूत्रेणात्र समासान्तः षप्रत्ययः। तस्य च समासान्तप्रत्ययस्य नित्यत्वात् 'पाद्दन्मूर्धसु' (सू. ६-२-१९७) इति कृतसमासान्ततया निर्देश एव उचितः। पाद् इति कृतसमासान्तेनोपक्रमात् मूर्धशब्दस्यापि तथैव निर्देष्टुमुचितत्वादित्याशङ्क्य, यतः 'पाद्दन्मूर्धसु' इति अकृतसमासान्ततया सूत्रे मूर्धशब्दो निर्दिष्टः अत एव समासान्तप्रत्ययो वैकल्पिक इति ज्ञापयति। तथा च समासान्ताभावपक्षमाश्रित्य मूर्धसु इति निर्दिष्टं सूत्रे। अतश्च द्विमूर्धा त्रिमूर्धा इत्यकृतसमासान्तेऽपि बहुव्रीहावनेनान्तोदात्तस्वरः सिध्यतीत्याशयवानाह—**मूर्धस्विति निर्देश** इति।

ज्ञापनफलं तु सुपथी नगरी इत्यादौ 'इनः स्त्रियाम्' (सू. ५-४-१५२) इति कप् वैकल्पिकत्वान्न भवतीति ।

'समासान्तविधिरनित्यः' इति परिभाषयापि गतार्थमेतद्वचनम् । 'प्रतेरंश्वादयस्तत्पुरुषे (सू. ६-२-१९३) इत्यन्तोदात्तत्वायांश्वादिषु राजन्शब्दपाठोऽस्या ज्ञापक इति **परिभाषेन्दुशेखरे** ॥

[ज्ञा.] हृदयस्य हृल्लेखयदण्लासेषु (सू. ६-३-५०) ॥ लेखग्रहणादुत्तरपदाधिकारे प्रत्यग्रहणे रूपग्रहणं ज्ञाप्यते । 'खित्यनव्ययस्य' इत्यत्रानव्ययस्येत्युक्तेः खिदन्तग्रहणम् ।

[वि.] ननु 'हृदयस्य हृल्लेख-' इति सूत्रे 'यत्' 'अण्' इति प्रत्ययग्रहणेन 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहण'मिति परिभाषया यदन्तस्य अणन्तस्य च ग्रहणात् यदन्ते अणन्ते च परत एव हृदयस्य हृदादेशः स्यान्न तु केवले यति अणि च । तथा च हृद्यं हार्दमिति न सिध्येदित्याशङ्क्याह-**लेखग्रहणा**दिति । यदि अणन्तस्यात्र ग्रहणं स्यात्तदा लेखशब्दस्य अणन्तत्वादेव तस्मिन् परे हृदयस्य हृदादेशे सिद्धे लेखग्रहणं व्यर्थं स्यात् । यतो लेखग्रहणं करोति तज्ज्ञापयत्याचार्यः अण् इत्यनेन स्वरूपमेव गृह्यते न अणन्तमिति । तथा च अणन्तस्य लेखशब्दस्य अण्ग्रहणेन ग्रहणासम्भवात् लेखग्रहणं कृतमिति ।

यद्वा ज्ञापकस्य प्रकरणापेक्षत्वात् उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति ज्ञाप्यते । तेन कुमारी गौरितरा इत्यत्र 'घरूपकल्पप्' - (सू. ६-३-४३) इति सूत्रेण घसंज्ञके प्रत्यये परतो विधीयमानः ङ्यो ह्रस्वः घान्ते न भवति इति भावः ।

यद्येवं ज्ञाप्यते तदा 'खित्यनव्ययस्य' (सू. ६-३-६६) इति विधीयमानः ह्रस्वः खिति परत एव भवेत् न तु खिदन्ते । तथा च शुनिंधय इत्यादौ

खिदन्ते धयशब्दे परे ह्रस्वो न भवेत् इत्याशङ्क्याह–**खित्यनव्ययस्येत्यत्रेति।** यदि तदन्तग्रहणमत्रापि न स्यात् तदा खित्परकस्याव्ययस्य दुर्लभत्वादेव अव्ययस्य ह्रस्वाप्राप्तेः अनव्ययस्येति प्रतिषेधोऽनर्थकः स्यात्। कृतश्च स प्रतिषेधः अत्र सूत्रे तदन्तग्रहणमस्तीति ज्ञापयति। तथा च 'दोषामन्यमहः' इत्यादौ ह्रस्ववारणाय अनव्ययस्येति निषेधः सार्थकः। प्रयोजनं तु शुनिंधय इत्यादौ खिदन्ते परे ह्रस्वसिद्धिरिति भावः॥

[ज्ञ.] 'समः समि' (सू. ६-३-९३) 'नहिवृति' (सू.६-३-११६) अञ्चतिनह्यादिषु क्विबग्रहणात् धातुग्रहणेन तदादिविधिर्भवतीति।

[ज्ञा.] ननु 'समः समि' इति सूत्रेण क्विबन्ते (अप्रत्ययान्ते) अञ्चतौ परे समः सम्यादेशो विधीयते। सम्यङ् इत्युदाहरणम्। तथा 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' (सू. ६-३-११६) इति सूत्रेण क्विबन्तेषु नह्यादिषु परतः पूर्वपदस्य दीर्घ उच्यते। उपानत् इत्यादिकमुदाहरणम्। तत्र क्विग्रहणम् मास्तु। न च तदभावे समञ्चनं उपनहनमित्यादावपि सूत्रद्वयं प्रवर्तेतेति वाच्यम्। उत्तरपदाधिकारीयत्वात् उक्तसूत्रद्वयस्यापि अञ्चुनह्यादिरूपे उत्तरपदे परे सूत्रद्वयं प्रवर्तते। समञ्चनमित्यत्र अञ्चन इत्यस्य उत्तरपदत्वेऽपि अञ्च् इत्यस्योत्तरपदत्वाभावान्न दोषः। केवलस्य अञ्च् इत्यस्य च क्विप्प्रत्यये सत्येव उत्तरपदत्वं भवति। अन्यथा धातोस्तस्य पदत्वस्यैव दुर्लभत्वात्। तथा च उत्तरपदे इति अधिकारमहिम्नैव क्विबन्त इति लाभसम्भवात् क्विग्रहणमनर्थकमित्याशङ्क्याह–**अञ्चतिनह्यादिष्विति।** तथा च ज्ञापनार्थं क्विग्रहणं क्रियते। यत्र सप्तम्यन्तं विशेषणतया धातुग्रहणं क्रियते तत्र अल्ग्रहणत्वाभावेऽपि तदादिविधिर्भवतीति ज्ञाप्यते। इत्थं च अञ्चताविति्यस्य नहिवृत्तीत्यादेश्च उत्तरपदे इत्येतद्विशेषणत्वेन तदादिविधौ सति अञ्च् इत्यादिर्धातुरादिर्यस्योत्तरपदस्य तस्मिन् परतः समः सम्यादेशः पूर्वपदस्य दीर्घश्च भवतः इति सूत्रार्थः स्यात्। तथा सति समञ्चनं उपनहनमित्यादावपि

भवेत् अश्चन इत्यस्योत्तरपदस्य अञ्च् इत्याद्यवयवकत्वात्। अतः क्विग्रहणं कृतम्। तेन क्विबन्तेष्वञ्चादिष्वेव परतः उक्तसूत्रद्वयं प्रवर्तत इति न दोषः इति भावः।

ज्ञापनस्य प्रयोजनं तु 'अतः कृकमि' (सू. ८-३-४६) इत्यत्र उत्तरपदाधिकारात् तद्विशेषणेन 'कृ' इत्यनेन कृधात्वाद्यवयवकमुत्तरपदं गृह्यत इति अयस्कार इत्यत्रापि सत्वं सिध्यति। अन्यथा क्विबन्ते कृधातौ परत एव अयस्कृत् इत्यादौ सत्वं भवेदिति।

[ज्ञा.] 'जनसनखनां' (सू. ६-४-४२) 'आतो लोप इटि च' (सू. ६-४-६४)। ततो घुमास्थागापाजहातिसां लोपो भवति इटि च अजादौ क्ङितीति। वक्ष्यमाणेत्वबाधनार्थमेतत्। ततः-ईत्। घ्वादयोऽनुवर्तन्ते ईच्च भवति घ्वादीनाम्। 'एर्लिङि' (सू. ६-४-६७) 'वान्यस्य' (सू. ६-४-६८) 'न ल्यपि' (सू. ६-४-६९) 'मयतेरिदन्यतरस्यां' (सू. ६-४-७०)। ततो 'यति' यति च ईद्भवति। एवं सिद्धे यद्गुरुसूत्रमारभते तत् ज्ञापयति भवत्याभीयेष्वसिद्धेष्वपि विप्रतिषेध इति। हल्ग्रहणं च गोद इत्यादावीत्वाभावाय। ज्ञापिते कथं चारितार्थ्यम्। तस्मादेकदेश्युक्तिरेतद् भाष्यम्।

[वि०] 'जनसनखनां सन्झलोः' (सू. ६-४-४२) इति सूत्रे 'सनोतेरनुनासिकलोपादात्वं विप्रतिषेधेन' इति वार्तिकम्। तस्य चायमर्थः। 'सन्' धातोः क्तप्रत्यये सन्-त इति स्थिते अनेन आत्वे, अनुनासिकलोपे च 'अनुदात्तोपदेश—' (सू. ६-४-३७) इति सूत्रेण प्राप्ते 'विप्रतिषेधे परं' (सू. १ ४-२) इति परत्वादात्वमेव भवति। 'सात' इति च रूपमिति।

नन्वत्र विप्रतिषेधो न युज्यते, 'पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य' इति न्यायेनात्र आभीयासिद्धविषयेऽपि विप्रतिषेधाप्रवृत्तेरित्याशङ्क्य,

इह विप्रतिषेधो भवतीति ज्ञापनान्न दोषः इति वक्ष्यति। तत्र च 'घुमास्था-गापाजहातिसां हलि' (सू. ६-४-६६) इति सूत्रे हल्ग्रहणं ज्ञापकमिति वक्तुं वैयर्थ्ये सत्येन ज्ञापकत्वस्य वक्तुं शक्यत्वात् वैयर्थ्यमुपपादयति—**आतो लोप इटि च तत** इत्यादिना। अयमत्राभिप्रायः—'घुमास्था' इति सूत्रे हल्-ग्रहणाभावे गोदः कम्बलद इत्यत्रापि गोदा-अ इत्यवस्थायामीत्वं भवेत्। हल्-ग्रहणे सति तु प्रत्ययस्याजादित्वेन हलादित्वाभावान्न दोष इति वक्तव्यम्। असति चेह विप्रतिषेधे 'असिद्धवदत्राभात्' (सू. ६-४-२२) इति सूत्रेण द्वयोः परस्परस्मिन्नसिद्धत्वात् ईत्वे कृतेऽपि तस्यासिद्धत्वात् 'आतो लोप इटि च' (सू. ६-४-६४) इत्यालोपेन गोद इतीष्टरूपसिद्धेर्हल्ग्रहणमनर्थकं स्यात्। कृतं च हल्ग्रहणं असिद्धविषयेऽपि विप्रतिषेधसूत्रं प्रवर्तत इति ज्ञापयति। तथा च परत्वात् ईत्वमेव भवेदिति तद्वारणाय हल्ग्रहणमिति एकः ज्ञापकत्वप्रकारः।

द्वितीयः प्रकारस्तु अविशेषेण ईत्वमुक्त्वा तस्याजादावालोपः अपवादत्वेन विधातुं शक्यते। तथा हि 'आतो लोप इटि च' ततः 'घुमास्थागापा-जहातिसां' लोपो भवति अजादौ ङिति परे इत्यर्थः। ईत्वबाधनार्थोऽयं लोपो विधीयतेऽजादौ ङिति। ततः 'ईत्' घुमास्थादीनामीच्च भवति। अर्थात् हलि ङिति इति लभ्यते। ततः एर्लिङि इत्यादिः सूत्रक्रमः। एवं चैवं सूत्रन्यासे हलादौ ङिति घुमास्थादीनामीत्वं अजादौ ङिति तु लोप इति व्यवस्थायाः सिद्धत्वात् हल्ग्रहणं व्यर्थं सत् भवतीह विप्रतिषेध इति ज्ञापयति। तेन परत्वात् गोद इत्यत्र आलोपं बाधित्वा ईत्वे प्राप्ते तद्वारणार्थं हल्ग्रहणं सार्थकम्। प्रयोजनं तु अनुनासिकलोपात् परत्वात् सात इत्यादावात्वसिद्धिरिति प्रघट्टकार्थः।

परं तु हल्ग्रहणेऽकृतेऽपि पूर्वोक्तसूत्रन्यासरीत्या गोद इत्यादावीत्वबाध-नार्थं योगं विभज्य कृतेन लोपेनैवेष्टसिद्धेः हल्ग्रहणस्य स्वांशे चारितार्थ्याभावात् इदं भाष्यमेकदेश्युक्तिः न तु सिद्धान्त्युक्तिरित्याह—**ज्ञापिते कथ**मिति। **उद्योते**ऽपि स्पष्टमेतत्॥

[ज्ञा.] हुश्नुवोः (सू. ६-४-८७) ॥ हुश्नुग्रहणं भाषायामपि यङ्लुको ज्ञापकम्। तेन भाषायामपि बेभिदीति चेच्छिदीतीत्येतत् सिद्धं भवतीति भाष्योक्त्या अन्य-यङ्लुगन्तानां भाष्ये असाधुतैव लभ्यते।

[वि.] ननु 'यङोऽचि च' (सू. २-४-७४) इति सूत्रे 'बहुलं छन्दसि' (सू. २-४-७३) इत्यतः छन्दसीत्यस्यानुवृत्तेः यङ्लुकः छन्दोमात्रविषयत्वात् भाषायां यङ्लुगन्तप्रयोगो न साधुः स्यादित्याशङ्क्य, ज्ञापकेन भाषायामपि यङ्लुकं साधयति - **अत्र हुश्नुग्रहणमिति**। 'हुश्नुवोः सार्वधातुके' इति सूत्रेण हुधातोः श्नुप्रत्ययान्तस्य चानेकाचोऽङ्गस्य च असंयोगपूर्ववर्णस्य यण् स्यादजादौ सार्वधातुके इति प्रतिपाद्यते। जुह्वति शृण्वति इत्यादिकमुदाहरणम्। तत्र हुश्नुग्रहणं विनापि हुश्नुवोरिति लभ्यते। न हि सार्वधातुके परतः अनेकाच् उवर्णान्तं चाङ्गं हुश्नुभ्यामन्यदस्ति। तथा च हुश्नुवोरिति व्यर्थम्। न च 'युवं योयुवतीनां वृषभम्' इत्यादौ छन्दसि योयु इत्यादिकं यङ्लुगन्तमनेकाजसंयोगपूर्वमुवर्णान्तमस्ति। तद्व्यावृत्त्यर्थं हुश्नुग्रहणमिति वाच्यम्। 'छन्दस्युभयथा' (सू. ३-४-११७) इति सूत्रेण शतृप्रत्ययस्य आर्धधातुकत्वाश्रयणेन सार्वधातुकत्वाभावादेव तत्र सूत्राप्रवृत्तेः हुश्नुग्रहणवैयर्थ्यात्। तथा च व्यर्थं सत् हुश्नुग्रहणं ज्ञापयति भाषायामपि यङ्लुगन्तं साधु इति। ततश्च भाषायां योयुवती इत्यादियङ्लुगन्ते 'छन्दस्युभयथा' इति सूत्रस्याप्रवृत्तेः सार्वधातुके शतरि परे यणादेशं वारयितुं हुश्नुग्रहणमिति स्वांशे चारितार्थ्यम्। ज्ञापनप्रयोजनं तु भाषायां बेभिदीति चेच्छिदीति इत्यादयो यङ्लुगन्ताः साधवो भवन्ति इति।

भाष्ये बेभिदीति चेच्छिदीति इति द्वयोरेव यङ्लुगन्तयोरुदाहरणेन अन्ये धातवो यङ्लुगन्ताः भाषायां न साधव इत्याह—**तेन भाषायामपीति**।

[ज्ञा.] 'अत एक' (सू. ६-४-१२०) ॥ फलिभजिग्रहणं ज्ञापकं अभ्यासादेशसिद्धत्वस्य। शसिदद्योः प्रतिषेधो ज्ञापको

रूपाभेद एत्वस्य । श्नसोरत्वे तकारेण 'असिद्धवदत्र' (सू. ६-४-२२) इत्यस्यानित्यत्वज्ञापनात् देभतुरिति सिद्धिः ।

[वि.] ननु बभणतुः इत्यत्र भण्भण् अतुरिति स्थिते हलादिशेषे अभ्यासभकारस्य 'अभ्यासे चर्च (सू. ८-४-५४) इति सूत्रेण जश्त्वे तस्य, एत्वाभ्यासलोपयोः कर्तव्ययोः 'पूर्वत्रासिद्धम्' (सू. ६-४-२२) इत्यनेनासिद्धत्वात् अनादेशादित्वमङ्गस्यास्तीति 'अत एकहल्मध्येऽनादेशादेर्लिटि' (सू. ६-४-१२०) इति सूत्रेण एत्वमभ्यासलोपश्च स्याताम् । ततश्च भेणतुरिति रूपं प्राप्नोतीत्याशङ्क्याह—**फलिभजिग्रहणमिति ।** 'तृफलभजत्रपश्च' (सू. ६-४-१२२) इति सूत्रे फलधातोः भजधातोश्च लिटि द्विबचने फल् फल् अतुः भज् भज् अतुः इति स्थिते हलादिशेषे जश्त्वे च प फल् अतुः बभज् अतुः इति स्थिते आदेशादित्वेनाङ्गस्य 'अत एकहल्मध्येऽनादेशादेर्लिटि' (सू. ६-४-१२०) इति सूत्रस्याप्रवृत्तौ एत्वाभ्यासलोपसिद्ध्यर्थं फलिभज्योर्ग्रहणमिति वक्तव्यम् । यदि अभ्यासादेशभूतं जश्त्वमसिद्धं स्यात् तदा तदसिद्धत्वात् अनादेशादित्वादेव 'अत एकहल्मध्ये' इति सूत्रेण एत्वाभ्यासलोपयोः सिद्धौ किमर्थं 'तृफल' इति सूत्रे तयोर्ग्रहणं क्रियते । कृतं च तत् एत्वाभ्यासलोपयोः कर्तव्ययोः अभ्यासादेशः सिद्ध इति ज्ञापयति । ततश्च जश्त्वस्य सिद्धत्वादादेशादित्वादप्राप्तयोरेत्वाभ्यासलोपयोः सिद्धये फलिभजिग्रहणमिति स्वांशे चारितार्थ्यम् । प्रयोजनं तु बभणतुरित्यादावभ्यासजश्त्वस्य सिद्धत्वादादेशादित्वेन एत्वाभ्यासलोपौ न भवत इति ।

नन्वेवं पेचतुः देभतुः इत्यादौ प्रकृतिचरां प्रकृतिचरः प्रकृतिजशां प्रकृतिजश इति आदेशादित्वादेत्वाभ्यासलोपौ न भवेतामित्यत आह—**शसिदद्योरिति ।** 'न शसददवादिगुणानाम्' (सू. ६-४-१२६) इति सूत्रेण शसिदद्योरेत्वाभ्यासलोपौ प्रतिषिध्येते । अत्रापि प्रकृतिचरां प्रकृतिचर इति

आदेशादित्वेनानादेशादित्वाभावादेव 'अत एकहल्मध्ये' इत्यनेन एत्वाभ्यासलोपयोरप्रवृत्तेः किं प्रतिषेधेन। कृतश्च प्रतिषेधः स्थान्यभिन्नरूप आदेश आदिर्यस्याङ्गस्य तस्य एत्वाभ्यासलोपयोः अनादेश इति प्रतिषेधो न भवतीति ज्ञापयति। तथा च अनादेश इति प्रतिषेधाप्रवृत्त्या शसिदद्योरप्येत्वाभ्यासलोपयोः प्राप्तौ तत्प्रतिषेधार्थं 'न शसददि' इति सूत्रे शसिददिग्रहणमिति भावः। प्रयोजनं तु पेचतुरित्यादौ अनादेशादेरिति प्रतिषेधाप्रवृत्त्या एत्वाभ्यासलोपयोः सिद्धिरिति।

नन्वेवमपि दन्भधातोर्लिटि देभतुरित्यत्र दन्भ् दन्भ् अतुरिति स्थिते हलादिशेषे 'अनिदिताम्' (सू. ६-४-२४) इति नलोपे च कृते 'असिद्धवदत्राभात्' (सू. ६-४-२२) इति नलोपस्यासिद्धत्वात् अकारस्य संयुक्तहल्मध्यस्थत्वादेकारः अभ्यासलोपश्च न सिध्यतीत्याशङ्क्याह—**श्नसोरल्लोप** इति। 'श्नसोरल्लोपः' (सू. ६-४-१११) इति सूत्रे अत् इति तपरकरणम् आसन् इत्यत्र आटः लोपनिवृत्त्यर्थं क्रियते। अत्र लोपे कर्तव्ये 'असिद्धवदत्राभात्' इति सूत्रेण आटः असिद्धत्वात् आकारस्य लोपो न भविष्यतीति आकारव्यावृत्त्यर्थं क्रियमाणं तपरकरणं व्यर्थं सत् असिद्धत्वमनित्यमिति ज्ञापयति। तेन आटः असिद्धत्वाभावात् तस्य लोपो मा भूदिति तपरकरणमिति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु देभतुरित्यादौ नलोपस्यासिद्धत्वाभावात् एत्वाभ्यासलोपौ सिध्यत इति इति भावः।

[ज्ञा.] 'थलि च सेटि' (सू. ६-४-१२१) ॥ 'तृफलभज' (सू. ६-४-१२२) इति तृग्रहणात् ज्ञापकात् लुलविथेत्यादौ नैत्वाभ्यासलोपौ।

[वि.] 'थलि च सेटि' इति सूत्रेण विधीयमानौ एत्वाभ्यासलोपौ लुलविथेत्यत्रापि भवेताम्। अवादेशे कृते अकारस्यासंयुक्तहल्मध्यस्थत्वात् एत्वस्य प्राप्तेः इत्याशङ्क्याह—**तृफलेत्यादिना**। तेरिथ इत्यत्रापि ऋकारस्य

गुणे कृते अकारस्य 'अत एकहल्मध्ये' (सू. ६-४-१२०) इत्यनेनैव एत्व-सिद्धौ तदर्थं तृग्रहणमनर्थकम्। कृतं च तत् गुणे कृते योऽकारः तस्य एत्वं न भवतीति ज्ञापयति। ततश्च एत्वाप्रवृत्तौ तदर्थं तृग्रहणं सार्थकम्। लुल-विथेत्यादौ च गुणसम्पन्नाकारस्य एत्वं न भवतीति भावः।

[ज्ञा.] बिल्वकादिभ्य(श्च) [श्छस्य] (सू. ६-४-१५३) अत्र (च) [छ] ग्रहणं ज्ञापयति संनियोगशिष्टानामन्यतरापाये उभ-योरप्यपाय इति। 'ज्यादादीयसः' (सू. ६ ४-१६०) लोपानुवृत्त्यैव सिद्धे आत्वविधानं ज्ञापयति अङ्गवृत्ते पुनर्वृत्ताविधिरिति। अकारविधानेन सिद्धे आकारविधानं भाव्यमानेन सवर्णानां ग्रहणं नेत्यस्य ज्ञापकम्। 'कार्मस्ताच्छील्ये' (सू. ६-४-१७२) 'नस्तद्धिते' (सू. ६-४-१४४) इत्येव सिद्धे इदं निपातनं ज्ञापयति ताच्छीलिकेष्वणकृतानि भवन्तीति।

[वि.] एताः परिभाषा इति हेतोरिह न विधियन्ते।

[ज्ञा.] दाण्डिनायन (सू. ६-४-१७४)॥ 'हनस्तोऽचिण्णलोः' (सू. ७-३-३२) इत्येव भ्रौणहत्ये तत्वे सिद्धे तत्त्वनिपातनं तद्धिते तत्व-प्रतिषेधस्य ज्ञापकम्।

[वि.] ननु 'दाण्डिनायन'—इत्यादिसूत्रे दाण्डिनायनादयः शब्दाः निपात्यन्ते। तत्र 'भ्रौणहत्य' इत्यपि कश्चन शब्दः निर्दिष्टः। तत्र किं निपात्यते इति चोद्यं प्रसजति। न च भ्रूणं हन्तीति भ्रूणहा भ्रूणघ्नो भावः इत्यर्थे ब्राह्मणादित्वात् भ्रूणहन्शब्दात् ष्यञि आदिवृद्धौ भ्रौणहन् य इति स्थिते नकारस्य तकारो निपात्यत इति वाच्यम्। 'हनस्तोऽचिण्णलोः' (सू. ७-३-३२) इति सामान्यसूत्रेणैव चिण्णल्भिन्ने ञिति णिति च परे हन्तेस्तकारादेशविधायकेन ञिति ष्यञि परेऽपि तकारादेशसिद्धेस्तकारनिपातनवैयर्थ्यादित्यत आह—**इत्येवेति**।

तथा च तत्वनिपातनं तद्धिते परे हन्तेः 'हनस्तोऽचिण्णलोः' इत्यनेन तकारादेशो न भवतीति ज्ञापयति। अतः ष्यञि तत्वाप्राप्तौ तन्निपात्यते इति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु भ्रौणघ्नो वार्त्रघ्न इत्यादावणि तद्धिते परे हन्तेर्नकारस्य तत्वं न भवतीति भावः।

॥ इति षष्ठोऽध्यायः ॥

॥ अथ सप्तमोऽध्यायः ॥

[ज्ञा.] **आयने** (सू. ७-१-२) ॥ **'घच्छौ च'** (सू. ४-४-११७) **इति चित्करणं ज्ञापकम् आयन्नादय उपदेशे भवन्तीति ।**

[वि.] ननु 'आयनेयी' इति सूत्रेण प्रत्ययादीनां फ् इत्यादीनां आयन्नादयः आदेशा उच्यन्ते । तत्र नडशब्दात् फकि नड फ इति स्थिते प्रत्ययस्वरेण फकारोत्तराकारस्य उदात्तत्वे अस्वरकस्य फ् इत्यस्य स्थाने जातः आयन् स्वररहितो भवेत् । ततश्च नाडायनशब्दे अन्तोदात्त एव भवेत् इष्यते तु आयनः आकारस्योदात्तत्वम् । तस्य सिद्धिमार्गः क इत्याशङ्क्याह—**घच्छौ चेति चित्करणमिति** । प्रत्ययोपदेशावस्थायामेव स्वरप्रवृत्तेः पूर्वमेव प्रत्ययादीनां फादीनामायन्नादय आदेशा भवन्ति । आदेशानन्तरं च स्वरः प्रवर्तते । स च आद्युदात्तः सन् आयन इत्यादेराद्यवर्णस्य आकारादेरुदात्तत्वे पर्यवस्यति । अत्रार्थे ज्ञापकं तु 'घच्छौ च' इति सूत्रे घचश्चित्करणम् । तथा हि अग्र-शब्दात् घचि घकारस्येयादेशे अग्रियशब्दे अन्तिमस्याकारस्य उदात्तत्वसिद्धये घचश्चित्करणं क्रियते । तदेतत् उपदेशावस्थायामेव घकारस्य इयादेशे सति घटते । तदा हि इयादेशानन्तरं प्रत्ययस्वरेण आदेरिकारस्य उदात्तत्वे प्राप्ते तद्बाधित्वा अन्तोदात्तत्वार्थं चित्करणं सार्थकं भवति । यदि चोपदेशावस्थायामा-देशो न भवति तदा घ इत्यत्राकारस्य प्रत्ययस्वरेणोदात्तत्वे ततः घ् इत्यस्यास्वर-कस्य भवन्नियादेशोऽप्यस्वरक एव भविष्यति पूर्वप्रवृत्तः अकारस्वरः स्थास्यति तथा च अग्रियशब्दस्यार्थादन्तोदात्तत्वमपि सेत्स्यति । अतो घचश्चित्करणमनर्थकं स्यात् । तत्सामर्थ्याच्च उपदेशावस्थायामेव आयन्नादय आदेशा भवन्तीति ज्ञाप्यत इति भावः ।

[ज्ञा.] **ङेप्रथमयोः** (सू. ७-१-२८) ॥ **अत्र विभक्त्योर्ग्रहणे युष्मदस्मदोरनादेशे' 'द्वितीयायां' च इति ज्ञापकम् । (सू. ७-२-८६, ८७)**

[वि.] ननु 'ङेप्रथमयोरम्' इति सूत्रेण प्रथमयोरित्यनेन किं प्रथमयोर्विभक्त्योर्ग्रहणं उत प्रथमयोः प्रत्यययोः इति संदेहो जायते। प्रत्यययोर्ग्रहणमिति पक्षे सु औ अनयोरेवामादेशः स्यात्। सन्देहबीजं तु यदि प्रथमयोरिति स्त्रीलिङ्गनिर्देशः तदा विभक्त्योर्ग्रहणम्। यदा तु पुंलिङ्गेन निर्देशः तदा प्रथमयोः प्रत्यययोर्ग्रहणमिति। अतः कथमत्र निर्णेतव्यमिति तत्राह—**अत्र विभक्त्योरिति**। 'ङेप्रथमयो' रित्यत्र प्रथमयोर्विभक्त्योरेव ग्रहणं न तु प्रत्यययोः। तत्र ज्ञापकं तु 'द्वितीयायां च' इति सूत्रम्। तस्य च सूत्रस्य द्वितीयाविभक्तौ परतः युष्मदस्मदोराकारः स्यादित्यर्थः। यदि च 'ङेप्रथमयोरम्' इति सूत्रेण प्रथमयोः प्रत्यययोः सु औ इत्यनयोः अमादेशो विधीयेत तदा द्वितीयाविभक्तेरमादेशाभावात् युष्मदस्मद्ध्यामनादेशरूपैव द्वितीयाविभक्तिर्भविष्यतीति तस्यां परतः 'युष्मदस्मदोरनादेशे' (सू. ७-२-८६) इत्यनेनैव आकारादेशे सिद्धे 'द्वितीयायां च' इति सूत्रं व्यर्थं भवेत्। तस्मात् 'द्वितीयायां च' इति सूत्रं 'ङेप्रथमयोः' इति सूत्रे प्रथमयोरित्यनेन प्रथमाद्वितीयाविभक्त्योर्ग्रहणमिति ज्ञापयति। तथा च द्वितीयाविभक्तेरपि तेन अमादेशविधानात् युष्मदस्मद्भ्यां परा अम् इति आदेशरूपैव विभक्तिर्भविष्यति। तस्यां च अनादेश इति प्रतिषेधे प्राप्ते आकारविधानार्थं 'द्वितीयायां च' इति सूत्रमिति भावः।

[ज्ञा.] नेड्वशि कृति (सू. ७-२-८) ॥ 'कृसृभृ' इति सूत्रे वृञ्वृङोर्ग्रहणं ज्ञापकं प्रत्ययाश्रयोऽपीट्प्रतिषेधो नियम्यत इति।

[वि.] ननु 'नेड्वशि कृति' इति सूत्रे कृद्ग्रहणं मास्तु। न च तदभावे बिभिदिव बिभिदिम इत्यत्र वशादेस्तिङोऽपि इडागमनिषेधः स्यादिति वाच्यम्। 'कृसृभृवृस्तुद्रुस्तुश्रुवो लिटि' (सू. ७-२-१३) इति सूत्रेण क्रादिभ्य एव परस्येण्निषेध इति नियमात् बिभिदिव इत्यादाविण्निषेधाप्रवृत्तेः। न च स नियमः प्रकृतिविशेषमाश्रित्य प्रवृत्तो य इण्निषेधस्तद्विषयकः।

'नेड्वशि' इति तु प्रत्ययाश्रयो निषेधः। एतं च निषेधं क्रादिनियमो न स्पृशति। तथा च बिभिदिवेत्यत्रापि इण्निषेधः स्यादिति तद्वारणाय कृद्ग्रहणमावश्यकमिति वाच्यम्। क्रादिनियमो न प्रकृतिलक्षणनिषेधमात्रविषयः, किं तु प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावानिण्निषेधः स लिटि चेत् तर्हि क्रादिभ्य एवेति नियमात् बिभिदिव इत्यत्र इण्निषेधाप्रवृत्तेः कृतीत्यस्य वैयर्थ्यात्। प्रकृतिप्रत्ययोभयलक्षणस्यापि इण्निषेधस्य क्रादिनियमः इत्यत्र ज्ञापकं तु 'कृसृभृवृ' (सू. ७-२-१३) इति सूत्रे वृ इति सामान्येन वृङ्वृञोरुभयोर्ग्रहणम्। तयोर्ग्रहणस्य प्रयोजनं हि ववृमहे इत्यादाविण्मा भूदिति। यदि च क्रादिनियमः प्रकृत्याश्रयमेव प्रतिषेधं बाधेत न प्रत्ययाश्रयं तदा 'नेड्वशि कृति' (सू. ७-२-८) 'श्र्युकः किति' (सू. ७-२-११) इति सूत्राभ्यामेव इट्प्रतिषेधस्य सिद्धत्वात् नार्थो वृग्रहणेन। तत्क्रियमाणं प्रत्ययाश्रयस्यापि प्रतिषेधस्य निवृत्तिं ज्ञापयति। तथा च वृग्रहणाभावे क्रादिभिन्नत्वेन वृङ्वृञोः, ततः प्रत्ययाश्रयः 'नेड्वशि' इतीण्निषेधोऽपि क्रादिभ्य एवेण्निषेध इति नियमेन व्यावर्तितः स्यात्। ततश्च ववृमहे इत्यादौ इण्निषेधो न सिध्येत्। तत्रापीण्निषेधस्य सिद्धये क्रादिसूत्रे वृग्रहणमर्थवद्भवति। ततश्च क्रादिनियमादेव बिभिदिवेत्यादाविण्निषेधो न भविष्यतीति तत्रेण्निषेधाप्रवृत्तिफलकत्वं 'नेड्वशि कृति' इति सूत्रे कृद्ग्रहणस्य न युज्यत इति स्थितम्।

सर्वमेतन्मनसि कुर्वन्नाह—**कृसृभृ इति सूत्र इति।**

[ज्ञा] घुषिरविशब्दने (सू. ७-२-२३)॥ विशब्दने चुरादिणिचा सिद्धे अविशब्दन इत्युक्तिर्घुषेर्विभाषा णिचो ज्ञापिका। तेन जुघुषुः (पुष्यमाणा वा) [पुष्यमाणवाः] इति सिद्धम्।

[वि.] ननु 'घुषिरविशब्दने' इति सूत्रे अविशब्दन इति मास्तु। घुषिर्हि अविशब्दनार्थकः भ्वादौ पठ्यते। चुरादौ च घुषिर्विशब्दने इति पठ्यते। स च णिजन्तः। सूत्रे च घुषिरिति निर्देशात् भौवादिकस्याविशब्द-

नार्थकस्यैव ग्रहणं न चुरादेः। तदा हि 'घोषिः' इति निर्देष्टव्यं स्यात्। एवं च घुषिरिति निर्देशबलादेव विशब्दनार्थकचुरादिघुषधातुव्यावृत्तिपूर्वकं अविशब्दनार्थकस्य भौवादिकघुषधातोरेव ग्रहणं भविष्यतीति अविशब्दन इति व्यर्थं इत्याशङ्क्याह—**विशब्दन** इत्यादिना। **सिद्ध** इति। अविशब्दने इत्यस्मिन्नंशे सिद्ध इत्यर्थः। तथा च अविशब्दन इत्येतत् व्यर्थं सत् घुषेश्चौरादिकस्य विकल्पेन णिच् भवतीति ज्ञापयति। णिजभावपक्षे च घुषिरिति इगन्तेन विशब्दनार्थकस्य चौरादिकस्यापि ग्रहणं प्रसज्येतेति तद्व्यावृत्त्यर्थं अविशब्दन इत्युक्तमिति भावः। ज्ञापनस्य प्रयोजनं तु विशब्दनार्थकचौरादिकधातोः णिजहिततया 'जुघुषुः' इति प्रामाणिकप्रयोगः उपपन्नो भवतीति। भाष्ये—

'महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः' इति वाक्यं प्रमाणतया उद्धृतम्। स्वाभिप्रायस्य शब्देन प्रकटीकरणं विशब्दनम्। तथा च अविशब्दनार्थे इण्निषेधः घुष्टा रज्जुरिति। विशब्देन तु इट् घुषितं वाक्यमिति।

[ज्ञा.] प्रत्ययोत्तर (सू. ७-२-९७) ॥ इदमेव ज्ञापयति अत्र मपर्यन्तानुवृत्तिर्वा ज्ञापयति अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इति।

[वि.] परिभाषेयम्।

[ज्ञा.] मृजेर्वृद्धिः (सू. ७-२-११४) ॥ भ्रौणहत्ये तत्वनिपातनं धातोः कार्यमुच्यमानं तत्प्रत्यये भवतीत्यस्यार्थस्य ज्ञापकम्।

[वि] इयमपि परिभाषा।

[ज्ञा.] श्वादेरिञि (सू. ७ ३-८) ॥ प्रतिषेधे श्वादिग्रहणं ज्ञापकं अन्यत्र श्वन्ग्रहणे तदादिग्रहणस्य। शौवहानं नाम नगरम्, शौवादष्ट्रो मणिरित्यर्थम्।

[वि.] 'श्वादेरिञि' इति सूत्रस्य यस्य श्वशब्दः आदिः तस्मात् इञि परे 'द्वारादीनां च' (सू. ७-३-४) इति सूत्रविहितः ऐच् न भवतीत्यर्थः। श्वभस्त्रस्यापत्यं श्वाभस्त्रिः इत्युदाहरणम्। ननु 'द्वारादीनां च' इति सूत्रेण द्वारादिगणपठितानां शब्दानाम् देरचो वृद्धिर्न भवति, परं तु ञ्णिभ्यां पूर्वमैजागमो भवतीति विधीयते। द्वारादिगणे च श्वन्शब्दः पठ्यते। तथा च श्वन्शब्दस्यावयवात् वकारात् पूर्वमैजागमस्य तेन प्राप्तावपि श्वभस्त्रशब्दावयवविषये ऐजागमो न तेन प्राप्नोति। तथा च प्राप्त्यभावात् प्रतिषेधोऽनर्थक इत्याशङ्क्याह— **प्रतिषेधे श्वादिग्रहण**मिति। उक्तरीत्या व्यर्थं सत् श्वादिसूत्रं श्वन्ग्रहणेन श्वन्शब्दावयवकस्य शब्दस्यापि ग्रहणमिति ज्ञापयति। ततश्च श्वभस्त्रशब्दस्यापि श्वन्ग्रहणेन ग्रहणात् 'द्वारादीनां च' इति सूत्रेण ऐजागमे प्राप्ते तन्निषेधार्थं 'श्वादेरिञि' इति सूत्रम्।

ज्ञापनफलं तु—शौवहानम् शौवादंष्ट्रः इत्यादावैजागमसिद्धिः। तथा हि-जिहतेऽस्मिन्नित्यर्थे 'ओ हाङ् गतौ' इति धातोः अधिकरणे ल्युट् हानम्। शुनां हानं श्वहानम्। श्वहानमस्मिन्नस्तीत्यर्थे 'तदस्मिन्नस्तीति देशे तन्नाम्नि (सू.४-२-६७) इति सूत्रेणाण्। 'द्वारादीनां च' सूत्रेण वृद्धिनिषेधः ऐजागमश्च। शौवहानमिति रूपम्। एवं शुनो दंष्ट्रा श्वादंष्ट्रा। 'शुनो दन्तदंष्ट्रा' (वा. ६-३-१३०) इति वार्तिकेन दीर्घः। तत्र भव इत्यण्। द्वारादीनां चेति वृद्धिनिषेधः ऐजागमश्च। शौवादंष्ट्र इति रूपम्। अत्रोभयत्रापि श्वन्शब्देन तदादेर्ग्रहणे सत्येव तत्सूत्रं प्रवर्तेतेति तदादिग्रहणफलमवसेयमिति भावः।

[ज्ञा.] 'प्राचां ग्रामनगराणाम्' (सू. ७-३-१४) प्राचां ग्रामाणामित्येव सिद्धे नगरग्रहणं ज्ञापयति ग्रामग्रहणे नगरग्रहणं नेति। तत्तु—'उदीच्यग्रामात्' (सू. ४-२-१०९) 'वाहीकग्रामेभ्यश्च' (४-२-११७) 'दिक्शब्दा ग्राम'

(सू. ६-२-१०३)—इति स्थलत्रये नगरग्रहणकर्तव्यता-पत्त्या भाष्ये दूषितम्। 'विशिष्टलिङ्ग' (सू. २-४-७) इत्यत्र तु नगरप्रतिषेधोऽवक्तव्य एवेति भाष्ये स्पष्टम्।

[वि.] ननु जनसमूहनिवासवाचिनौ ग्रामनगरशब्दौ। तत्र ग्रामशब्देनैव जनसमूहनिवासत्वाविशेषात् नगरस्यापि ग्रहणे सिद्धे 'प्राचां ग्रामनगराणाम्' इति सूत्रे नगरपदोपादानं व्यर्थमित्याशङ्क्य, अत एवात्र व्याकरणे ग्रामपदेन नगरग्रहणं नेति ज्ञापयतीत्याह—**प्राचां ग्रामाणामित्येवेति**। परं त्वेवं ज्ञापनं 'उदीच्यग्रामात्' इत्यादिसूत्रत्रये ग्रामशब्देन नगरग्रहणस्यापीष्टत्वात् तन्न घटेतेति भाष्ये दूषितमित्याह—**तत्तु** इति। ननु ग्रामग्रहणेन नगरस्यापि ग्रहणमिष्टं चेत् 'विशिष्टलिङ्गो नदीदेशोऽग्रामाः' (सू. २-४-७) इति सूत्रे ग्राम-प्रतिषेधेनैव नगरप्रतिषेधस्यापि लाभात् वार्तिककारेण यदुक्तं नगरस्यापि प्रतिषेधो वक्तव्य इति तदानवश्यकमित्याशङ्क्येष्टापत्त्या परिहरति—**विशिष्टलिङ्ग इत्यत्र तु** इति। तथा च तत्र सूत्रे नगरप्रतिषेधो न वक्तव्य एवेत्यर्थः।

[ज्ञा.] 'संख्यायास्सं' (सू ७-३-१५)॥ परिमाणान्तस्यासंज्ञेति सिद्धे संवत्सरग्रहणं ज्ञापयति परिमाणग्रहणेन कालग्रहणं नेति। तेन द्विवर्षेत्यादौ 'अपरिमाण' इति पर्युदासो न।

[वि.] ननु 'संख्यायाः संवत्सरसंख्यस्य च' (सू. ७-३-१५) इति सूत्रेण संख्यावाचकशब्दात् परस्य संवत्सरशब्दस्य संख्यावाचकशब्दस्य चोत्तर-पदवृद्धिर्विधीयते ञिदादौ तद्धिते परे। द्विसांवत्सरिकः द्विषाष्टिक इत्यादिकं उदाहरणम्। तत्र संवत्सरग्रहणं मास्तु, तदभावेऽपि संवत्सरशब्दस्य काल-रूपपरिमाणवाचकस्य 'परिमाणान्तस्यासंज्ञाशाणयोः' (सू. ७-३-१७) इति सूत्रेणैवोत्तरपदवृद्धेः सिद्धेः। कालोऽपि हि क्रियापरिच्छेदहेतुत्वात्परिमाणमित्या-शङ्क्य, अत एव परिमाणग्रहणेन कालरूपपरिमाणग्रहणं नेति ज्ञापयतीत्याह — **परिमाणान्तस्यासंज्ञेति सिद्ध** इति। तथा च 'परिमाणान्तस्य' इति सूत्रे परि-

माणशब्देन संवत्सररूपकालपरिमाणस्य ग्रहणासम्भवात् द्विसांवत्सरिक इत्यादौ तेन सूत्रेणोत्तरपदवृद्धेरप्राप्तौ तत्प्रापणार्थं 'संख्यायास्संवत्सर'-इति सूत्रे संवत्सर-ग्रहणमिति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु द्विवर्षा इत्यादौ द्वे वर्षे भृता इत्यर्थे 'तमधीष्ट' (सू. ५-१-८०) इति ठञि तस्य 'वर्षाल्लुक् च' (सू. ५-१-८८) इति लुकि 'द्विगोः' (सू. ४-१-२१) इति ङीप् प्राप्तः, स च 'अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि' (सू. ४-१-२२) इति सूत्रेण प्रतिषिध्यते। यदि कालोऽपि परिमाणं स्यात् तदा द्विवर्षशब्दस्य परिमाणान्तत्वेन अपरिमाणेति पर्युदासात् ङीप्प्रतिषेधो न भवेत्। कालस्यापरि-माणत्वेनैव ङीपः प्रतिषेधो भवतीति। तदेतदाह—**तेन द्विवर्षेत्यादाविति।**

[ज्ञा.] 'प्रत्ययस्थात्' (सू. ७-३-४४)॥ 'न यासयोः' (सू. ७-३-४५) इति प्रतिषेधात् ज्ञापकात् व्यवधानेऽ-प्येतिकास्वित्यादौ प्रवृत्तिः।

[वि.] नन्वेतच्छब्दस्य स्त्रियां अकचि जसि त्यदाद्यत्वे टापि इत्वे च एतिका इति रूपमिष्यते। तत्राकारेण व्यवधानात् ककारस्य टाप्परकत्वं नास्तीति 'प्रत्ययस्थात्कात्पूर्वस्य' इति इत्वं न प्राप्नोति इत्याशङ्क्याह—**न यासयोरिति प्रतिषेधादिति।** यका सका इत्यादौ इत्वप्रतिषेधार्थं 'न यासयोः' (सू. ७-३-४५) इति सूत्रमारभ्यते। तत्रापि यच्छब्दस्य तच्छब्दस्य च अकचि त्यदाद्यत्वे टापि ककारस्याकारेण व्यवधानात् टाप्परकत्वाभावादेव इकारस्याप्राप्तेः तत्प्रतिषेधोऽनर्थकः स्यात्। अतो ज्ञापयति अकारव्यवधानेऽपि इत्वं भवतीति इत्याशयः।

अत्र कादिति वर्णमात्रस्य ग्रहणमिति पक्षे एतिका हारिका इति स्थल-द्वयेऽपि येन नाव्यवधानन्यायेनाकारव्यवधानेऽपीत्वसिद्धिः। संघातग्रहणमिति पक्षे हारिकेत्यादावकारेण व्यवधानमेव नास्ति। एतिकेत्यत्र तु संघातककारा-भावादित्वस्य प्राप्तिरेव नेति 'न यासयोः' (सू. ७-३-४५) इति ज्ञापकेन

एवंजातीयकानामित्वं साधितं भाष्ये। एवंजातीयकानामित्येतत् अकञ्चतामिति व्याख्यातं च **कैयटेन**। एवं स्थिते ज्ञापकात् व्यवधानेऽपीत्युक्तिश्चिन्त्या इति **पार्थसारथिभट्टाचार्याः**।

[ज्ञ.] 'हेरचङि' (सू. ७-३-५६)॥ अचङीति प्रतिषेधो ज्ञापयति अन्यत्र ण्यधिकस्य कुत्वं भवतीति। तेन प्रजिघाययिषतीति।

[वि.] ननु 'हेरचङि' इति सूत्रस्यायमर्थः अभ्यासात्परस्य हिनोतेः हस्य कुत्वं स्यान्न तु चङीति। 'जिघाय' इत्यादिकमुदाहरणम्। तत्र अचङीति अजीहयत् इत्यत्र हकारस्य कुत्ववारणार्थमुपात्तम्। तद्व्यर्थम्। तथा हि यस्मिन् प्रत्यये निमित्ते अङ्गसंज्ञा तन्निमित्तको योऽभ्यासः तन्निमित्तकद्वयोः पूर्व इति यावत्। ततः परस्य हस्य कुत्वमिति सूत्रं व्याख्यायते। णौ हिनोतिरङ्गं, चङि अभ्यास इति अङ्गत्वाभ्यासत्वयोः समाननिमित्तकत्वाभावात् प्राजीहयदित्यत्र कुत्वं न भविष्यति। तथा च अचङीति मास्तु इत्याशङ्क्याह—**अचङीति प्रतिषेध** इति। तथा च अचङीत्येतत् ण्यन्तस्यापि कुत्वं भवतीति ज्ञापयति। अङ्गत्वस्य णिच् निमित्तम् अभ्यासस्य चङ् निमित्तमिति निमित्तभेदे सत्यपि कुत्वं भवतीति यावत्। तथा च प्राजीहयदित्यत्रापि कुत्वे प्राप्ते तद्वारणाय अचङीत्युक्तम्। तेन चङोऽन्यस्मिन् द्वित्वनिमित्ते परे ण्यन्तस्य कुत्वमभ्यनुज्ञायते। तस्य फलं तु प्रजिघाययिषति इत्यत्र णिजन्ताद्धिनोतेः सनि कुत्वसिद्धिरिति। 'प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम्' इति परिभाषारूपेणेयं **परिभाषेन्दुशेखरे** पठिता।

[ज्ञा°] 'ज्ञाजनोर्जा' (सू ७-३-७९) दीर्घोच्चारणं ज्ञापयत्यङ्गवृत्तपरिभाषाम्। 'णौ चङ्युपधाया ह्रस्वः' (सू. ७-४-१) ओर्णेर्ऋदित्करणात् ज्ञापकात् द्विर्वचनाद्ध्रस्वत्वं बलीय इति। 'नाग्लोपि' (सू. ७-४-२) इति सूत्रे अगिति प्रत्याहारग्रहणात् ज्ञापकात् वृद्धेर्लोपो बलीयान्। तस्माण्णेर्णिच्युपसंख्यानं कार्यम्।

[वि.] ननु मा भवानटिटत् इत्यत्र अटघातोर्ण्यन्तात् लुङि चङि अट् इ अत् इति स्थिते उपधावृद्धौ आट् इ अत् इति जाते 'णौ चङ्युपधाया ह्रस्वः' इति सूत्रेण आकारस्य ह्रस्वे अटि अत् इति जाते 'अजादेर्द्वितीयस्य (सू. ६-१-२) इति टिशब्दस्य द्वित्वे अटि टि अत् इति स्थिते णिलोपे अटिटत् इति रूपमिष्यते। तन्न सिध्यति। आटि अत् इत्यस्यामवस्थायां परमप्युपधाह्रस्वं बाधित्वा नित्यत्वात् टिशब्दस्य द्वित्वे आटिटि अत् इत्यत्र प्रथमस्य णिचः परेण णिचा व्यवधानेन चङ्परकत्वाभावात् उपधाह्रस्वत्वाप्रवृत्तेः आटिटत् इत्येव रूपप्राप्तेरित्याशङ्क्याह— **ओणेर्ऋदित्करणादिति।** ओणेर्ऋदित्करणात् द्विर्वचनात् ह्रस्वत्वं बलीय इति ज्ञाप्यते। तथा च ह्रस्वत्वस्य बलवत्तरत्वात् आदावुपधाह्रस्वत्वे कृते तदनन्तरं द्वित्वे च अटिटत् इत्येव रूपमिति भावः। ओणेर्ऋदित्करणं कथमुक्तार्थे ज्ञापकमिति चेत् श्रूयताम्। ओणृघातोः णिजन्तात्लुङि चङि ओणि अत् इति स्थिते उपधाया ओकारस्य 'णौ चङ्युपधाया ह्रस्वः' (सू. ७-४-१) इत्ति ह्रस्वे प्राप्ते तस्य 'नाग्लोपिशास्वृदिताम्' (सू. ७-४-२) इति सूत्रेण ह्रस्वत्वनिषेधार्थं ओणृ इति धातुः ऋदित्कृतः। यदि च नित्यत्वात् आदौ द्विर्वचनं भवेत् तदा णिशब्दस्य द्वित्वे ओणिणि अत् इति स्थिते प्रथमस्य णिचः द्वितीयेन व्यवधानात् चङ्परकत्वाभावादेव 'णौ चङि' इति ह्रस्वो न भविष्यतीति किमृदित्करणेन। कृतं च तत् द्विर्वचनाद्ध्रस्वत्वं बलीय इति ज्ञापयति। तथा च ह्रस्वे कृते ततो द्वित्वे च मा भवानुणिणत् इत्येव भवेत् मा भवानोणिणत् इति चेष्यते। तदर्थं ओणेर्ऋदित्करणम्। तेन 'नाग्लोपि' इति ह्रस्वनिषेधात् इष्टरूपसिद्धिरिति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु मा भवानटिटत् इति पूर्वोक्तम् इति भावः।

'णौ चङि' इति सूत्रे 'उपधाह्रस्वे णेर्णिच्युपसंख्यानं' इति वार्तिकम्। णिजन्ताण्णिचि ततो लुङि चङि. च उपधाह्रस्वत्वं भवतीति वक्तव्यमिति तदर्थः। वादितवन्तं प्रयोजितवानवीवदद्वीणां देवदत्तेन इति चोदाहरणं भाष्ये प्रदर्शितम्। वदेर्णिजन्तात् वादि इत्यस्मात् णिचि लुङि चङि अडागमे अवाद् इ इ अत्

इत्यत्र प्रथमस्य णिचः द्वितीयेन णिचा व्यवधानात् चङ्परकत्वं नास्तीति उपधाह्रस्वत्वमप्राप्तं वार्तिककारेण विधीयते ।

नन्वत्र द्वितीयस्य णिचः 'णेरनिटि' (सू. ६-४-५१) इति लोपे कृते व्यवधानाभावात् सूत्रेणैव ह्रस्वत्वं सेत्स्यति । न च णेर्लोपेऽपि तस्य स्थानिवद्भावात् व्यवधानमस्त्येवेति वाच्यम् । चङ्परनिर्ह्रासे 'क्विल्लुगुपधात्वचङ्परनिर्ह्रासकुत्वेषु' (वा. १-१-५८) इति स्थानिवद्भावप्रतिषेधात् । न चैवमपि प्रथमस्यापि णिचोऽत्र लोपात् तस्य च इकारस्य अक्त्वेन तल्लोपानन्तरमङ्गमग्लोपि भवतीति 'नाग्लोपिशास्वृदिताम्' (सू. ७-४-२) इति निषेधे प्राप्ते प्रतिप्रसवरूपेण वार्तिकेन ह्रस्वत्वं विधीयत इति वाच्यम् । लोपापेक्षया परत्वात् णिचः वृद्धौ ऐकारे कृते तस्य लोपः, ऐकारश्च नाक् । तस्मात् तल्लोपवदङ्गं नाग्लोपि भवतीति 'नाग्लोपि' इति निषेधाप्रवृत्या णौ चङीति सूत्रेणैव ह्रस्वसिद्धौ वार्तिकारम्भो व्यर्थ इत्यत आह—**नाग्लोपीति सूत्र** इति । अयमत्राभिप्रायः—वृद्धेर्लोपो बलीयानिति ज्ञाप्यते । तत्र च नाग्लोपीति सूत्रमेव ज्ञापकम् । मालामाख्यत् अममालत् इत्यत्र आकाररूपटेर्लोपात् अग्लोपित्वमस्तीति 'नाग्लोपि' इति सूत्रेणोपधाह्रस्वत्वनिषेध इष्यते । तत्र अलोपिनां नेत्यनेनैव निषेधलाभे अग्लोपिनां नेति प्रत्याहारग्रहणम् चाटुमाख्यात् अचचाटत् इत्यादौ उकारलोपयुक्ताङ्गस्यापि उपधाह्रस्वप्रतिषेधार्थमिति वक्तव्यम् । तत्र णिचं निमित्तीकृत्य उकारस्य वृद्धौ कृतायां अनन्तरं टिलोपे औकारलोपित्वमेवास्ति, नाग्लोपित्वमस्तीति प्रत्याहारग्रहणेऽपीष्टसिद्ध्या प्रत्याहारग्रहणमनर्थकं स्यात् । कृतं च प्रत्याहारग्रहणं वृद्धेर्लोपो बलीयानिति ज्ञापयति । ततश्च अवीवददित्यादौ णिलोपे अग्लोपित्वात् निषेधे प्राप्ते तद्बाधनाय उपधाह्रस्वत्वे णेर्णिच्युपसंख्यानं कर्तव्यमेवेति । तदाह —**तस्माण्णेर्णिचीति** ।

[ज्ञा.] 'नाग्लोपि' (सू. ७-४-२) ॥ अग्लोपे स्थानिवद्भावेनैव सिद्धे अग्लोपिग्रहणम् अग्वतां लोपोऽप्यग्लोपिशब्देन

गृह्यत इत्येवमर्थम्। इत उत्तरं स्थानिवत्त्वाभावज्ञापकमग्लोपिग्रहणम् इति भाष्यं त्वेकदेश्युक्तिः।

[वि] ननु 'नाग्लोपिशास्वृदिताम्' इति सूत्रस्य णिचि अग्लोपिनः शास्तेर्ऋदितां चोपधाया ह्रस्वो न स्याच्चङ्परे णौ परत इत्यर्थः। तत्राग्लोपिन उदाहरणम् 'अममालत्' इति। मालामाख्यदित्यर्थे मालाशब्दात् 'तत्करोति तदाचष्टे' इति णिचि लुङि अटि चङि च अ माला इ अत् इति स्थिते 'णाविष्ठवत्' इति टेराकारस्य लोपे माशब्दस्य द्वित्वादौ च अ ममाल् इ अत् इत्यवस्थायाम् उपधाह्रस्वो निषिध्यते आकाररूपाग्लोपवत्त्वादङ्गस्य। अत्र टिलोपस्य 'अचः परस्मिन्' (सू. १-१-५७) इति स्थानिवद्भावेन मकारोत्तराकारस्योपधात्वाभावादेव 'णौ चङ्युपधायाः' (सू. ७-४-१) इति ह्रस्वस्याप्राप्तेः नाग्लोपीति प्रतिषेधोऽनर्थक इत्यत आह—**अग्लोप** इति। अग्वतः समुदायस्य लोपोऽप्यग्लोपग्रहणेन गृह्यत इत्येतदर्थमग्लोपिग्रहणम्। तेन 'अत्यरराजत्' इत्यत्र राजानमतिक्रान्तवानित्यर्थे 'प्रातिपदिकाद्धात्वर्थे' इति णिचि लुङि चङि च 'अन्' इति टेर्लोपे अरराज् अत् इत्यत्रोपधाह्रस्वनिषेधः सिध्यति। अन इति समुदायो हि नाक्, अतस्तल्लोपो यथाश्रुते अग्लोपशब्देन न गृह्यत। अग्वतो लोपोऽप्यग्लोपशब्देन गृह्यत इत्युक्ते तु अन् इति समुदायस्य अकाररूपाग्वत्त्वात् तल्लोपयुक्तमङ्गमग्लोपि भवतीति 'नाग्लोपि' इति उपधाह्रस्वनिषेधः सिद्धः। तथा च अममालत् इत्यादौ स्थानिवद्भावेन निर्वाहेऽपि 'अत्यरराजत्' इत्यत्र अज्झल्समुदायादेशस्य लोपस्याजादेशत्वाभावेन स्थनिवत्त्वाप्रवृत्तेः उपधाह्रस्वनिषेधलाभार्थमग्लोपिग्रहणं कृतम्। तच्च अग्वतां लोपोऽप्यग्लोपग्रहणेन गृह्यत इति स्वीकृत एव सार्थकमिति भावः। तदेतत् अभिप्रेत्योक्तं कैयटे—

'अग्लोपग्रहणसामर्थ्याच्च समुदायलोपोऽप्यग्लोप
आश्रीयते, केवलाग्लोपे प्रदिषेधानर्थक्यात्' इति।

भाष्ये तु—

'एवं तर्हि सिद्धे सति यदग्लोपिनां नेति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः इत उत्तरं स्थानिवद्भावो न भवतीति ।'

इति नाग्लोपीति प्रतिषेधस्यार्थान्तरज्ञापकत्वमुक्तम् । तत्तु 'अचः परस्मिन्' इति सूत्रे हलचोरादेशो न स्थानिवदिति भाष्ये निर्णीतत्वेन तत एव गतार्थमित्येकदेश्युक्तिरित्याह—**इत उत्तरमित्यादिना** । स्पष्टं चैतत्कैयटोद्योतयोः ।

[ज्ञा०] रीङृतः (सू. ७-४-२७) **रीङो दीर्घोच्चारणम् अङ्गवृत्तपरिभाषाज्ञापकम् । अर्तिपिपर्त्योश्च** (सू. ७-४-७७)॥ **'बहुलं छन्दसि' इत्येव सिद्धे अर्तिग्रहणमियर्तेर्भाषायां साधुत्वज्ञापकम् ।**

[वि.] ननु ऋधातोः पृधातोश्च जुहोत्यादिपठितयोरभ्यासस्य इकारादेशो विधीयते 'अर्तिपिपर्त्योश्च' इति सूत्रेण । तत्र ऋधातोः छान्दसत्वात् 'बहुलं छन्दसि' (सू. ७-४-७८) इत्यनेनैव अभ्यासस्येकारः स्याच्छन्दसीत्यर्थकेन इकारादेशसिद्धेः अर्तिग्रहणं व्यर्थमित्याशङ्क्य ऋधातोर्भाषायामपि प्रयोगस्य साधुत्वज्ञापनार्थं तदित्याह—**इत्येव सिद्ध** इति ।

[ज्ञा.] गुणो यङ् (सू. ७-४-८२)॥ **'दीर्घोऽकितः'** (सू. ७-४-८३) **इत्यकिद्ग्रहणं ज्ञापयति अभ्यासविकारेषु बाधका न बाधन्त इति ।**

[वि.] परिभाषेयम् ।

[ज्ञा.] दीर्घोऽकितः (सू. ७-४-८३) **ह्रस्वत्वात्वेत्वगुणेषु अभ्यासस्येति अच्ऋकाराकारेकारविशेषणम् ।**

[वि.] ननु 'दीर्घोऽकितः' इति सूत्रे 'अकितः' इति व्यर्थम् । न च तदभावे यंयम्यते रंरम्यत इत्यादौ यम् रम् इति धात्वोः यङि धात्वोर्द्वित्वे हलादिशेषे 'नुगतोऽनुनासिकान्तस्य' (सू. ७-४-८५) इत्यभ्यासस्य नुकि

तस्यानुस्वारे च यंयम्यते रंरम्यत इति रूपे। तत्राभ्यासस्य दीर्घवारणाय अकित इत्युक्तम्। नुकि सति किदन्तत्वादभ्यासस्याकिदन्तत्वं नास्तीति न दोषः। तथा च सार्थकमकिदग्रहणमिति वाच्यम्। दीर्घश्रुत्या 'अचः' (सू. १-२-२८) इति परिभाषाया उपस्थितेः अच इत्यस्य चाभ्यासविशेषणत्वात् अजन्तस्याभ्यासस्य दीर्घ इति सूत्रार्थः। नुकि कृते च नकारान्तोऽभ्यासो नाजन्त इत्येव दीर्घाप्रसक्तेरकिदग्रहणवैयर्थ्यात्।

एवं छोधातोः 'आदेच उपदेशे' (सू. ६-१-४५) इत्यात्वे लिटि छाशब्दस्य द्वित्वेऽन्तरङ्गत्वात् तुकि (सू. ६-१-७५) छात् छा अतुरित्यत्र 'ह्रस्वः' (सू. ४-४-५९) इति सूत्रेणाभ्यासस्य ह्रस्वो वक्तव्यः। तत्रापि ह्रस्वश्रुत्या 'अच' इत्युपस्थितेः तस्य चाभ्यासविशेषणत्वात् अजन्ताभ्यासस्य ह्रस्व इति तत्सूत्रार्थः। तुकि कृते चाभ्यासस्याजन्तत्वाभावेन ह्रस्वो न सिध्यति। ततश्च चच्छदतुः इति रूपं न प्राप्नोति।

एवं चच्छृदतुः इत्यत्र छृदधातोर्द्विवचने हलादिशेषे च 'छे च' (सू. ६-१-७३) इति तुकि 'उरत्' इति सूत्रेण ऋकारस्यात्वं न स्यात्। उरित्यस्याभ्यासविशेषणत्वेन ऋवर्णान्तभ्यासस्यात्वविधानात् तुकि कृते अभ्यासस्य ऋवर्णान्तत्वाभावात्।

तथा 'चिच्छादयिषति' इत्यत्र छदधातोर्णिजन्तात् सनि धातोर्द्वित्वे हलादिशेषे च + छादयिषति इति स्थिते 'छे च' इति तुकि 'सन्यतः' (सू. ७-४-७९) इतीत्वं न प्राप्नोति, अभ्यासस्यादन्तत्वाभावात्।

तथा 'चेच्छिद्यते' इत्यत्र छिदधातोर्यङि द्वित्वे हलादिशेषे चर्त्वे चि + छिद्यते इति स्थिते 'छे च' इति तुकि 'गुणो यङ्लुकोः' (सू. ७-४-८२) इति गुणो न स्यात्। गुणश्रुत्या 'इकः' (सू. १-१-३) इत्युपस्थितेः तस्य चाभ्यासविशेषणत्वेन इगन्ताभ्यासस्यैव गुणविधानेन तुकि कृतेऽभ्यासस्येगन्तत्वा-

भावादित्याशङ्क्याह—ह्रस्वत्वेत्यादि । अयमाशयः—प्रदर्शितेषु सूत्रेषु विशेष्य-विशेषणभावे कामचारात् 'अचः' इत्यादिकं नाभ्यासविशेषणम् । अपि तु अभ्यासस्येत्येतदेव अच इत्यादेर्विशेषणम् । तेन अभ्यासस्य योऽच् तस्य दीर्घः अभ्यासस्य य ऋकारस्तस्य अत्वम्, अभ्यासस्य योऽकारस्तस्य इकारादेशः, अभ्यासस्य य इक् तस्य गुण इति प्रदर्शितानां सूत्राणामर्थ इति यथायथं ह्रस्वादयः सिध्यन्ति । एवं च यंयम्यत इत्यत्रापि नुकि कृतेऽपि अभ्यासावयवाचः दीर्घ-प्राप्तौ तन्निषेधार्थम् अकित इत्युक्तमिति ।

इति सप्तमोऽध्यायः ।

अथ अष्टमोऽध्यायः

[ज्ञा.] सर्वस्य द्वे (सू. ८-१-१) ॥ कस्कादिषु कौतस्कुतशब्द-पाठात् ज्ञापकात् द्विः प्रयोगपक्षेऽपि पौनःपुन्यमित्यादि-सिद्धिः ।

[वि.] ननु 'सर्वस्य द्वे' इति सूत्रेण विधीयमानं द्विर्वचनं द्विः प्रयोग इति पक्षे पुनःशब्दस्य द्विर्वचने पुनःपुनर्भवितरि वर्तमानात् पुनःपुनःशब्दात् भावे ष्यञ्प्रत्यये पौनःपुन्यमिति, भवार्थे 'कालाट्ठञ्' (सू. ४-३-११) इति ठञि पौनःपुनिकमिति च रूपमिष्यते, तन्न सिध्येत् । समासग्रहणकृतेन नियमेन अर्थवतः समासरूपसमुदायस्यैव प्रातिपदिकसंज्ञाभ्यनुज्ञानेन पुनःपुनरिति समुदायस्य प्रातिपदिकत्वाभावेन प्रातिपदिकाधिकारीयतद्धितानुपपत्तेरित्याशङ्क्याह— **कस्कादिष्विति** । कुतस्कुतः शब्दस्याप्रातिपदिकत्वेन ततोऽणो दुर्लभत्वेन कौतस्कुत इत्यणन्तपाठोऽसंगतः सन् द्विरुक्तादप्रातिपदिकादपि तद्धितोत्पत्तिर्भवतीति ज्ञापयति । अतो न दोष इति भावः ।

[ज्ञा.] जात्वपूर्वम् (सू.८-१-४७)॥'आहो उताहो' (सू.८-१-४९) इत्यत्रानन्तरग्रहणात् ज्ञापकात् अपूर्वग्रहणं जातुविशेषणं न तिङन्तस्य । तत्राप्यपूर्वमित्यनुवृत्तेः ।

[वि.] ननु 'जात्वपूर्वम्' इत्यत्र अपूर्वमित्यस्य अविद्यमानपूर्वमित्यर्थः । तत्रापूर्वमिति किं जातुविशेषणम् उत तिङन्तविशेषणम् इति संदेहः । तत्र प्रथमपक्षे अविद्यमानपूर्वं यज्जातु तद्युक्तं तिङन्तं नानुदात्तमित्यर्थः । जातु भोक्ष्यस इत्यादिकमुदाहरणम् । द्वितीयपक्षे जातुशब्दादपूर्वं तिङन्तं नानुदात्तमित्यर्थः । तत्र कतरः पक्षः प्रामाणिक इत्याशङ्क्याह—**आहो उताहो** इति । अयमाशयः- 'आहो उताहो चानन्तरम्' (सू. ८-१-४९) इति सूत्रेण आहो उताहो इत्याभ्यामनन्तरं तिङन्तं न निहन्यत इति बोध्यते । आहो भुङ्क्ते उताहो

भुङ्क्ते इत्युदाहरणे। तत्रापि 'जात्वपूर्वम्' इति सूत्रात् अपूर्वमित्यनुवर्तते। तद्यदि तिङन्तविशेषणं स्यात् तर्हि अविद्यमानपूर्वं तिङन्तं आहो उताहो इत्याभ्यामनन्तरमेव भविष्यतीति 'आहो देवदत्तः पचति' इत्यत्र सपूर्वत्वादेव तिङन्तस्य निघातनिषेधो न भविष्यतीति 'आहो उताहो' इति सूत्रे अनन्तरग्रहणं व्यर्थम्। कृतं च तत्, अपूर्वमित्येतन्न तिङन्तविशेषणम्, अपि तु निमित्तविशेषणमिति ज्ञापयति। तथा च अपूर्वात् आहो इत्यस्मात् उताहो इत्यस्माच्च तिङन्तं नानुदात्तमित्युक्ते देव आहो भुङ्क्त इति सपूर्वस्य आहोशब्दस्य व्यावर्तनेऽपि आहो देवदत्तः पचतीति सपूर्वं तिङन्तं न व्यावर्तितं भवतीति तद्व्यावृत्तये अनन्तरग्रहणम्। तेन 'जात्वपूर्वम्' इत्यत्रापि अपूर्वमित्येतत् निमित्तस्य जातु इत्यस्यैव विशेषणं न तिङन्तस्येति निश्चीयत इति।

इत्यष्टमोऽध्यायः

श्रीवेंकटेशस्य तथा गुरूणां
बुधोत्तमानां करुणार्द्रदृष्ट्या।
श्रीपार्थसारथ्यभिमानतश्च
व्याख्येयमापूरि विनैव विघ्नम्॥

नावल्पाकेति विख्याते सुधीगणविभूषिते।
अग्रहारे लब्धजन्मा चतुरशास्त्रशिरोमणिः॥

रामानुजाचार्यनामा कृष्णतातसुधीसुतः।
बालानां सुखबोधाय विवृतिं कृतवानिमाम्॥

॥ श्रीः ॥

ज्ञापकसंग्रहपरिशिष्टम् (१)

(विवृत्या समेतम्)

॥ प्रथमोऽध्यायः ॥

ज्ञापकसंग्रहे नागेशेन असंगृहीतानि भाष्यारूढानि वचनानि संकलय्य अत्र व्याख्यायन्ते ।

[ज्ञा.प.] एओङ् । ऐऔच् । 'अमि पूर्वः' (सू. ६-१-१०७) इति पूर्वग्रहणं ज्ञापकं यथाजातीयकः पूर्वस्तथाजातीयक उभयोर्भवतीति । नानेन संप्रसारणस्य दीर्घो भवतीत्यत्र 'हलः' (सू. ६-४-३) इति सूत्रं ज्ञापकम् । रूपग्रहणं ज्ञापकं यथाजातीयकं परस्य रूपं तथाजातीयकमुभयोरिति ।

[वि.] 'आद्गुणः' (सू. ६-१-८७) इत्यादिषु एकादेशविधायकसूत्रेषु दीर्घग्रहणं कर्तव्यम् पूर्वपरयोः स्थाने भवन् गुणवृद्ध्यादिः द्विमात्र एव यथा स्यात् स्थान्यनुसारेण त्रिमात्रश्चतुर्मात्रो वा मा भूदित्येवमर्थम् इति वार्तिककारेणोक्ते भाष्यकारः—दीर्घग्रहणं न कर्तव्यम्, योगविभागादेवेष्टसिद्धेः । 'अकः सवर्णे' इत्येको योगः । तस्य चाकः सवर्णे परे एको भवतीत्यर्थः । ततो 'दीर्घः' इत्येको योगः । तस्य च 'एकः पूर्वपरयोः' इत्येवं निर्दिष्टो यः स दीर्घः—द्विमात्रो भवतीत्यर्थः इति प्रत्यपादयत् । तदुपरि 'पशुम्, विद्धम्, पचन्ति' इत्यत्राप्येकादेशो द्विमात्रो भवेदित्याशङ्क्य ज्ञापकेन समाधानमुक्तम् । तदाह—**अमि पूर्व** इति । अयमाशयः—पशुम् इत्यत्र पशु + अम् इति स्थिते पूर्वपरयोरुकाराकारयोः स्थाने पूर्व उकार आदेशो भवति, स द्विमात्रो

भवेत् सति दीर्घग्रहणे इति शङ्का। यद्यत्र द्विमात्र आदेशः स्यात् तदा पूर्वग्रहणं न कुर्यात्। प्रथमयोः पूर्वसवर्णे इत्यतः पूर्वसवर्णानुवृत्त्यैवेष्टलाभात्। एवं स्थिते यत्पूर्वग्रहणं करोति तज्ज्ञापयति यथाजातीयकः पूर्वस्तथाजातीयक एवोभयोः स्थाने भवतीति। तथा च पशुमित्यत्र एकादेशः पूर्वजातीयः—एकमात्र एव भवतीति समाधानम्।

तथा विद्धमित्यत्र व्यधधातोः क्तप्रत्यये संप्रसारणे वि अधूत इति स्थिते 'संप्रसारणाच्च' (सू. ६-१-१०८) इत्यनेन भवत् पूर्वरूपं द्विमात्रं भवेदिति शङ्का। यदि द्विमात्रं भवेत्तदा 'हलः' इति सूत्रेण हल उत्तरस्य संप्रसारणस्य दीर्घं न विदध्यात्, द्विमात्रात्मकपूर्वरूपेणैव इष्टसिद्धेः। अतस्तत्सूत्रं ज्ञापयति 'संप्रसारणाच्च' इति सूत्रेण भवत् पूर्वरूपं दीर्घात्मकं नेति। अतो न दोष इति समाधानम्।

तथा पचन्तीत्यत्र पच+अन्तीति स्थिते 'अतो गुणे' (सू. ६-१-९७) इत्यनेन पररूपं दीर्घात्मकं भवेदिति शङ्का। पररूपमिति रूपग्रहणात् यथाजातीयकं परस्य रूपं तथाजातीयकमेवोभयोः स्थाने भवतीति ज्ञाप्यते। अतोऽत्र एकमात्र एवादेशो भवतीति समाधानम्।

[ज्ञा.प.] दीर्घाच्छे तुग्विधानात् ज्ञापकात् न दीर्घे ह्रस्वाश्रयो विधिर्भवतीति।

[वि०] वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इति पक्षे आलृय प्रलृय इत्यादौ ह्रस्वग्रहणेन ऊकारैकदेशस्य उकारस्यापि ग्रहणात् 'ह्रस्वस्य पिति कृति तुक्' (सू.६-१-७१) इति तुक्प्रसङ्ग इत्याशङ्क्याह—**दीर्घाच्छ** इति। चेच्छिद्यत इत्यादौ तुगागमसिद्धये हि 'दीर्घात्' (सू. ६-१-७५) इति सूत्रमारभ्यते। तत्राप्येकारैकदेशस्य इकारस्य ह्रस्वशब्देन ग्रहणात् 'छे च' (सू. ६-१-७३) इत्यनेनैव तुक्सिद्धेः दीर्घात् इति सूत्रं व्यर्थं सत् दीर्घे ह्रस्वमाश्रित्य विधीयमानं कार्यं न भवतीति ज्ञापयति। अतो न आलूयेत्यादौ तुगापत्तिरिति भावः।

[ज्ञा.प.] गापोष्टक् (सू. ३-२-८) इति ककारानुबन्धो ज्ञापयति नाकारस्थस्य अकारस्य लोपो भवतीति ।

[वि.] ननु वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इति पक्षे याता वाता इत्यादौ आकारैकदेशस्य अकारस्य 'अतो लोपः' (सू.६-४-४८) इति लोपः प्राप्नोतीत्याशङ्क्याह—**गापोष्टक्** इति । 'गापोष्टक्' इति सूत्रेण गायतेः पिबतेश्चानुपसर्गे कर्मण्युपपदे टक्प्रत्ययो विधीयते । सामगः सुराप इत्युदारणम् । टकि ककारानुबन्धः सामगा अ इत्यत्र 'आतो लोप इटि च' (सू.६-४-६४) इत्याकारलोपार्थं क्रियते । स मास्तु । आकारावयवस्य अकारस्य 'अतो लोपः' (सू.६-४-४८) इति लोपे कृते सामग + अ इति स्थिते द्वयोरकारयोः पररूपेणेष्टं रूपं सिध्यतीति किमाकारलोपार्थेन ककारानुबन्धेन । स क्रियमाणः आकारस्थस्य अकारस्य लोपो न भवतीति ज्ञापयति । तथा च अकारलोपाभावे आकारस्यापि यदि लोपो न स्यात् तदेष्टरूपासिद्धेः आलोपार्थं ककारानुबन्ध इति स्वांशे चारितार्थ्यम् । प्रयोजनं तु याता वाता इत्यादावतो लोपो न भवतीति ।

यद्यपि ककारानुबन्धस्य आकारस्य गुणो न भवतीत्यर्थज्ञापकत्वम् 'इको गुणवृद्धी' (सू. १-१-३) इति सूत्रे भाष्ये प्रोक्तम्, तथापि एकस्योभयज्ञापकत्वं न विरुध्यत इति बोध्यम् । स्पष्टं चेदं तत्र तत्र प्रदीपादौ ।

[ज्ञा. प.] गोनौग्रहणात् ज्ञापकात् दीर्घे व्यज्लक्षणो विधिर्न भवति ।

[वि.] 'एकवर्णवच्च' इति वार्तिकम् । तस्य च दीर्घ आकारादिः ह्रस्वाकारद्वयसमुदायरूपोऽपि एकवर्णेन तुल्यो भवतीति वक्तव्यम् । अन्यथा वाचा तरतीत्यर्थे वाक्शब्दात् 'नौव्यचष्ठन्' (सू. ४-४-७) इति ठन् प्रत्ययः स्यादित्यर्थः । इदं वार्तिकं ज्ञापकेनान्यथासिद्धमित्याशयेनाह—**गोनौग्रहणा**दिति । ओकारस्य अकार-उकारसमुदायरूपत्वेन गोशब्दस्य व्यच्त्वात्

'द्यच्' इत्यनेनैव गोशब्दस्यापि ग्रहणे सिद्धे 'गोद्यचोऽसंख्यापरिमाणाश्वादेर्यत्' (सू. ५-१-३९) इति सूत्रे गोग्रहणं व्यर्थम्। तथा 'नौद्यचष्ठन्' इति सूत्रे नौग्रहणं च व्यर्थम्। अतस्तदुभयं ज्ञापयति दीर्घे द्यज्लक्षणो विधिर्नेति। अतो न दोष इति भावः। तथा च 'एकवर्णवच्च' इति वार्तिकमनावश्यकम्। तत्फलस्य ज्ञापकेनैव सिद्धेरित्यवधेयम्।

[ज्ञा.प.] इको गुणवृद्धी (सू. १-१-३)॥ 'गापोष्टक्' (सू.३-२-८) इत्यनन्यार्थककारानुबन्धकरणात् ज्ञापकात् न आकारस्य गुणो भवतीति।

[वि.] 'इको गुणवृद्धी' इति सूत्रे 'इग्ग्रहणमाकारसन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम्' इति वार्तिकम्। याता वातेत्यादौ आकारस्य 'सार्वधातुकार्धधातुकयोः' (सू. ७-३-८४) इति गुणः प्राप्नोति, इग्ग्रहणाच्च स न भवतीति प्रथमं प्रयोजनम्। इदं च प्रयोजनं भाष्यकारः प्रत्याचख्यौ। तथा हि - इग्ग्रहणस्य नाकारनिवृत्तिः प्रयोजनम्। आकारस्य गुणो न भवतीति ज्ञापकमहिम्ना अवगमात्। 'गापोष्टक्' (सू. ३-२-८) इति सूत्रे प्रत्यये कित्करणमाकारस्य गुणो न भवतीत्यत्र ज्ञापकम्। तेन हि सूत्रेणानुपसृष्टाभ्यां गापाभ्यां कर्मण्युपपदे टक्प्रत्ययो विधीयते। सामगा+टक् (अ) इति स्थिते 'आतो लोप इटि च' इत्याकारलोपे सामग इति भवति। प्रत्ययस्य कित्त्वमाकारलोपार्थं क्रियते। तन्मास्तु। ट इत्येव प्रत्ययोऽस्तु। आकारस्य 'सार्वधातुकार्धधातुकयोः' इति गुणे अकारे सामग+अ इति स्थिते द्वयोरकारयोः पररूपेण सामग इति रूपमाकारलोपं विनैव सिध्यति। तथा च ककारानुबन्धः व्यर्थः सन् आकारस्य गुणो न भवतीति ज्ञापयति। गुणाभावे आकारलोपे चासति इष्टं रूपं न सिध्येदिति आलोपार्थं ककारानुबन्धकरणमिति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु याता वातेत्यादौ आकारस्य गुणो न भवतीति। तथा च ज्ञापकेनैव आकारस्य गुणाभावे सिद्धे

तदर्थमिग्ग्रहणमिति न युक्तमिति भाष्याशयः। तदाह—**गापोष्टक्** इति। **अनन्यार्थे**ति। आकारलोपातिरिक्तप्रयोजनरहितेत्यर्थः। 'आतोऽनुपसर्गे कः' (सू. ३-२-३) इति ककारानुबन्धस्य 'तुन्दशोकयोः परिमृजापनुदोः' (सू. ३-२-५) इत्यत्र प्रयोजनं भवितुमर्हति। न तादृशमन्यत्प्रयोजनमस्ति टकः ककारानुबन्धस्येत्याशयेनैवमुक्तम्।

[ज्ञा.प.] ईदूतौ च (सू. १-१-१९)॥ न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवतीत्यत्रार्थग्रहणं ज्ञापकम्।

[वि.] ननु 'ईदूतौ च सप्तम्यर्थे' इति सूत्रे अर्थग्रहणं मास्तु। न च तदभावे 'सोमो गौरी अधिश्रितः' इत्यत्र सप्तम्याः लुप्तत्वेन सप्तमीरूपस्य ईकारस्याभावात् प्रगृह्यसंज्ञा न स्यात्। इष्यते च सा। तदर्थमर्थग्रहणं कृतम्। कृते च तस्मिन् सप्तम्याः लुप्तत्वेऽपि तदर्थसद्भावात् प्रगृह्यसंज्ञा भविष्यतीति वाच्यम्। अर्थग्रहणाभावेऽपि सप्तमीरूपयोरीदूतोरसंभवेन वचनबलात् सप्तमीसहचरितमीदूदन्तमित्यर्थलाभात् सप्तम्याः लुप्तत्वेऽपि प्रत्ययलक्षणेन सप्तमीसहचरितत्वमस्तीति प्रगृह्यसंज्ञायाः सिद्धेरर्थग्रहणवैयर्थ्यतादवस्थ्यादित्याशङ्क्याह—**न प्रगृह्यसंज्ञाया**मिति। यदि प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणं स्यात्तदा 'ईदूतौ सप्तमी' इत्यनेनैव सप्तमीसहचरितमीदूदन्तं प्रगृह्यमित्यर्थकेन लुप्तायामपि सप्तम्यां प्रत्ययलक्षणेन पूर्वोक्तरीत्या संज्ञा भविष्यतीति किम् अर्थग्रहणेन। तत्क्रियमाणं प्रत्ययलक्षणाभावं सूचयति। तथा च वाप्यश्व इत्यादौ प्रगृह्यसंज्ञाया अभावः प्रयोजनमिति भावः।

[ज्ञा. प.] बहुगण (सू. १-१-२३)॥ 'वतोरिड्वा' (सू. ५-१-२३) इत्यादिज्ञापकात् बहुगणादीनां संख्याकार्यं भवति।

[वि.] 'बहुगणवतुडति संख्या' इति सूत्रं बहुगणादीनां संख्यासंज्ञां बोधयति। इदं सूत्रं त्यक्तुं शक्यम्। न च तर्हि विधिप्रदेशेषु संख्याशब्देन तेषां कथं ग्रहणं स्यादिति वाच्यम्। ज्ञापकेन बह्वादीनां संख्याकार्यं भवतीत्यवगमात्। तथा हि—'वतोरिड्वा' इति सूत्रेण वत्वन्तात्परस्य कनः इडागमो विधीयते,

तावतिकः तावत्कः इत्युदाहरणम्। कन्प्रत्ययश्च 'संख्याया अतिशदन्तायाः कन्' (सू. ५-१-२२) इति सूत्रेण प्रापयितव्यः। यदि वत्वन्तस्य संख्याशब्देन ग्रहणं न स्यात् तदा ततः कनोऽप्राप्त्या ततः परस्य कनः इड्विधानं नोपपद्येत। तद्विधानसामर्थ्याच्च वत्वन्तस्य संख्याकार्यं भवतीति ज्ञायते। एवं 'बहुपूगगणसङ्घस्य तिथुक्' (सू. ५-२-५२) इति सूत्रेण बहुगणशब्दयोः डटि परे तिथुगागमो विधीयते। डट् च 'तस्य पूरणे डट्' (सू. ५-२-४८) इत्यनेन प्रापणीयः। तयोः संख्याशब्देन अग्रहणे डटोऽप्राप्त्या तस्मिन् परे आगमविधानमनुपपन्नं सत् बहुगणयोः संख्याकार्यं ज्ञापयति। एवं 'षट्कतिकतिपयचतुरां थुक्' (सू. ५-२-५१) इति सूत्रेण डत्यन्तात् कतिशब्दात् संख्यायाः विहिते डति परे विधीयमानः थुगागमः डत्यन्तस्यापि संख्याकार्यं भवतीति ज्ञापयति। एवं वतुविषये 'वतोरिथुक्' (सू. ५-२-५३) इति सूत्रमपि संख्याकार्यस्य ज्ञापकम्। तथा च बहुगणवतुडतीनाम् उक्तज्ञापकैः संख्याकार्यस्य सिद्धेः तेषां संख्यासंज्ञाविधायकं 'बहुगणवतुडति संख्या' इति सूत्रं प्रत्याख्येयमिति भाष्ये स्थितम्। तदेतदभिप्रेत्याह—**वतोरिड्ढा इत्यादिज्ञापकादिति।**

[ज्ञा.प.] अव्ययीभावश्च (सू. १-१-४१) ॥ 'नाव्ययीभावात्' (सू. २-४-८३) इति प्रतिषेधात् ज्ञापकात् भवत्यव्ययीभावाल्लुक्।

[वि.] 'अव्ययीभावश्च' इति सूत्रेणाव्ययीभावसमासस्याव्ययसंज्ञा चोद्यते। तत्प्रयोजनं च 'लुङ्मुखस्वरोपचाराः' इति वार्तिके प्रोक्तम्। उपाग्नि प्रत्यग्नि इत्यादौ अव्ययीभावात् परस्य सुपः 'अव्ययादाप्सुपः' इति सूत्रेण लुग्वक्तव्यः। स चाव्ययीभावस्याव्ययसंज्ञां विना न संभवतीति लुक् प्रथमं प्रयोजनम्। तच्च ज्ञापकादेव निर्वहति। तथा हि 'नाव्ययीभावादतोऽम् त्वपञ्चम्याः' (सू. २-४-८३) इति सूत्रेण अदन्ताद्व्ययीभावात्परस्य सुपः लुक् न भवतीति यः प्रतिषेधः सः 'अव्ययादाप्सुपः' इति सूत्रेण प्राप्तस्य लुक इति वक्तव्यम्। अव्ययीभावस्याव्ययत्वाभावे सुबुलुकोऽप्राप्त्या तन्निषेधो व्यर्थः सन् भवत्यव्ययी-

भावात्परस्य सुपो लुगिति ज्ञापयति। तथा चाव्ययसंज्ञां विनैव ज्ञापकादेवाव्ययीभावात्परस्य सुपो लुक्सिद्धेः तत्प्रयोजनकत्वमव्ययीभावस्याव्ययसंज्ञाया न युज्यत इति भाष्ये स्थितम्। तदाह—**नाव्ययीभावादिति**।

[ज्ञा प.] न लुमता (सू. १-१-६३) ॥ सात्प्रतिषेधो ज्ञापकः स्त्रादिषु पदत्वेन येषां पदसंज्ञा न तेभ्यः प्रतिषेध इति।

[वि.] 'न लुमताङ्गस्य' इति सूत्रे 'उत्तरपदत्वे चापदादिविधा'वितिवार्तिकम्। उत्तरपदस्य पदव्यपदेशे कर्तव्ये प्रत्ययलक्षणं न भवति पदादिविधिं वर्जयित्वा इति तदर्थः। परमवाचा इत्यादौ परमा च सा वाक् चेति विग्रहे परमा सु वाच् सु इति स्थिते समासे तदवयवसुपोर्लुकि समुदायाद्विभक्तौ सत्यां परमवाचा इति भवति। तत्र वाच् इत्यस्य समासार्था या विभक्तिः कृता तां प्रत्ययलक्षणेनाश्रित्य सुबन्तत्वात् पदसंज्ञायां 'चोः कुः' (सू. ८-२-३०) इति कुत्वं प्राप्नोति। अतः उत्तरपदस्य पदत्वव्यपदेशे कर्तव्ये प्रत्ययलक्षणं न भवतीति वक्तव्यम्। एवं चेत् दधिसेचावित्यत्र दध्नः सेचाविति विग्रहे समासावयवसुपोर्लुकि प्रत्ययलक्षणेन पदत्वमाश्रित्य 'सात्पदाद्योः' (सू. ८-३-१११) इति षत्वनिषेध इष्यते, स न स्यात् अत उक्तम् **अपदादिविधाविति**। षत्वनिषेधस्य पदादिविधित्वात् प्रत्ययलक्षणं भवत्येवेति न दोष इति वार्तिकाशयः।

भाष्यकारस्तु 'यचि भम्' इत्यस्य यजादिप्रत्यये पूर्वं भसंज्ञं भवतीति व्याख्यानं कृत्वा 'परमवाचा' इत्यादौ भत्वात्पदत्वाभावेन कुत्वाप्राप्तेर्वार्तिकं प्रत्याख्येयमित्युपपादयामास। तदुपरि यदि वार्तिकं प्रत्याख्यायते तर्हि 'अपदादिविधौ प्रत्ययलक्षणप्रतिषेधो न' इत्यर्थस्यालाभात् 'दधिसेचौ' इत्यादौ पदादित्वप्रयुक्तषत्वप्रतिषेधः कथं साधनीयः इत्याशङ्कायामाह स्म भाष्यकारः 'सात्पदाद्योः' इति सूत्रे पदस्यादिरिति न विग्रहः, अपि तु पदादादिरिति। तथा च दधि इति पदात् परस्य आदेः सकारस्य षत्वं न

भवतीति। तदुपरि—तर्हि ऋक्षु वाक्षु इत्यादिष्वपि षत्वनिषेधः स्यात् ऋक्-शब्दस्य स्वादिष्विति पदत्वात् ततः परस्य आदेः प्रत्ययादेः सकारस्यापि षत्वनिषेधः प्राप्नोतीत्याशङ्क्य, स्वादिष्विति सूत्रेण येषां पदसंज्ञा ततः परस्य षत्वप्रतिषेधो न भवति। अतः वाक्षु इत्यादौ न दोषः। दधिसेचावित्यत्र तु अन्तर्वर्तिनीं विभक्तिमाश्रित्य 'सुप्तिङन्तं पदम्' (सू. १-४-१४) इति दधि-शब्दस्य पदसंज्ञा न 'स्वादिषु' इति। अतः ततः परस्य सकारस्य षत्वनिषेधो भवत्येव। उक्तविषये ज्ञापकं तु 'सात्पदाद्योः' इति सूत्रे सादग्रहणम्। तद्धि अग्निसादित्यादौ षत्वनिषेधाय। अग्नि इत्यस्य 'स्वादिषु' इति पदत्वात् ततः परस्य सकारस्य पदादादेरित्यनेनैव षत्वनिषेधे लब्धे सादग्रहणं व्यर्थं स्यात्। कृतं च तत् उक्तवचनं ज्ञापयति इति समाधानमुक्तं भाष्ये। तदेव पठति—**सात्प्रतिषेधो ज्ञापक** इति।

[ज्ञा.प.] स्थानिवदादेशो (सू. १-१-५६)॥'युष्मदस्मदोरनादेशे (सू. ७-२-८६) इत्यादेशे प्रतिषेधात् ज्ञापकात् स्थानि-वदादेशो भवतीति।

[वि.] स्थानिवत्सूत्रं प्रत्याख्यातुमाह—**युष्मदस्मदो**रिति। 'युष्मदस्म-दोरनादेशे' इति सूत्रेण हलादौ विभक्तौ परतो युष्मदस्मदोराकारं विधाय आदेशे परतः आत्वं प्रतिषिध्यते। तत्र विभक्त्यादेशस्य विभक्तित्वाभावादेव आदेशे परत आत्वाप्रसक्तेः किमनादेश इति प्रतिषेधेन। स क्रियमाणः आदेशः स्थानिवत् इति ज्ञापयति। ततश्च विभक्त्यादेशस्य स्थानिवद्भावेन विभक्तित्वमादाय तस्मिन् परत आत्वे प्राप्ते तन्निषेधाय अनादेश इत्युक्तमिति स्वांशे चारितार्थ्यम्। तथा च सूत्रं प्रत्याख्येयमिति भावः।

[ज्ञा.प.] 'अदो जग्धिर्ल्यप्तिकिति' (सू. २-४-३६) इति ल्यप्ग्रहणात् ज्ञापकात् अल्विधौ स्थानिवद्भावो न भवति।

[वि.] नन्वनल्विधाविति प्रतिषेधं वक्तुं स्थानिवदादेश इति वक्तव्यम्। न हि प्रतिषेध्यमप्रदर्श्य निषेधः कर्तुं शक्यते। अतः कथं स्थानिवदादेश इति प्रत्याख्यायत इत्यत आह—**अदो जग्धिरिति**। प्रजग्ध्येत्यादौ ल्यपि परतः अदधातोः जग्ध्यादेशो विधीयते। तत्र क्त्वास्थानिकस्य ल्यपः स्थानिवद्भावेन कित्त्वं तकारादित्वं चास्तीति 'ति किति' इत्यनेनैव ल्यपि परतोऽप्यादेशसिद्धेः किं ल्यब्ग्रहणेन। तत् क्रियमाणमल्विधौ स्थानिवद्भावो नेति ज्ञापयति। ततश्च 'ति' इति वर्णमाश्रित्य जग्ध्यादेशविधानात् तत्र स्थानिवद्भावाप्राप्तेः ल्यप्ग्रहणं कृतमिति तस्य चारितार्थ्यम्। तथा च 'स्थानिवदादेशः' इति भागस्य 'अनल्विधौ' इति भागस्य च ज्ञापकेनैव सिद्धत्वात् संपूर्णं स्थानिवत्सूत्रमनर्थकमिति भावः। कौस्तुभे तु स्थानिवत्सूत्रावश्यकता स्थापिता।

[ज्ञा. प.] अचः परस्मिन् (सू. १-१-५७)॥ ओहस्वादिति वक्तव्ये एङ्ह्रस्वादिति प्रत्याहारग्रहणं ज्ञापयति न संबुद्धिलोपे स्थानिवद्भावो भवतीति।

[वि.] 'अचः परस्मिन् पूर्वविधौ' इति सूत्रे पूर्वविधावित्यस्य हे गौः इत्यत्र प्रयोजनमुक्त्वा तत्खण्डितं भाष्ये। तथा हि - गोशब्दात् संबुद्धौ गो+सु इति स्थिते सोः 'गोतो णित्' (सू. ७-१-९०) इति णिद्भावेन 'अचो ञ्णिति' (सू. ७-२-११५) इति ओकारस्य वृद्धौ हे गौ+स् इति स्थिते परनिमित्तकस्य औकारस्य 'अचः परस्मिन्' इति स्थानिवद्भावात् ओकारत्वेन एङ्त्वात् ततः परस्याः संबुद्धेः 'एङ्ह्रस्वात्' (सू. ६-१-६९) इति लोपः प्राप्नोति। पूर्वविधावित्युक्तौ तु स्थानिभूतादचः परस्यैवात्र लोपो न तु पूर्वस्येति स्थानिवत्त्वाप्रवृत्तेः संबुद्धिलोपो न भवतीत्येवं पूर्वविधावित्यस्य प्रयोजनं वक्तव्यम्। तत्तु न भवति। तथा हि—एङ्ह्रस्वादिति सूत्रे एङ्ग्रहणं व्यर्थम्। न च तदभावे अग्ने वायो खट्वे माले इत्यादौ संबुद्धिलोपो न स्यादिति वाच्यम्। अग्ने वायो इत्यत्र गुणस्य स्थानिवद्भावेन ह्रस्वादित्येव संबुद्धिलोपसिद्धेः। खट्वे माले इत्यादौ च

आपः स्थाने 'संबुद्धौ च' (सू. ७-३-१०६) इति सूत्रेण प्रवृत्तस्य एकारस्य स्थानिवद्भावेन आप्त्वात् 'हल्ङ्याब्भ्यः' (सू. ६-१-६८) इत्यनेनैव संबुद्धिलोपस्य सिद्धेः। न च गोशब्दादनिष्टस्यापि संबुद्धिलोपस्य साधनाय एङ्-ग्रहणमिति वाच्यम्। तर्हि ओहस्वादित्येव ब्रूयात्। तथा अनुक्त्वा एङ्ह्रस्वादिति प्रत्याहारग्रहणं यत्करोति तज्ज्ञापयति संबुद्धिलोपविषये 'अचः परस्मिन्' इति स्थानिवद्भावो न भवतीति। ततश्च स्थानिवत्त्वाभावे अग्ने वायो इत्यादौ लोपो न भवेदिति एङ्ग्रहणं सार्थकम्। हे गौः इत्यत्रापि स्थानिवत्त्वाभावात् एङः परत्वाभावादेव लोपाप्रवृत्तेः तत्र लोपवारणं पूर्वविधावित्यस्य न प्रयोजनमिति भाष्याशयः, तदाह—**ओहस्वादिति**।

[ज्ञा. प.] प्रत्ययलोपे (सू. १-१-६२)॥ 'न लुमताङ्गस्य' (सू. १-१-६३) इति प्रतिषेधात् ज्ञापकात् भवति लुकि प्रत्ययलक्षणम्।

[वि.] ननु 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रेण प्रत्ययस्य लोपे सति प्रत्ययनिमित्तकं कार्यं भवतीत्युच्यमानं प्रत्ययस्य लुकि न प्राप्नोति। लोपे हि प्रत्यलक्षणमुच्यते न लुकि। ततश्च पञ्च सप्तेत्यादौ 'षड्भ्यो लुक्' (सू. ७-१-२२) इति जश्शसोर्लुकि प्रत्ययलक्षणाभावात्पदसंज्ञा न स्यादित्याशङ्क्याह—**न लुमतेति**। यदि लुकि प्रत्ययलक्षणं न स्यात् तदा प्राप्त्यभावात्तत्र 'न लुमताङ्गस्य' इति प्रत्ययलक्षणनिषेधो न संगच्छते। कृतश्च सः न केवलं लोपशब्देन यत्र प्रत्ययादर्शनं तत्रैव प्रत्ययलक्षणम्, अपि तु लुमच्छब्दैर्यत्र तत् तत्रापि प्रत्ययलक्षण-मस्तीति ज्ञापयति, अतो न दोष इति भावः। ज्ञापकसंग्रहे लुगादीनामपि लोपत्वमित्यनेनैतत्संगृहीतम्। वचनानुपूर्वीभेदो न विषयभेदः।

[ज्ञा. प.] न ङिसंबुद्ध्योः (सू. ८-२-८) इति प्रतिषेधात् ज्ञापकात् न प्रत्ययलक्षणेन भसंज्ञा भवति।

[वि.] ननु राज्ञः पुरुषो राजपुरुष इत्यत्र 'सुपो धातुप्रातिपदिकयोः' (सू. २-४-७१) इति ङसो लुक्यपि प्रत्ययलक्षणेन 'यचि भम्' (सू. १-४-१८)

इति भसंज्ञया पदसंज्ञाया बाधात् 'नलोपः प्रातिपदिकान्तस्य' (सू. ८-२-७) इति नलोपो न प्राप्नोति इत्याशङ्क्याह—**इति प्रतिषेधादिति**। यदि हि प्रत्ययलक्षणेन भसंज्ञा स्यात् तदा 'न डिसंबुद्धयोः' इति ङौ नलोपस्य प्रतिषेधोऽनर्थकः स्यात्। 'परमे व्योमन्' इत्यादौ 'सुपां सुलुक्' (सू. ७-१-३९) इति ङेर्लुक्यपि तस्य प्रत्ययलक्षणेन 'यचि भम्' इति भसंज्ञया पदसंज्ञाया बाधात् 'नलोपः प्रातिपदिकान्तस्य' इति नलोपाप्रसक्तेः किं तत्प्रतिषेधेन। क्रियमाणश्च स प्रतिषेधः प्रत्ययलक्षणेन भसंज्ञा न भवतीति ज्ञापयति तेन राजपुरुष इत्यादौ भसंज्ञाविरहः सिध्यतीति भावः।

[ज्ञा. प.] अलोऽन्त्यात्पूर्व उपधा (सू. १-१-६५)॥ यदयं 'नाम्रेडितस्यान्त्यस्य तु वा' (सू. ६-१-९९) इत्याह तज्ज्ञापयति नान्त्यस्य पररूपं भवतीति।

[वि.] 'अलोऽन्त्यात्पूर्वः' इति सूत्रे 'नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे' इति परिभाषां पठित्वा तस्याः प्रयोजनपरिगणनावसरे 'प्रयोजनमव्यक्तानुकरणस्यात इतौ' इत्यपि प्रयोजनमुक्तम्। अव्यक्तानुकरणस्य योऽच्छब्दस्तस्येतौ परत उच्यमानं पररूपम् 'अलोऽन्त्य'परिभाषया अन्त्यस्य तकारस्य प्राप्नोति। ततश्च पटत्+इति पटेति इति स्यात्। पटति इति चेष्यते। अतः 'नानर्थकेऽलोन्त्यविधिः' इति परिभाषा आश्रयणीया। पटत् इत्यस्य योऽयमच्छब्दस्तस्यानर्थकत्वात्तत्रालोऽन्त्यविधेरप्रवृत्त्या अत् इत्यस्यैव पररूपमितीष्टसिद्धिरिति तदाशयः। वस्तुत इदं प्रयोजनं न योयुज्यते, ज्ञापकादेवान्त्यस्य पररूपं न भवतीत्यवगमादित्याह—**यदयमिति**। यद्यलोऽन्त्यपरिभाषया अच्छब्दे अन्त्यस्य तकारस्य पररूपमभिमतमभविष्यत् तदा 'वाम्रेडितस्य' इत्येव सूत्रमकरिष्यत्। अन्त्यस्य पूर्वसूत्रेण (सू ६-१-९८) नित्ये पररूपे प्राप्ते विकल्पमात्रस्य विधेयत्वात्। तथा सूत्रमकृत्वा यतः 'नाम्रेडितस्यान्त्यस्य तु वा' इत्याह तज्ज्ञापयति नान्त्यस्य पररूपं भवति इति। ततश्च आम्रेडितस्य अत् इत्यस्य

पररूपे प्राप्ते तन्निषिध्य अन्त्यस्य विकल्पविधानमिति स्वांशे चारितार्थ्यम्। एवं चानेनैव षटत् इति इत्यत्रापि अन्त्यस्य पररूपाभावे सिद्धे 'नानर्थकेऽलोन्त्यविधिः' इति परिभाषायाः नेदं प्रयोजनमित्याशयः।

[ज्ञा. प.] स्वं रूपं शब्दस्य (सू. १-१-६८)॥ रूपग्रहणं ज्ञापयति अस्त्यन्यद्रूपात्स्वं शब्दस्येति। 'ष्णान्ता षट्' (१-१-२४) इति षकारान्तायाः संख्यायाः षट्संज्ञा-ज्ञापकात् शब्दसंज्ञायां न स्वरूपविधिर्भवतीति।

[वि.] ननु 'स्वं रूपं शब्दस्य' इति सूत्रे स्वशब्दस्यात्मीयवाचित्वेन संबन्धग्रहणनिरपेक्षतया प्रथमतः श्रोत्रेणोपस्थित्या च स्वशब्देन आत्मीयं रूपमेव ग्रहीष्यत इति किं रूपग्रहणेनेत्यत अह—**रूपग्रहणमिति**। तथा च रूपग्रहणात् रूपादन्यत् अर्थविशिष्टं स्वरूपं शब्दस्य स्वीयमस्तीति गम्यते। तथा च शब्द-स्यार्थविशिष्टं स्वरूपं संज्ञीति बोधनार्थं रूपग्रहणम्। एतेनात्र शास्त्रे अर्थविशिष्टं शब्दस्वरूपमेव गृह्यते नानर्थकमिति लभ्यते। ततश्च सूत्रादेवार्थवद्ग्रहणलाभात् अर्थवद्ग्रहणपरिभाषा न कर्तव्येति सिद्धम्। एवं च प्रथमोपस्थितत्वादियुक्तिः रूपग्रहणेन बाध्यत इति बोध्यम्।

ननु अशब्दसंज्ञा इति मास्तु। न च तदभावे शब्दशास्त्रे या संज्ञा टि घु इत्यादिस्तत्रापि स्वरूपग्रहणं भवेदिति वाच्यम्। 'ष्णान्ता षट्' इति सूत्रे षट् इत्यनेन षष् इति शब्दस्वरूपस्य ग्रहणात् तस्य षट्संज्ञायाः वचन-प्रामाण्याच्च नकारान्तस्य षट्संज्ञायाः सिद्धेः षकारग्रहणं व्यर्थं सत् शब्दसंज्ञायां स्वरूपविधिर्न भवतीति ज्ञापयतीति टि घु इत्यादौ स्वरूपग्रहणाभावसिद्धेरित्याह—**ष्णान्ता षडिति**। तथा च अशब्दसंज्ञेत्यनावश्यकमेवेति भावः।

[ज्ञा.प.] न क्त्वा सेट् (सू. १-२-१८)॥ 'इको झल्' (सू. १-२-९) इति झल्ग्रहणं ज्ञापयति औपदेशिकस्य कित्त्वस्य प्रतिषेधो नातिदेशिकस्येति।

[वि.] ननु 'न क्त्वा सेट्' इति सूत्रे क्त्वाग्रहणं मास्तु। न च तदभावे निष्ठायामपि गुधितः गुधितवानित्यत्र कित्त्वनिषेधः स्यात्। ततश्च उपधागुणः स्यादिति वाच्यम्। 'निष्ठा शीङ्स्विदिमिदिघ्विदिधृषः' (सू. १-२-१९) इति सूत्रं हि 'न सेट्' (सू. १-२-१८) इत्यनेनैव निषेधे सिद्धे नियमार्थं संपद्यते। शीङादिभ्य एव परा निष्ठा न किदिति नियमः। तथा च गुधित इत्यादौ निष्ठायाः कित्त्वनिषेधाभावान्न दोष इति। न चैवमपि पपिव पपिम इत्यादौ पपा इव, पपा इम इत्यवस्थायां क्ङित्याकारलोपो न स्यात् सेटः कित्त्वनिषेधादिति वाच्यम्। इटं निमित्तीकृत्य लोपसिद्धेः। न चैवमपि जग्मिव जग्मिव इत्यादौ 'गमहनजनखनघसां लोपः क्ङित्यनङि' (सू. ६-४-९८) इत्युपधालोपो न स्यादिति वाच्यम्। ज्ञापकादेव सेटो लिटः कित्त्वनिषेधाभावात्। ज्ञापकमेवाह—**झल्ग्रहण**मिति। 'इको झल्' इति सूत्रेण इगन्तात्परस्य झलादेः सनः कित्त्वं विधीयते। बुभूषतीत्यादिकमुदाहरणम्। तत्र झल्ग्रहणेन शिशयिषते इत्यादौ सेटः अत एवाजादेः सनः कित्त्वं व्यावर्त्यत इति वक्तव्यम्। परं तु 'न क्त्वा सेट्' इत्यत्र क्त्वाग्रहणाभावे सेटः यस्य कस्यापि कित्त्वनिषेधात् शिशयिषते इत्यत्र सेटः सनोऽपि कित्त्वनिषेधलाभात् तत्फलकम् 'इको झल्' इति सूत्रे झल्ग्रहणमनर्थकम्। तत्क्रियमाणं 'न सेट्' इति सूत्रे औपदेशिकस्य कित्त्वस्य प्रतिषेधो नातिदेशिकस्येति ज्ञापयति। सेटः सनः औपदेशिकं कित्त्वं नास्ति, अपि तु 'इको झल्' इत्यनेन आतिदेशिकम्। तस्य च 'न सेट्' इत्यनेन प्रतिषेधो न भवेदिति झल्ग्रहणं कृतमिति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु जग्मिवेत्यादौ 'असंयोगाल्लिट् कित्' (सू. १-२-५) इत्यातिदेशिकस्य कित्त्वस्य 'न सेट्' इति प्रतिषेधो न भवतीति क्ङितीत्युपधालोपः सिध्यतीति भावः।

[ज्ञा.प.] ऊकालोऽच् (सू. १-२-२७) ॥ 'विभाषा पृष्टप्रतिवचने हेः' (सू. ८-२-९३) इति मात्रिकस्य प्लुतवचनं ज्ञापकं न मात्रिकोऽन्ते भवतीति। 'अतो दीर्घो यञि, सुपि

च' (सू. ७-३-१०१–१०२) इति दीर्घविधानं ज्ञापकं न मात्रिको मध्ये भवतीति। 'ओमभ्यादाने' (सू. ८-२-८७) इति द्विमात्रस्य प्लुतविधानं ज्ञापकं न द्विमात्रोऽन्ते भवतीति।

[वि.] ननु 'ऊकालः' इति सूत्रे ऊ इति एकमात्रद्विमात्रत्रिमात्राणां प्रश्लिष्टनिर्देशः। तत्र च यथासंख्यमन्वयेन एकमात्रस्य ह्रस्वसंज्ञा द्विमात्रस्य दीर्घसंज्ञा त्रिमात्रस्य प्लुतसंज्ञा चेष्यते। तत्र क्रमेण संनिविष्टानामेकमात्रद्विमात्रत्रिमात्राणामेव प्रश्लिष्टनिर्देशोऽयमिति कथमवगम्यते। मात्रिको मध्ये वा अन्ते वा भवतु, द्विमात्रः आदौ वा अन्ते वास्तु, त्रिमात्रः आदौ वा मध्ये वास्तु। ततश्च एकमात्रस्यैव ह्रस्वत्वमित्यादिव्यवस्था न लभ्येतेत्याशङ्क्याह—**इति मात्रिकस्य प्लुतवचन**मिति। यदि हि मात्रिकस्यान्ते निर्देशः स्यात् तदा योऽन्ते स प्लुतसंज्ञ इति एकमात्रस्य प्लुतसंज्ञेति वक्तव्यम्। ततश्च 'हि' इत्यत्र इकारस्यैकमात्रस्य प्लुतत्वात् 'विभाषा पृष्टप्रतिवचने हेः' इति तस्य प्लुतविधानमनर्थकम्। अतस्तद्विधानं न मात्रिकोऽन्ते भवतीति ज्ञापयति। एवं यदि मात्रिको मध्ये भवेत् यो मध्ये स दीर्घसंज्ञ इति एकमात्रस्य दीर्घत्वात् 'अतो दीर्घो यञि' इति तस्य दीर्घविधानमनर्थकम्। अतस्तत् न मात्रिको मध्ये भवतीति ज्ञापयति। एवं यदि द्विमात्रोऽन्ते भवेत् तर्हि तस्य प्लुतसंज्ञकत्वेन 'ओमभ्यादाने' इति द्विमात्रस्य द्विमात्रात्मकप्लुतविधानमनर्थकम्। अतस्तत् न द्विमात्रोऽन्ते भवतीति ज्ञापयति। एवं च मात्रिकस्यान्ते मध्ये वा असंभवेन आदौ निवेशे द्विमात्रस्यान्ते निवेशासंभवेन मध्ये निवेशे च सिद्धे अर्थात् त्रिमात्रोऽन्ते निविशत इति यथासंख्यमेकमात्रद्विमात्रत्रिमात्राणां ह्रस्वदीर्घप्लुतसंज्ञाः सिध्यन्तीति भावः।

[ज्ञ. पा.] भूवादयो (सू.१-३-१)॥ 'अचिश्नु' (सू.६-४-७७) इत्यत्र श्नुग्रहणं ज्ञापकं न प्रत्ययस्योवङादेशो

भवतीति। दिवः सावौत्वविधानं ज्ञापयति उत्पद्यन्ते दिव्शब्दात्स्वादय इति।

[वि.] ननु 'भूवादयो धातवः' इति सूत्रेण ये धातुपाठे पठिता भू इत्यादयस्तेषां धातुसंज्ञा विधीयते। तथा सति त्रस्नू इत्यत्र उवङापत्तिः। नु इत्यस्य धातुपाठे पठितत्वेन त्रस्नु औ इत्यत्र नु इत्यस्य धातुत्वेन 'अचि श्नुधातुभ्रुवां य्वोः' इत्युवङादेशस्य संभवात्। न च णुर्धातुषु पठितो न तु नुः। न चास्य तेन सारूप्यम्। तथा च कथमियमाशङ्केति वाच्यम्। प्रयोगे नुशब्दस्यैव धातुत्वेन तत्सारूप्यस्य त्रस्नु इत्यत्र नुशब्देऽपि सत्त्वादित्यत आह—**श्नुग्रहणमिति**। यदि प्रत्ययस्याप्युवङादेशः स्यात्तदा श्नुप्रत्यये नु इत्यस्यापि धातुत्वेनैवोवङः सिद्धेः श्नुग्रहणमनर्थकं स्यात्। कृतं च तत् प्रत्ययात्मको यो धातुसरूपः तस्योवङादेशो न भवतीति ज्ञापयति। तथा च न दोष इति भावः।

नन्वेवमपि अव्युत्पन्नो यो दिव्शब्दस्तस्य धातुपाठपठितदिव्सरूपत्वेन धातुसंज्ञायाम् 'अधातुः' इति प्रतिषेधात् प्रातिपदिकसंज्ञा न सिध्येत्। ततश्च प्रातिपदिकत्वप्रयुक्ता स्वाद्युत्पत्तिर्न स्यादित्याशङ्क्याह—**दिवः सावि**ति। 'दिव औत्' (सू. ७-१-८४) इति सूत्रेण दिवः सौ परे औत्वं विधीयमानं दिवः प्रातिपदिकत्वाभावेन सोरेव दुर्लभत्वेनासंगतं सत् धातुसंज्ञकादपि दिव्शब्दात् स्वाद्युत्पत्तिर्भवतीति ज्ञापयति। अतो न दोष इति भावः।

वस्तुतस्तु क्रियावाचिनामेव भूवादीनां धातुसंज्ञा इत्येतदनाश्रित्य ज्ञापकद्वयमिदमुपन्यस्तम्। त्रस्नु इत्यत्र नुशब्दस्य वा दिव् इत्यस्याव्युत्पन्नस्य शब्दस्य वा क्रियावाचित्वाभावेनैव धातुसारूप्येऽपि धातुसंज्ञाया अप्रवृत्तेरित्यवधेयम्।

[ज्ञ. प.] चुटू (सू. १-३ ७)॥ 'उन्दिर् निशामने' 'स्कन्दिर् गतिशोषणयोः' इत्यादीनां केषांचित् इरितां नुमनुषक्तानां पाठो ज्ञापयति नवंजातीयकानामिदिद्विधिर्भवतीति।

[वि.] 'चुट्' इति सूत्रे 'इर उपसंख्यानम्' इति वार्तिकम्। रुधिर् इत्यादौ इर इत्संज्ञा वक्तव्या। अन्यथा 'इरितो वा' (सू. ३-१-५७) इत्यनेन अङ् न स्यात्। न च रेफस्य 'हलन्त्यम्' (सू. १-३-३) इत्यनेन, इकारस्य 'उपदेशेऽजनुनासिकः' (सू. १-३-२) इत्यनेन च इत्संज्ञकत्वात् न दोष इति वाच्यम्। तथा सति इदित्त्वप्रयुक्तविधेरपि प्रसङ्गात्। तथा च भेत्ता छेत्ता इत्यादौ 'इदितो नुम्' (सू. ७-१-५८) इति नुम् प्राप्नोति। अतोऽवयवेत्संज्ञया निर्वाहायोगात् इर् इति समुदायस्येत्संज्ञा वक्तव्येति वार्तिकाशयः।

भाष्यकारस्तु अवयवयोः प्रत्येकमित्संज्ञयैव सिद्धौ समुदायेत्संज्ञा न वक्तव्या। न चेदित्त्वप्रयुक्तनुम्प्रसङ्ग इति वाच्यम्। इरितां केषांचिद्धातूनां 'उ उन्दिर् निशामने' 'स्कन्दिर् गतिशोषणयोः' इत्येवं नुमनुषक्तानां पाठात इरितामिदित्कार्यं नेति ज्ञाप्यते। अतो भेत्तेत्यादौ नुमापत्तिविरहादिति न्यरूपयत्। तदाह—**उन्दिर् निशामन** इत्यादिना।

[ज्ञा. प.] णेरणौ (सू. १-३-६७) ॥ अनाध्यान इति प्रतिषेधो ज्ञापयति भवत्येवंजातीयकानाम् आत्मनेपदमिति।

[वि.] ननु 'णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने' इति सूत्रस्य ण्यन्तादात्मनेपदं भवति अणौ या क्रिया सैव चेण्ण्यन्तेनोच्येत अणौ यत्कर्मकारकं स चेण्णौ कर्ता स्यादनाध्याने इत्यर्थः। तत्र 'अनाध्याने' इति व्यर्थम्। कर्मस्थभावक्रियाणामेव कर्मवद्भावविषयत्वेन आध्यानार्थानां कर्तृस्थक्रियत्वेन कर्मवद्भावाविषयत्वादित्याशङ्क्य अत एव एवंजातीयकानाम् आत्मनेपदं ज्ञापयतीति तत्सार्थक्यमाह—**अनाध्यान** इति। अत्र च येषामण्यन्तानां यत्कर्म तेषां ण्यन्तानां यदा स कर्ता तदा कर्तृस्थभावक्रियत्वेऽप्यात्मनेपदं भवतीत्यर्थः। तेन पश्यन्ति भृत्या राजानम्, दर्शयते भृत्यान् राजा इत्यत्रात्मनेपदं सिद्धं भवतीति **कैयटः**। एतत्तत्त्वं स्पष्टतया ये ज्ञातुमिच्छन्ति तैरेतत्सूत्रव्याख्यानभूता **कौमुदी** तद्व्याख्या **बालमनोरमा** च द्रष्टव्या।

[ज्ञा. प.] अनुपराभ्यां कृञः (सू. १-३-७९) ॥ द्युतादिभ्यो वावचनात् ज्ञापकात् न परस्मैपदविषये आत्मनेपदं भवतीति ।

[वि.] ननु 'अनुपराभ्यां कृञः' इति सूत्रेण परस्मैपदविधानेऽपि परस्मैपदमेव भवतीति नियमाभावात् तद्विषये आत्मनेपदमपि स्यादित्यत आह— **द्युतादिभ्यो वावचनादिति ।** यदि परस्मैपदविषयेऽप्यात्मनेपदं स्यात् तदा 'द्युद्भ्यो लुङि' (सू. १-३-९१) इत्यत्र 'वा क्यषः' (सू. १-३-९०) इति सूत्रात् वा इत्यनुवर्त्य विकल्पेन परस्मैपदविधानमनर्थकं स्यात् । अन्तरेणापि वावचनानुवृत्तिं पदद्वयस्य सिद्धेः । ततश्च वावचनानुवृत्तिर्लिङ्गं परस्मैपदविषये आत्मनेपदाभावस्य । अतो न दोष इति भावः ।

[ज्ञा. प.] आ कडारादेका संज्ञा (सू. १-४-१) ॥ 'हृक्रोरन्यतरस्याम्' इत्यन्यतरस्यांग्रहणं ज्ञापकं न कर्मसंज्ञायां कर्तृसंज्ञा भवतीति ।

[वि.] ननु गतिबुद्धिसूत्रेण (सू. १-४-५२) 'गमयति देवदत्तं ग्रामं यज्ञदत्त' इत्यादावण्यन्तावस्थायां कर्तुर्देवदत्तस्य ण्यन्तावस्थायां कर्मसंज्ञा भवतीत्युच्यते । णिजर्थव्यापारजन्यफलाश्रयत्वात् कर्मत्वमिव णिच्प्रकृतिधात्वर्थव्यापाराश्रयत्वात् कर्तृत्वमपि देवदत्तस्य वर्तते । ततश्च देवदत्ते संज्ञाद्वयसमावेशात् संज्ञाद्वयप्रयुक्ते विभक्ती प्राप्नुत इत्याशङ्क्याह—**हृक्रो**रिति । यदि प्रयोज्यकर्तुः संज्ञाद्वयं भवेत् तदा हृक्रोरपि गत्यादिभिः सह पाठं कृत्वा अन्यतरस्यांग्रहणं न कुर्यात् । तेन प्रयोज्यकर्तुः कर्मसंज्ञायां कर्तृसंज्ञा न भवतीति ज्ञाप्यते । अतो न दोष इति भावः ।

[ज्ञा. प.] विप्रतिषेधे परम् (सू. १-४-२)॥ गौरादिषु श्वन्शब्दपाठो ज्ञापयति नोदात्तनिवृत्तिस्वरः शुन्यवतरतीति ।

[वि.] 'विप्रतिषेधे परं कार्यम्' इति सूत्रे 'अन्तरङ्गं च' इति वार्तिकम्। तस्य चान्तरङ्गं बलीय इत्यर्थः। तस्य च प्रयोजनम्—'यणेकादेशेत्वोत्वानि गुणवृद्धिर्द्विवचनाल्लोपस्वरेभ्यः' इत्यनन्तरेण वार्तिकेन प्रदर्शितम्। तत्राल्लोपादेकादेशोऽन्तरङ्गत्वाद्भवतीत्यत्र शुना इत्युदाहरणम्। श्वन् + आ इति स्थिते 'श्वयुवमघोनाम्' (सू. ६-४-१३३) इत्यनेन संप्रसारणे शु + अन् + आ इति स्थिते 'अल्लोपोऽनः' सू. ६-४-१३४) इत्यल्लोपः 'संप्रसारणाच्च' (सू. ६-१-१०८) इति पूर्वरूपं च प्राप्नोति। तत्रान्तरङ्गत्वात्पूर्वरूपमेव भवति।

नन्वत्राल्लोपे पूर्वरूपे वा न कश्चिद्विशेषोऽस्ति रूपे। तथा चान्तरङ्गबलीयस्त्ववर्णनं प्रकृतेऽनुपयुक्तमिति चेन्न। अल्लोपे हि सति अकारस्योदात्तत्वेन तस्मिन् लुप्ते अनुदात्ताया विभक्तेरुदात्तत्वम् 'अनुदात्तस्य च यत्रोदात्तलोपः' (सू. ६-१-१६१) इत्यनेन भवतीति शुनाशब्दोऽन्तोदात्तः संपद्यते। यदा तु पूर्वरूपं भवेत्तदा 'एकादेश उदात्तेनोदात्तः' (सू. ८-२-५) इति सूत्रेण उकारस्यैकादेशरूपस्योदात्तत्वे विभक्तिरनुदात्तैव तिष्ठतीति मध्योदात्तः शुना इति शब्दो भवतीति स्वरे भेदस्य सद्भावात्।

एवंरीत्या स्वरे भेदमङ्गीकृत्य प्रयोजनमुपवर्ण्य तत्प्रत्याख्यानार्थं भाष्यकारैः स्वरभेदो दूषितः। तथा हि—शुना इत्यत्र अल्लोपे सत्यपि उदात्तनिवृत्तिस्वरः श्वन्शब्दे न प्रवर्तत इति गौरादिगणे श्वन्शब्दपाठो ज्ञापयति। ङीषर्थं हि तत्र पाठः क्रियते शुनी इति रूपसिद्धये। श्वन्शब्दस्य नान्तत्वात् 'ऋन्नेभ्यो ङीप्' (सू. ४-१-५) इति ङीपैव तद्रूपसिद्धेः किं तत्र पाठेन। न च ङीपि सति तस्य पित्त्वेनानुदात्तत्वात् शुनीशब्दे ईकारोऽनुदात्तो भवेत्। ङीषि तु प्रत्ययस्वरेण तस्योदात्तत्वात् शुनी इत्यत्र ईकार उदात्त इति स्वरे भेदसद्भावात् अन्तोदात्तत्वाय गौरादिषु पाठः। तथा च स कथं ज्ञापकः स्यादिति वाच्यम्। ङीपि सत्यपि श्वन् + ई इत्यत्र संप्रसारणे शु अन् ई इति स्थिते

'अलोपोऽनः' इत्यकारस्योदात्तस्य लोपेऽनुदात्तस्य ईकारस्य 'अनुदात्तस्य च यत्रोदात्तलोपः' इति सूत्रेणोदात्तत्वेनान्तोदात्तत्वसिद्धेः। तथा च गौरादिषु श्वन्-शब्दपाठो व्यर्थः सन् उदात्तनिवृत्तिस्वरः श्वन्शब्दे न प्रवर्तत इति ज्ञापयति। एवं च शुना इत्यत्रापि विभक्त्युदात्तत्वस्याप्रवृत्तेः अलोपे पूर्वरूपे च स्वरे वा रूपे वा भेदाभावात् 'अन्तरङ्गं बलीयः' इत्यस्य अलोपादेकादेशः प्रयोजनं न भवतीति भाष्याशयः।

सर्वमिदं मनसिकृत्याह—**गौरादिषु श्वन्शब्दपाठ** इति। **उदात्तनिवृत्तिस्वरः** इति। 'अनुदात्तस्य च यत्रोदात्तलोपः' इति सूत्रेण विधीयमानः उदात्ते लुप्ते अनुदात्तस्योदात्तत्वात्मकः स्वर इत्यर्थः।

[ज्ञा. प.] साधकतमं करणम् (सू. १-४-४२) तमग्रहणं ज्ञापयति कारकसंज्ञायां तरतमयोगो न भवतीति।

[वि.] ननु सर्वेषामपि कारकाणां यत्किंचित्क्रियानिर्वर्तकत्वेन साधकत्वात् साधकमित्यनुक्तावपि करणसंज्ञाया असाधकेऽप्रवृत्तेः, साधकमित्युपादानं साधकतममित्यर्थं गमयिष्यतीति किं तमग्रहणेन। यथा 'अभिरूपाय कन्या देया' इत्युक्ते अनभिरूपाय दाने प्रवृत्त्यभावेन अभिरूपतमायेति तमग्रहणं विनैव लभ्यते तद्वदित्याशङ्क्याह—**तमग्रहण**मिति। तथा च तमग्रहणात् एतत्सूत्रादन्यत्र कारकप्रकरणे तरतमभावो नाश्रीयत इति ज्ञाप्यते। अन्यथा 'आधारोऽधिकरणम्' (सू. १-४-४५) इत्यत्रान्वर्थसंज्ञाबलादेवाधारलाभे पुनस्तद्ग्रहणसामर्थ्यात् प्रकृष्ट आधारः नाम सर्वावयवव्याप्त्या य आधारः सोऽधिकरणमित्यर्थः स्यात्। तथा सति तिलेषु तैलम्, दध्नि सर्पिः इत्यादावेव स्यात्, गङ्गायां घोष इत्यादौ न स्यादिति भावः।

इति प्रथमोऽध्यायः।

अथ द्वितीयोऽध्यायः

[ज्ञा. प.] 'युवा खलति' (सू. २-१-६६) इति समानाधिकरणेनेति वर्तमाने व्यधिकरणनिर्देशात् ज्ञापकात् यथाजातीयकमुत्तरपदं तथाजातीयकेन पूर्वपदेन समासो भवतीति ।

[वि.] 'युवा खलतिपलितवलिनजरतीभिः' इति सूत्रेण युवन्शब्दस्य खलत्यादिभिः सह समासो विधीयते। तत्र च समानाधिकरणेन इत्यनुवर्तते। पुंल्लिङ्गयुवन्शब्दस्य स्त्रीलिङ्गखलत्यादिभिः सामानाधिकरण्यासंभवात् सौत्रो निर्देशोऽसंगतः सन् ज्ञापयति युवन्शब्देनात्र यथाजातीयकमुत्तरपदं तथाजातीयकं गृह्यत इति। उत्तरपदस्य जरतीपदस्य स्त्रीलिङ्गत्वात् तेन समासे विवक्षिते स्त्रीलिङ्गयुवतिशब्द एव तेन समस्यत इत्यर्थः। यद्यपि मुखं चन्द्र इत्यादौ भिन्नलिङ्गयोरपि सामानाधिकरण्यं दृश्यते, तथापि न सर्वत्र, किं तु संप्रतिपन्नस्थल एव, तदप्येकस्य नियतलिङ्गत्व एवेति भाष्याशयः इत्युद्योतः। एतद्वचनज्ञापनप्रयोजनं तु 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषां विनैव कार्यसिद्धिरिति भाष्ये स्पष्टम्।

[ज्ञा.प.] उपपदमतिङ् (सू. २-२-१९) ॥ अतिङिति प्रतिषेधो ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपेति ।

[वि.] ननु 'उपपदमतिङ्' इति सूत्रे अतिङ्ग्रहणं मास्तु। न च तदभावे कारको व्रजतीत्यत्रापि व्रजतीत्यस्य 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (सू. ३-३-१०) इति सूत्रे क्रियायाम् इति सप्तम्यन्तेन ग्रहणेन उपपदसंज्ञकत्वात तस्य कारक इति शब्देन समासः स्यादिति वाच्यम्। 'सुप् सुपा' इत्यस्यात्राप्यनुवृत्त्या सुबन्तमुपपदं समर्थेन सुबन्तेन समस्यत इति सूत्रार्थलाभात् व्रजतीत्यस्य सुबन्तत्वाभावात् समासस्याप्रसक्तेरित्याशङ्क्याह—**अतिङिति प्रतिषेध** इति।

तथा च पूर्वोक्तरीत्या व्यर्थं सत् अतिङ्ग्रहणम् अत्र सूत्रे 'कुगतिप्रादयः' (सू. २-२-१८) इति पूर्वसूत्रे च सुप्सुपेति नानुवर्तत इति ज्ञापयति। तदननुवृत्तौ च तिङन्तस्यापि समासो भवेदिति तद्वारणार्थमतिङ्ग्रहणमिति स्वांशे चारितार्थ्यम्। नन्वत्रैव सूत्रे अतिङ्ग्रहणात् सुपो निवृत्तिर्ज्ञाप्यताम्। पूर्वसूत्रे कथं निवृत्तिर्ज्ञाप्येत इति चेत्-अत्राहुः। 'कुगतिप्रादयः' इत्यत्र 'कुप्रादयः' 'गतिः' इति द्वेधा योगो विभज्यते। तत्र प्रथमसूत्रस्य कुप्रादयः सुबन्तेन समस्यन्ते इत्यर्थः। एवम् 'उपपदम्' 'अतिङ्' इति च योगो विभज्यते। अतिङ् इत्ययं 'गतिः' 'उपपदम्' इति द्वयोरपि शेषभूतः। सुपा इत्येतत् उभयत्र उक्तज्ञापकान्निवर्तते। अतिङ् इत्येष प्रथमान्तः योगद्वयविहितस्य समासस्य विशेषणम्। तथा च सूत्रद्वयविहितः समासः तिङन्तघटितो न भवतीत्यर्थः। ततश्च सूत्रद्वयेऽपि अतिङ् इत्यस्य संबन्धात् तत् सूत्रद्वयेऽपि सुपा इत्यस्य निवृत्तिज्ञापकमिति भावः। एवं च सूत्रद्वयेऽपि सुपेत्यस्य निवृत्त्या गतीनामुपपदानां च सुबुत्पत्तेः प्राक् समासः सिध्यतीति 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति परिभाषा सिद्धा भवतीति ज्ञापनफलं भाष्ये उक्तम्। न च कारकाणां सुबुत्पत्तेः प्राक् समासः कथं लभ्येत इति वाच्यम्। एकदेशानुमतिद्वारा तत्सिद्धेरिति केचित्। कैयटस्तु कारकाणां 'कर्तृकरणे कृता बहुलम्' (सू. २-३-३२) इति समासः क्रियते। तत्र कृदग्रहणात् सुबुत्पत्तेः प्राक् समासः सिद्धः। तिङन्तेन हि तृतीयान्तस्य सुपेत्यस्यानुवृत्त्यैव समासाप्रसङ्गात् कृदन्तेनैव समासे सिद्धे कृदग्रहणं कृदन्तावस्थायामेवानुत्पन्ने सुपि समासार्थम् इत्याह।

[ज्ञा. प.] अनेकमन्यपदार्थे (सू. २-२-२४)॥ उत्तरपदे द्विगुविधानं ज्ञापयति बहूनामपि समासो भवतीति।

[वि.] ननु 'अनेकमन्यपदार्थे' इति सूत्रे 'सुप् सुपा' इत्यनुवृत्तेः अन्यपदार्थे वर्तमानं सुबन्तं सुबन्तेन समस्यत इत्यर्थलाभेन अर्थात् अनेक-

सुबन्तसमासो लभ्यत इत्यनेकग्रहणं व्यर्थम्। न च बहूनां समासलाभायानेकग्रहणमिति वाच्यम्। ज्ञापकादेव बहूनां समासलाभात्। ज्ञापकमेवाह—**उत्तरपद** इति। 'तद्धितार्थोत्तरपदसमाहारे च' (सू. २-१-५१) इति सूत्रेण उत्तरपदे परतः संख्यावाचकशब्दस्य समानाधिकरणेन सुबन्तेन समासो विधीयते। पञ्च गावो धनं यस्येति विग्रहे त्रयाणां पदानां बहुव्रीहिसमासे धनशब्दे परे तदवयवयोः पञ्चगोशब्दयोर्द्विगुसमासो भवति। तत्रादौ त्रयाणां सभासाभावे धनशब्दस्योत्तरपदत्वं न स्यात्। उत्तरपदशब्दस्य समासचरमावयवे रूढत्वात्। तथा च उत्तरपदे परतो द्विगुसमासविधानमहिम्ना बहूनामपि सुबन्तानां समासो भवतीति ज्ञाप्यते। एवं च बहूनां समासलाभार्थमनेकपदमित्येतन्न युक्तमिति भावः। **द्विगुविधान**मिति। इदमुपलक्षणम्। तद्धितार्थसूत्रेण दिग्वाचकशब्दस्य सुबन्तेन सह उत्तरपदे परतः समासविधानमप्युक्तार्थे ज्ञापकमिति बोध्यम्।

[ज्ञा. प.] चार्थे द्वन्द्वः (सू. २-२-२९)॥ अर्थग्रहणात् चेन कृतोऽर्थश्चार्थ इति विज्ञायते।

[वि.] ननु 'चार्थे द्वन्द्वः' इति सूत्रेण चार्थो यत्र प्रतीयते तत्र द्वन्द्वः इत्यवगम्यते। तथा च—

'अहरहर्नयमानो गामश्वं पुरुषं पशुम्।
वैवस्वतो न तृप्यति सुराया इव दुर्मदी॥'

इत्यत्र गवादीनां परस्परसाहित्येन नयनक्रियायामन्वयात् 'गामश्वं पुरुषं पशुम्' इति वाक्येऽपि परस्परसाहित्यात्मकेतरेतरयोगरूपचार्थे पदानां वृत्तेर्द्वन्द्वसंज्ञा स्यात् इत्याशङ्क्याह—**अर्थग्रहणादिति**। चे द्वन्द्व इत्येतावतैव चशब्दे कार्यासंभवात् अर्थे कार्यं भवतीति विज्ञास्यते। सोऽयमेवं सिद्धे सति यत् अर्थग्रहणं करोति तज्ज्ञापयति चेन कृतो योऽर्थस्तत्र द्वन्द्वो भवतीति। अर्थग्रहणादवधारणमाश्रीयते। चेनैव कृतः प्रकाशितो योऽर्थस्तत्र द्वन्द्व इति। गामश्वमित्यत्र तु अहरहःशब्देनैव साहित्यमवगम्यते न तु चेनेति न द्वन्द्व इति भावः।

[ज्ञा. प.] निष्ठा (सू. २-२-३६) ॥ जातिकालसुखादिभ्यः परस्याः निष्ठाया अन्तोदात्तत्वविधानात् ज्ञापकात् परात्र निष्ठा भवतीति ।

[वि.] ननु 'निष्ठा' इति सूत्रेण निष्ठान्तस्य बहुव्रीहौ पूर्वनिपातोऽनुशिष्यते । कृतकृत्य इत्यादिकमुदाहरणम् । तत्र सारङ्गजग्धी मासजाता सुखजाता दुःखजाता इत्यादौ बहुव्रीहौ निष्ठान्तस्य परनिपातोऽसाधुः स्यात् इत्यत आह—**जातिकालेति ।** 'जातिकालसुखादिभ्योऽनाच्छादनात् क्तः' (सू. ६-२-१७०) इति सूत्रेण जातिकालसुखादिभ्यः परस्य क्तान्तस्यान्तोदात्तत्वं विधीयते बहुव्रीहौ । यदि जात्यादिभ्यः पूर्वं 'निष्ठा' इत्यनेन क्तान्तस्य निपातः स्यात् तदा जात्यादिभ्यः परं क्तान्तं दुर्लभमिति परं क्तान्तमनूद्य स्वरविधानमनुपपन्नं स्यात् । अतोऽनुमीयते यत् बहुव्रीहौ जातिकालसुखादिभ्यः परमेव निष्ठान्तस्य प्रयोग इति । तेन सारङ्गजग्धी इत्यादेः साधुत्वं सिध्यतीति भावः ।

[ज्ञा. पा.] चतुर्थी संप्रदाने (सू. २-३-१३)॥ 'चतुर्थी तदर्थार्थ-' (सू. २-१-३६) इति चतुर्थ्यन्तस्य अर्थशब्देन समासविधानं ज्ञापयति भवत्यर्थशब्दयोगे चतुर्थीति। तत्रैव चतुर्थ्यन्तस्य तदर्थेन समासविधानात् ज्ञापकात् भवति तादर्थ्ये चतुर्थीति ।

[वि.] 'चतुर्थी संप्रदाने' इति सूत्रे 'तादर्थ्य उपसंख्यानम्' इति वार्तिकम् । तत्र तादर्थ्यशब्दस्य तस्मै अर्थस्तदर्थः तदर्थस्य भावः तादर्थ्यमिति निष्पत्तिर्भवति । तत्र तस्मै इति चतुर्थ्यन्तस्यार्थशब्देन समासो न संभवति, अर्थशब्देन योगे चतुर्थ्या दुर्लभत्वत्, तादृशानुशासनाभावादित्याशङ्क्य 'चतुर्थी तदर्थार्थ' इति सूत्रेण चतुर्थ्यन्तस्यार्थशब्देन साकं समासविधानम् अर्थशब्दयोगे चतुर्थ्या असाधुत्वे असंगतं सत् तद्योगे चतुर्थीविभक्तिं ज्ञापयतीत्याह —**चतुर्थी तदर्थार्थेति ।** तत्रैव भाष्ये 'तादर्थ्य उपसंख्यानम्' इति वार्तिक-

प्रत्याख्यानाय ज्ञापकात्तादर्थ्ये चतुर्थी साधिता। ज्ञापकं च 'चतुर्थी तदर्थार्थ' इति सूत्रेण चतुर्थ्यन्तस्य तदर्थवाचिना सुबन्तेन समासविधानम्। यदि तादर्थ्ये चतुर्थी न स्यात् तदा तदर्थेन सहितस्य चतुर्थ्यन्तस्य दौर्लभ्यात् चतुर्थ्यास्तदर्थेन समासविधानमसंगतं स्यादिति। तदेतदाह—**तत्रैव चतुर्थ्यन्तस्येति।**

[ज्ञा.प.] प्रातिपदिकार्थलिङ्ग - (सू. २-३-४६)॥ 'संबोधने आमन्त्रितम्' इत्येकयोगमकृत्वा 'संबोधने च' 'सामन्त्रितम्' (सू. २-३-४७-४८) इति योगविभागकरणं ज्ञापयति न कर्मादिविशिष्टे प्रथमा भवतीति।

[वि.] ननु विभक्तिविषये प्रत्ययनियमोऽर्थनियमश्चेति पक्षद्वयम्। तत्र कर्मण्येव द्वितीयेत्येवमादिरूपः प्रत्ययनियमः। कर्मणि द्वितीयैवेत्येवमादिरूपोऽर्थनियमः। तत्र प्रत्ययनियमपक्षे 'प्रातिपदिकार्थ' सूत्रे (सू. २-३-४६) मात्रपदाभावे कर्मादिष्वपि प्रथमा स्यात्। कर्मण्येव द्वितीयेति नियमेन हि द्वितीयायाः कर्मातिरिक्तार्थव्यावर्तनेऽपि कर्मणि द्वितीयातिरिक्ता विभक्तिर्न व्यावर्त्यते। तथा च कर्मादिष्वपि प्रथमायाः व्यवच्छेदार्थं मात्रपदमिति प्रयोजनमुक्त्वा ज्ञापकेन कर्मादिषु प्रथमां निषिध्य मात्रपदस्योक्तविधं प्रयोजनं निराकृतं भाष्ये। तदाह—**संबोधन** इत्यादिना।

अयमाशयः—यदि प्रातिपदिकार्थादधिकार्थेऽपि प्रथमा स्यात्तदा संबोधनाधिक्येऽपि प्रातिपदिकार्थसूत्रेणैव प्रथमायाः सिद्धेः 'संबोधने च' इति सूत्रं व्यर्थम्। न च तत्सूत्रं न संबोधने प्रथमाविधायकम्, किं तु आमन्त्रितसंज्ञाया विधानार्थमनुवादकम्। संबोधने या प्रथमा सामन्त्रितसंज्ञा स्यादित्युत्तरसूत्रेण सहैकवाक्यतया वाक्यार्थ इति वाच्यम्। तथा सति 'संबोधने आमन्त्रितम्' इत्येकसूत्रमेव ब्रूयात्। योगविभागकरणात्तु प्रथमसूत्रेण संबोधनार्थे प्रथमाया विधानम्, द्वितीयेन तस्या आमन्त्रितसंज्ञाविधानमित्याश्रयणीयम्। तत्रोक्तरीत्या सिद्धौ सूत्रं व्यर्थं सत् न कर्माधिक्ये प्रथमा भवतीति

ज्ञापयतीति वक्तव्यम्। तथा च मात्रपदस्य कर्मादिषु प्रथमार्थत्वव्यवच्छेदः न प्रयोजनमिति। अर्थनियमपक्षे तु सुतरामुक्तप्रयोजनं न संगच्छत इत्यन्यदेतत्।

[ज्ञा. प.] बह्वच इञः प्राच्यभरतेषु (सू. २-४-६६)॥ अत्र भरतग्रहणं ज्ञापयति अन्यत्र प्राग्ग्रहणे भरतग्रहणं न भवतीति।

[वि.] ननु 'बह्वच इञः' इति सूत्रे 'प्राच्यभरतेषु' इति शब्दे किं द्वन्द्वसमासः उत कर्मधारयः। यदा द्वन्द्वस्तदा प्राच्यगोत्रे भरतगोत्रे च वर्तमानो यो बह्वचः पर इञ् तस्य लुक् स्यादिति सूत्रार्थः। यदा तु कर्मधारयस्तदा प्राच्यं यद्भरतगोत्रं तद्वाचकस्य इञः लुक् इति सूत्रार्थः। तत्र प्रथमपक्षे भरतग्रहणमनर्थकम्। तेषामपि प्राच्यत्वेनैव संग्रहात्। न ह्यन्यत्र भरताः सन्ति। द्वितीयपक्षे प्राच्यग्रहणमनर्थकम्। अप्राच्यानां भरतानामभावात् इत्याशङ्क्य, द्वन्द्वपक्षं स्वीकृत्य तत्र भरतग्रहणस्य अन्यत्र सूत्रे प्राग्ग्रहणेन भरतानां ग्रहणं न भवतीत्यर्थज्ञापकत्वमुक्तं भाष्यकृता। तदाह—**अत्र भरतग्रहण**मिति। ज्ञापनस्य प्रयोजनं तु 'इञः प्राचाम्' (सू. २-४-६०) इत्यत्र भरतग्रहणं न भवति। तेन औद्दालकायन इत्यत्र फको लुक् न भवति। उद्दालको नाम भरतकुलोत्पन्नः, तस्य गोत्रापत्यं औद्दालकिः अत इञ्। तस्य पुत्रः औद्दालकायनः। 'यञिञोश्च' (सू. ४ १-१०१) इति फक्। तस्य च गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुक् स्यात् तच्चेत् गोत्रं प्राचां भवति इत्यर्थकेन 'इञः प्राचाम्' इति सूत्रेण लुक् प्राप्तः प्राग्ग्रहणेन भरतग्रहणं नेति ज्ञापनान्न भवतीति।

इति द्वितीयोऽध्यायः

अथ तृतीयोऽध्यायः

[ज्ञा. प.] प्रत्ययः (सू. ३-१-१) ॥ 'एतिस्तुशास्वृदृजुषः क्यप्' इति परिगणनं ज्ञापयति न धातुमात्रात् क्यबिति ।

[वि.] 'प्रत्ययः' इति सूत्रे भाष्ये 'हनस्त च' इति सूत्रे हनः इति षष्ठ्याः तकाररूपविकारेणान्वितत्वात् चकारेण पूर्वसूत्रात् अनुकृष्यमाणस्य क्यपः प्रतिसंबन्ध्यनिर्देशात् क्यब्विधानानुपपत्तिः इत्याशङ्क्य, तत्र धातोः इति पञ्चम्यन्तं पदमनुवर्तते, अतः हनस्तकारो भवति, धातोः क्यप् भवतीति वाक्यार्थ इति समाधाय, तर्हि धातुसामान्यात् क्यप् प्राप्नोतीति पुनराशङ्क्य ज्ञापकेन धातुसामान्यात् क्यबापत्तिर्निवारिता। तदाह—**एतिस्तु इति परिगणनमिति।** यदि धातुमात्रात् क्यप् भवेत् तर्हि एतिस्तु इत्यादिभ्योऽपि 'हनस्त च' (सू.३-१-१०८) इत्यनेनैव क्यप्सिद्धेः 'एतिस्तुशास्वृदृजुषः क्यप्' (सू. ३-१-१०९) इति परिगणनमनर्थकं स्यात्। कृतं च तत्परिगणनं न सर्वस्मादपि धातोः क्यप् भवतीति ज्ञापयतीत्यर्थः।

[ज्ञा. प.] परश्च (सू. ३-१-२) ॥ काद्यनुबन्धासञ्जनं ज्ञापयति अत्यन्तापरदृष्टाः परभूता लुप्यन्त इति ।

[वि.] 'परश्च' इति सूत्रस्य 'अत्यन्तापरदृष्टानां वा परभूतलोपार्थ' मिति वार्तिककारः प्रयोजनमुक्तवान्। परेण-प्रधानेन प्रमाणेन प्रत्यक्षेण न क्वचिद्दृष्टा ये किबादयस्तेषां परभूतानां लोपो भवतु इत्येतदर्थं परश्चेति सूत्रम्। तथा सति हि किति इत्यादिना विहितं कार्यं किपि परे स्यान्नान्यथा इति तदर्थः। तदेतद्वार्तिकं भाष्यकारः ज्ञापकेन किबादीनां परभूतानां लोपं प्रसाध्य प्रत्याख्यातवान्। तदाह—**काद्यनुबन्धासञ्जनमिति।** यदि पूर्वभूता लुप्येरंस्तदा किबादौ ककाराद्यनुबन्धासञ्जनमनर्थकं स्यात्। सर्वस्यानुबन्धकार्यस्य परभूतप्रत्ययनिमित्तकत्वात्। तथा च तत् सर्वलोपिनः प्रत्ययाः परभूता एव लुप्यन्त इति ज्ञापयतीत्यर्थः।

[ज्ञा. प.] इजादेश्च (सू. ३-१-३६)॥ 'ऋच्छत्यृताम्' (सू. ७-४-११) इति ऋच्छेर्लिटि गुणवचनं ज्ञापकं नच्छेर्लिटचाम् भवतीति।

[वि.] ननु 'इजादेश्च गुरुमतोऽनृच्छः' इति सूत्रे अनृच्छः इति मास्तु। न च तदभावे ऋच्छधातोरप्याम् स्यादिति वाच्यम्। ज्ञापकेनैव ऋच्छेराम् न भवतीत्यवगमात्। ज्ञापकमेवाह—**ऋच्छेर्लिटीति**। 'ऋच्छत्यृताम्' इति सूत्रेण हि ऋच्छेर्लिटि गुणो विधीयते। यदि च ऋच्छेर्लिटचाम् स्यात् तदा आमा व्यवधानेन लिट्परकत्वाभावात् गुणो न प्रवर्त्स्यतीति गुणविधानमनर्थकं स्यात्। अतो गुणविधानेन ऋच्छेरामभावो ज्ञाप्यते। तथा च तेनैव आम्निषेधे सिद्धे 'अनृच्छः' इति प्रतिषेधो व्यर्थ इति भावः।

[ज्ञ. प.] सार्वधातुके यक् (सू. ३-१-६७)॥ 'न दुहस्नुनमां यक्चिणौ' (सू. ३-१-८९) इति प्रतिषेधात् ज्ञापकात् भवति कर्मकर्तरि यक्।

[वि. ननु भाववाचिनि कर्मवाचिनि च सार्वधातुके परतो विधीयमानो यक् कर्मकर्तरि लकारे परे न प्राप्नोति। कर्तरि शपोऽपवादत्वात् प्राप्तेरित्यत आह—**न दुहेति**। 'न दुहस्नुनमां यक्चिणौ' इति सूत्रेण दुहस्नुनमां कर्मकर्तृलकारे परे यक्चिणौ प्रतिषिध्येते। स चायं प्रतिषेधः धातोः कर्मकर्तरि यगभावे प्राप्त्यभावादसंगतः सन् कर्मकर्तरि यग्भवतीत्यत्र ज्ञापक इति भावः।

[ज्ञा. प.] कृदतिङ् (सू. ३-१-९३)॥ क्वचित्तद्धितविधौ 'तिङश्च' (सू. ५-३-५६) इति तिङ्ग्रहणं ज्ञापकं न तिङन्तादणादयो भवन्तीति।

[वि.] ननु कृदतिङ् इति सूत्रे अतिङ्ग्रहणं मास्तु। न च तदभावे तिङोऽपि कृत्संज्ञा स्यात्, ततश्च कृदन्तत्वात् पठतीत्यादेः प्रतिपादिकसंज्ञा स्यादिति वाच्यम्। प्रातिपदिकसंज्ञायामपि दोषाभावात्। एकत्वादीनाम्

तिङोक्तत्वात् सुबादीनाम्, तिङन्तस्य स्त्रीत्वेन योगाभावादेव टाबादीनां चापादयितुमशक्यत्वात्। न चाणादयस्तद्धितास्तिङन्तेभ्यो भवेयुरिति वाच्यम्। अपत्याद्यर्थे तद्धितविधानेन तिङन्तस्यापत्यादिभिर्योगाभावादेव ततस्तद्धितोत्पत्तेरापादयितुमशक्यत्वात्। यद्वा ज्ञापकादेव तिङन्तादणाद्युत्पत्तेर्वारयितुं शक्यत्वात्। ज्ञापकमेवाह—**क्वचित्तद्धितविधाविति**। यदि तिङन्तस्यापि प्रातिपदिकत्वात् ततस्तद्धितोत्पत्तिः स्यात् तदा तद्धितप्रकरणे 'तिङश्च' (सू. ५-३-५६) इति सूत्रमनर्थकं भवेत्। 'अतिशायने तमबिष्ठनौ' सू. ५-३-५५) इति सूत्रेणैव सिद्धेः। ततश्च तिङः कृत्संज्ञायां तिङन्तस्य प्रातिपदिकसंज्ञायां च दोषाभावात् 'कृदतिङ्' इति सूत्रे अतिङ्ग्रहणं प्रत्याख्येयमित्याशयः।

[ज्ञा.प.] कृत्याः (सू. ३-१-९५) ॥ अर्हे कृत्यतृचग्रहणं ज्ञापकं प्राङ् ण्वुलुः कृत्यसंज्ञा भवतीति।

वि.] ननु कृत्याः इति सूत्रे प्राङ्ण्वुल इति वक्तव्यम्। अन्यथा ण्वुलोऽपि कृत्यसंज्ञाप्रसङ्गादित्याशङ्क्याह—**अर्हे कृत्येति**। यदि हि 'ण्वुल्तृचौ' इति सूत्रात्प्रागेव कृत्यसंज्ञा इत्येतन्न स्यात्तदा तृचोऽपि कृत्यसंज्ञकत्वेन 'अर्हे कृत्याः' इत्येव सूत्रयितुं शक्यम्। तृज्ग्रहणं चानर्थकम्। यतः 'अर्हे कृत्यतृचश्च' (सू. ३-३-१६९) इति सूत्रे पृथक् तृच्ग्रहणं कृतं तेनानुमीयते ण्वुलः प्राक् कृत्यसंज्ञेति। न चोक्तज्ञापकेन तृचः प्राक् कृत्यसंज्ञेत्यर्थलाभेऽपि ण्वुलः प्रागिति न लभ्यत इति वाच्यम्। ज्ञापकस्य सूत्रापेक्षत्वेन तृच्घटितात् 'ण्वुल्तृचौ' इति सूत्रात् प्राक् कृत्यसंज्ञाधिकार इत्येवं ज्ञापनात्। तथा च ज्ञापकेन सिद्धेः 'प्राङ्ण्वुलः' इति न वक्तव्यमिति भावः। काशिकायां 'कृत्याः प्राङ्ण्वुलः' इति यः सूत्रपाठः सोऽनादरणीय इति सिद्धम्।

[ज्ञा. प.] स्पृहिगृहि—(सू.३-२-१५८)॥ लुशा सिद्धे आलुज्विधानं ज्ञापकम् अन्येभ्योऽप्ययं भवतीति।

[वि.] ननु 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' इति सूत्रे आलुच् इति गुरुः प्रत्ययो न विधीयताम्। लुश् इति प्रत्यय एव विधीयताम्। शपि कृते स्पृहय+लु इति स्थिते 'अतो दीर्घो यञि' (सू. ७-३-१०१) इति दीर्घेण स्पृहयालुः इत्यादिरूपसिद्धेरित्याशङ्क्याह—**लुशेति**। तथा च आलुचः विधानं सूत्रानिर्दिष्टेभ्योऽपि धातुभ्यः आलुच् भवतीति ज्ञापयति। तथा च शयालुः इत्यादिकं सिध्यति। तत्र हि शपः 'अदिप्रभृतिभ्यः' (सू. २-४-७२) इति लुकि अतो दीर्घस्यासंभवात् लुशा निर्वाहो न भवतीति भावः।

[ज्ञा. प.] अनद्यतने लुट् (सू. ३-३-१५)॥ अनद्यतने लटः सत्संज्ञावचनं ज्ञापयति भवत्यनद्यतने लडिति।

[वि.] 'लटः सद्वा' (सू. ३-३-१४) 'अनद्यतने लुट्' इति सूत्रक्रमः। तत्र 'अनद्यतने' 'लुट्' इति योगविभागः कर्तव्यः। 'अनद्यतने' इति सूत्रे 'लटः सत्' इत्यनुवर्तते। अनद्यतने लटः सत्संज्ञकौ शतृशानचौ आदेशौ भवत इति तदर्थः। 'तेन श्वोऽग्नीनाधास्यमानेन' 'श्वः सोमेन यक्ष्यमाणेन' इत्यादिकं सिध्यति। न चानद्यतने लड्विधायकानुशासनाभावेन कथमेतदिति वाच्यम्। योगविभागेन अनद्यतने लटः सत्संज्ञकादेशविधानेनैव अनद्यतने लडस्तीति ज्ञापनादिति भाष्ये प्रतिपादितम्। तदाह—**अनद्यतने लट इति**

[ज्ञा.प.] आशंसायां भूतवच्च (सू. ३-३-१३२)॥ 'संभावनेऽलमिति चेत्' (सू. ३-३-१५४) इति ज्ञापकात् संभावनेऽपि नालमर्थ्यं गम्यते।

[वि.] नन्वाशंसासंभावनयोरविशेषात् आशंसायां ये विधीयन्ते ते संभावनेऽपि प्राप्नुवन्ति। ये च संभावने विधीयन्ते ते आशंसायामपि प्राप्नुवन्ति। न च संभावनेऽलमर्थो नियमेन गम्यते, आशंसायां तु अलमर्थो न गम्यते। तथा च तयोरर्थाविशेषेऽप्यालमर्थ्यानालमर्थ्यकृतभेदोऽस्ति। तमादाय व्यवस्था भविष्यतीति नोक्तदोष इति वाच्यम्। तथा सति 'संभावनेऽलमिति

चेत्' (सू. ३-३-१५४) इति सूत्रे अलमिति चेत् इति विशेषणवैयर्थ्यात्। यदि हि संभावने नियमेनालमर्थो गम्येत तदा व्यभिचाराभावात् अलमिति विशेषणं नोपादीयेत। संभवव्यभिचाराभ्यां हि स्याद्विशेषणमर्थवत्। तथा च संभावनाशंसयोरालमर्थ्यतदभावकृतो विशेषो न वक्तुं शक्य इति स्थितम्। तदाह **संभावन** इति। तर्हि तयोर्विशेषाभावे पूर्वोक्ताव्यवस्थायाः कः परिहार इति चेत् इदं मे भूयादित्याकारकेच्छाविशेषः आशंसा। एकतरकोटिकानिश्चितज्ञानविशेषः संभावनमिति तयोर्भेदात् व्यवस्था संगच्छत इति **कैयटः**।

[ज्ञा.प.] तुमर्थे से - (सू. ३-४-९)॥ तुमर्थग्रहणं ज्ञापयति अस्त्यन्यः कर्तुस्तुमुनोऽर्थ इति।

[वि०] 'तुमर्थे सेसेनसे-' इत्यादिना सूत्रेण तुमुनोऽर्थे से सेन् इत्यादयः प्रत्यया वैदिकप्रकरणे विधीयन्ते। तत्र तुमुनोऽर्थः कः? इति संदेहो जायते। न तावत् कर्ता तुमुनोऽर्थः। तथा सति कर्तरि से सेन् इत्यादयो भवन्तीति सूत्रार्थः स्यात्। तदा तुमर्थ इति पदं व्यर्थम्। 'कर्तरि कृत्' इत्यनेनैव तेषां कर्त्रर्थकत्वावगमसंभवात्। अत आह—**तुमर्थग्रहण**मिति। तथा च पूर्वोक्तरीत्या तुमर्थग्रहणं व्यर्थं सत् कर्तुरन्योऽपि तुमुनोऽर्थोऽस्तीति ज्ञापयति। स च भावः। भावे च सेसेनादय इष्यन्ते। तदर्थं तुमर्थग्रहणं कृतमिति भावः। एवं ज्ञापने प्रयोजनं तु 'अव्ययकृतो भावे' इत्येतद्वार्तिकं न वक्तव्यं भवति। तुमर्थग्रहणानुवृत्त्यैव अव्ययकृतां क्त्वादीनां भावार्थकत्वसिद्धेरिति भाष्ये स्पष्टम्।

[ज्ञा.प.] कर्तरि कृत् (सू. ३-४-६७)॥ 'तयोरेव' (सू. ३-४-७०) इत्येवकारो ज्ञापयति इत उत्तरं समावेशो भवतीति। 'आदिकर्मणि क्तः कर्तरि च' (सू. ३-४-७१) इति चकारो ज्ञापयति प्रागमुतः समावेशो भवतीति।

[वि.] ननु 'तयोरेव कृत्यक्तखलर्थाः' इति सूत्रे एवकारः किमर्थः। न च कृत्यादयो भावकर्मणोरेव यथा स्युः कर्तरि मा भूवन्नित्येतदर्थसूचनाय स इति वाच्यम्। तयोरिति सूत्रस्य 'कर्तरि कृत्' इति सामान्यशास्त्रापवादत्वादेवोक्तार्थसिद्धेरित्याशङ्क्य, कृत्यप्रत्ययेषु कर्त्रर्थस्यापि समावेशोऽस्तीति ज्ञापनार्थमेवकारः। तथा च कर्त्रर्थस्यापि समावेशे प्राप्ते तन्निवृत्त्यर्थमेवकार इति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु भव्यादिषु शब्देषु कर्तुरपि प्रतीतिरिति। अत एव गेयो माणवकः साम्नामिति कर्तरि, गेयानि माणवकेन सामानीति कर्मणि च प्रयोग उपपद्यते। तदाह—**तयोरेवेत्येवकार** इति। तथा च भव्यगेयेति सूत्रे (सू. ३-४-६८) वाग्रहणं न कर्तव्यमिति भावः। **इत उत्तरमिति**। 'कर्तरि कृत्' इत्यस्मादुत्तरमित्यर्थः।

ननु यद्येवं ज्ञाप्यते तदा 'दाशगोघ्नौ संप्रदाने' (सू. ३-४-७३) 'भीमादयोऽपादाने (सू. ३-४-७४) इत्यत्रापि समावेशः प्राप्नोति। तथा च कर्तर्यपि तेषां प्रयोगः स्यादित्यत आह—**आदिकर्मणीत्यादिना**। अयं भावः—आदिकर्मणि क्तः कर्तरीत्येवास्तु नार्थश्चशब्देन। एवकारज्ञापितात् पूर्वोक्तवचनादेव चशब्दार्थस्य समावेशस्य सिद्धेः। कृतस्तु चकारो ज्ञापयति आदिकर्मणि इत्येतस्मात्परेषु सूत्रेषु कर्त्रा समावेशो न भवतीति। तथा च दाशगोघ्नादिषु न कर्त्रर्थसमावेश इति।

इति तृतीयोऽध्यायः

अथ चतुर्थोऽध्यायः

[ज्ञा. प.] 'पुंयोगात् आख्यायाम्' (सू. ४-१-४८) इति ङीष्विधानात् ज्ञापकात् नातः (प्रष्ठशब्दात्) तद्धितोत्पत्तिरिति।

[वि.] पुंयोगादाख्यायाम्' सूत्रस्य प्रष्ठी प्रचरी इत्युदाहरणं प्रदर्शितं भाष्ये। प्रष्ठस्य स्त्री इत्यर्थे प्रष्ठशब्दात् ङीष्। ननु प्रष्ठस्य स्त्री इत्यर्थे 'तस्येदम्' इत्यर्थसद्भावात् अणूरूपस्तद्धितः प्राप्नोतीत्याशङ्क्याह—**इति ङीष्-विधानादिति**। यदि हि प्रष्ठशब्दात् नियमेन तद्धितोत्पत्तिर्भवेत् तर्हि अण्-न्तत्वात् 'टिड्ढाणञ्' (सू. ४-१-१५) इति सूत्रेण ङीपैव प्राष्ठी इति रूपसिद्धौ 'पुंयोगादाख्यायाम्' इति ङीष्विधानमनर्थकमापद्येत। न च अणन्तान्ङीपि ङीषि वा रूपे विशेषः। नापि स्वरे, ङीष उदात्तत्ववत् ङीपोऽपि 'अनुदात्तस्य च यत्रोदात्तलोपः' इति सूत्रेण उदात्तत्वात्। ततश्च ङीष्विधानं व्यर्थं सत् न प्रष्ठशब्दात्तद्धितोत्पत्तिर्भवतीति ज्ञापयति इति भावः। न च भानोरिय-मित्यर्थे भानुशब्दात् 'वृद्धाच्छः' (सू. ४-२-११४) इति सूत्रेण छप्रत्यये टापि भानवीया इति भवति। तत्र टापं बाधित्वा ङीष्विधानार्थं पुंयोगादिति सूत्रमस्तु। तथा च कथं तज्ज्ञापकमिति वाच्यम्। तर्हि आख्याग्रहण-वैयर्थ्यात्। तत् व्यर्थं सत् ज्ञापयति तद्धितोत्पत्तिमन्तरेणैव यः पुंवाचकः शब्दः स्त्रियां वर्तते ततः ङीष् इति। भानवीया इत्यत्र यः पुंवाचकः भानु-शब्दः स न स्त्रियां वर्तते, यश्च स्त्रियां वर्तते छप्रत्ययान्तः स न पुमाख्या इति तत्र न ङीष्। प्रष्ठशब्दस्तु तद्धितं विनैव स्त्रीवाचकत्वात् ततः ङीष् भवति। तेन प्रष्ठशब्दान्न तद्धित इति पर्यवसितमिति हृदयम्।

[ज्ञा. पा.] स्वाङ्गाच्चोपसर्जनात् (सू. ४-१-५४)॥ 'सहनञ्-विद्यमानपूर्वाच्च' (सू. ४-१-५७) इति प्रतिषेधात् ज्ञापकात् आनन्तोदात्तादपि भवतीति।

[वि.] ननु 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति सूत्रे उपसर्जना-दिति व्यर्थम्। 'बहुव्रीहेश्चान्तोदात्तात्' (४-१-५२) इति सूत्रात् बहुव्रीहे-रित्यनुवृत्त्यैव उपसर्जनादित्यस्य लाभात्। न च संनियोगशिष्टन्यायेन अन्तोदात्तादित्यस्याप्यनुवृत्तिर्भवेदिति तद्वारणार्थम् 'उपसर्जनात्' इत्युपा-

दीयते। उपात्ते च तस्मिंस्तद्बलात् उपसर्जनमात्रात् स्वाङ्गादन्तोदात्तादनन्तोदात्तादपि ङीष् भविष्यतीति वाच्यम्। ज्ञापकपहिम्नैव अन्तोदात्तादित्यस्य 'स्वाङ्गाच्च' इति सूत्रेऽनुवृत्तिर्नास्तीत्यवगमात्। ज्ञापकमाह—**सहनञ्विद्यमानेति।** सहेत्यादित्रिकपूर्वात्स्वाङ्गात् ङीष् निषिध्यते। सकेशा अकेशा विद्यमाननासिका इत्युदाहरणानि। तत्र सहादिपूर्वस्य बहुव्रीहेः पूर्वपदप्रकृतिस्वरे शेषनिघातेन स्वाङ्गस्य नास्त्यन्तोदात्तत्वमिति 'स्वाङ्गाच्चोपसर्जनात्' इत्यनेन ङीषः प्राप्त्यभावात् प्रतिषेधोऽनर्थकः सन् अन्तोदात्तादित्यस्यानुवृत्त्यभावं ज्ञापयति। तथा चानन्तोदात्तादपि सहादिपूर्वात् ङीष्प्राप्तौ तत्प्रतिषेधकतया सहनञ्सूत्रं सार्थकम्। तथा च बहुव्रीहेरित्येतावन्मात्रस्यानुवृत्त्यैव उपसर्जनादित्यस्य लाभसंभवात् उपसर्जनग्रहणं मास्तु इत्याशयः।

[ज्ञा. प.] ढकि लोपः (सू. ४-१-१३३) ॥ एतदेव ज्ञापयति भवति पितृष्वसुर्ढक् इति।

[वि.] ननु पितृष्वसृशब्दात् ढकि 'ढकि लोपः' इति सूत्रेणान्त्यस्य ऋकारस्य लोपे पैतृष्वसेय इति रूपमिष्यते। तन्न सिध्यति। पितृष्वसृशब्दात् ढग्विधायकानुशासनाभावादित्यत आह—**एतदेवेति।** पितृष्वसृशब्दात् ढकोऽभावे ढकि परे तस्य लोपविधानमसंगतं स्यादिति ढकि लोपविधानमेव पितृष्वसृशब्दात् ढक् भवतीत्यत्र ज्ञापकमिति भावः।

अनेन ज्ञापकेन शुभ्रादिषु पितृष्वसृशब्दपाठः कल्पनीयः। यद्वा 'स्त्रीभ्यो ढक्' (सू. ४-१-१२०) इत्यत्र स्त्रीभ्य इत्यर्थग्रहणमिति ज्ञापनीयम्। अतः पितृष्वसुर्ढक्सिद्धिरिति **उद्योतकारः** प्रत्यपादयत्।

[ज्ञा.प.] ब्राह्मणमाणव - (सू. ४-२-४२) ॥ यञि प्रकृते यन्विधानं ज्ञापयति अन्येभ्योऽप्ययमिति।

[वि.] ननु 'ब्राह्मणमाणववाडवाद्यन्' इति सूत्रेण ब्राह्मणादिभ्यः समूहार्थे यन् विधीयते। ब्राह्मणानां समूहो ब्राह्मण्यमित्यादिकमुदाहरणम्। तत्र

सूत्रे यन् इति मास्तु। 'केदाराद्यञ्च' (सू. ४-२-४०) इति सूत्रात् यञ् इत्यस्यानुवृत्या इष्टरूपसिद्धेः। न हि यञो वा यनो वा रूपे स्वरे वा विशेषोऽस्ति। न च यञि सति स्त्रियां 'यञश्च' (सू. ४-१-१६) इति ङीप् स्यात्, यनि तु नेति विशेष इति वाच्यम्। **कौमुद्यां** अपत्याधिकारीययञन्तादेव ङीप् इत्युक्तत्वात्। ब्राह्मणादीनां स्वत एव वृद्धत्वेन यञि सत्यादिवृद्धिर्न तु यनि सतीत्यस्यापि विशेषस्यासंभवादित्याशङ्क्याह— **यञि प्रकृत** इति। तथा च व्यर्थं सत् यन्ग्रहणं ब्राह्मणादिभ्योऽन्येभ्योऽपि यन् भवतीति ज्ञापयति। तेन पृष्ठानां समूहः पृष्ठ्यमिति सिध्यति। तत्र च यञि सत्यादिवृद्धिर्भवेदिति यन्ग्रहणं कृतमिति चारितार्थ्यम्। एवं च 'पृष्ठादुपसंख्यानम्' इति वार्तिकं न कर्तव्यम्, ज्ञापकेनैव सिद्धेरिति भावः।

[ज्ञा.प.] खण्डिकादिभ्यश्च (सू. ४-२-४५)॥ खण्डिकादिषु क्षुद्रकमालवशब्दपाठो ज्ञापयति भवतीह तदन्तविधिरिति पूर्वश्च वुञ् परमञं बाधत इति च। अन्यथानुपपत्त्या एकस्येवोभयस्यापि ज्ञापनं न विरुध्यते।

[वि.] ननु 'खण्डिकादिभ्यश्च' इति सूत्रेण समूहार्थे अञ् विधीयते। खण्डिकादिगणे च क्षुद्रकमालवशब्दः पठ्यते। तस्य पाठः किमर्थः। 'अनुदात्तादेरञ्' (सू. ४-२-४४) इत्यनेनैव ततोऽञ्सिद्धेः। क्षुद्रकमालवशब्दस्यानुदात्तादित्वं चेत्थम्। क्षुद्रकस्यापत्यानीत्यर्थे 'जनपदशब्दात्' (सू. ४-१-१६८) इति विहितस्य तद्राजस्य लुक्। मालवात्तु वृद्धलक्षणस्य ञ्यङः। ततो द्वन्द्वः। ततः समासान्तोदात्तत्वेनानुदात्तादित्वमिति **कैयटः**। ततः समूहार्थे अञ्। न च 'गोत्रोक्षोष्ट्र' (सू. ४-२-३९) इति सूत्रप्राप्तवुञ्बाधनार्थं तत्पाठ इति वाच्यम्। 'अनुदात्तादेरञ्' इत्यस्य परत्वेन तद्विषये पूर्वस्य वुञोऽसंभवात्, गोत्राद्विहितस्य वुञः गोत्रान्तात् क्षुद्रकमालवशब्दात् प्राप्त्यभावाच्च इत्याशङ्क्य, अत एव पाठो ज्ञापयति 'पूर्वोऽपि वुञ् परमञं बाधते' 'भवतीह तदन्तविधिः' इति च वचन-

द्वयम्। तथा च वुञ् बाधित्वा समूहार्थे अञः सिद्धये क्षुद्रकमालवशब्दपाठ इति भाष्ये सिद्धान्तितम्। तदाह—**खण्डिकादिष्वित्यादिना**। ननु कथमेकेन वचनद्वयं ज्ञाप्येतेत्याशङ्क्याह—**अन्यथानुपपत्त्येति**। अन्यथानुपपत्त्या हि ज्ञापकत्वं भवति। उभयेन च विना क्षुद्रकमालवादञ्विधानं नोपपद्यत इत्युभयमपि ज्ञापयितुं शक्यमिति भावः।

न केवलं ज्ञापनार्थं पाठः। अपि तु सेनारूपसमूहविवक्षायां क्षौद्रकमालवी सेना इत्यञ्। अन्यस्य समूहस्य विवक्षायां तु क्षौद्रकमालवकमिति वुञ् इति विभागार्थमपि पाठ इति वार्तिककाराः प्राहुः।

[ज्ञा. प.] शेषे (सू. ४-२-९२)॥ 'फेश्छ च' (सू. ४-१-१४९) इति फिञन्तात् छविधानं ज्ञापकं नाण्विषये घादयो भवन्तीति।

[वि.] 'शेषे' इत्यधिकारसूत्रम् अपत्यादिभ्योऽन्यस्मिन्नर्थे वक्ष्यमाणा घादयो भवन्तीत्यर्थबोधकम्। एतदधिकाराभावे अपत्यादिष्वर्थेष्वपि अणादय इव घादयोऽपि प्राप्नुयुः। अपवादत्वाच्च घादीनाम्। अतः शेषाधिकारः कृतः। भाष्यकारस्तु असत्यपि शेषाधिकारे ज्ञापकेनापत्यादिष्वर्थेषु घादीन् व्यावर्त्य शेषाधिकारं प्रत्याचख्यौ। तदाह—**फेश्छ चेति**। 'फेश्छ च' इति सूत्रेण फिञन्तात्सौवीरगोत्रादपत्येऽर्थे छप्रत्ययः चकारात् ठक् च विधीयते। यमुन्दस्यापत्यं यामुन्दायनिः। तिकादित्वात् फिञ्, तस्यापत्यं यामुन्दायनीयः यामुन्दायनिकः इत्युदाहरणम्।

तत्र च फेर्वा इत्येव सूत्रमस्तु। 'वृद्धाट्ठक्' (सू. ४-१-१४८) इति पूर्वसूत्रात् ठक् इत्यनुवर्तते। तत्र ठका मुक्ते 'वृद्धाच्छः' (सू. ४-२-११४) इति छो भविष्यतीति नार्थश्छविधानेन। तत्तु ज्ञापकार्थं भवति अण्विषयेऽपत्यादिषु घादयो न भवन्तीति। तथा च छप्रत्ययाप्राप्तौ तत्प्राप्त्यर्थं

छविधानमिति स्वांशे चारितार्थ्यम्। एवं चानेनैव सिद्धेः शेषाधिकारः प्रत्याख्येय इति भावः।

यद्यपि अपत्यार्थमात्रविषयकमुक्तज्ञापकमिति शङ्का भवति, तथाप्यर्थान्तरेष्वपि 'गोत्रग्रहणं सामूहिकेषु ज्ञापकम्, दैवयातवग्रहणं वैषयिकेषु, भल्लायणग्रहणं नैवासिकेषु' इति भाष्योक्तानि ज्ञापकान्यत्रानुसन्धेयानि।

[ज्ञा. प.] कलापिवैशम्पायना—(सू. ४-३-१०४)॥ **कलापिखाण्डायनग्रहणात् ज्ञापकात् नान्तेवास्यन्तेवासिभ्यो भवति।**

[वि.] ननु 'कलापिवैशम्पायनान्तेवासिभ्यश्च' इति सूत्रेण कलाप्यन्तेवासिभ्यः वैशम्पायनान्तेवासिभ्यश्च तृतीयान्तेभ्यः तेन प्रोक्तमधीयत इत्यर्थे णिनिप्रत्ययो विधीयते। हरिद्रुर्नाम कलापिनः शिष्यः। ततो हरिद्रुणा प्रोक्तमधीयत इत्यर्थे णिनिप्रत्यये हारिद्रविण इति भवति। वैशम्पायनस्य शिष्यः आलम्बिः ततः णिनिप्रत्यये आलम्बिन इति भवति। तत्र कलापी वैशम्पायनशिष्येषु नवस्वन्यतमः। लोके शिष्यशिष्येऽपि शिष्य इति व्यवहारदर्शनात् वैशम्यायनशिष्यकलापिशिष्यस्य हरिद्रोरपि वैशम्पायनान्तेवासिग्रहणेनैव ग्रहणसिद्धेः कलापिग्रहणं सूत्रे मास्तु। एवं 'शौनकादिभ्यश्छन्दसि' (सू. ४-३-१०६) इति सूत्रमपि उक्तार्थे णिनिविधायकम्। शौनकादिगणे च खाण्डायनशब्दोऽपि पठितः। खाण्डायनश्च वैशम्पायनशिष्यस्य कठस्य शिष्यः। तथा च पूर्वोक्तन्यायेन वैशम्पायनान्तेवासिग्रहणेनैव खाण्डायनस्यापि ग्रहणसिद्धेः शौनकादिगणे तत्पाठो व्यर्थ इत्याशङ्क्य ज्ञापकविधया सार्थक्यमाह—**कलापिखाण्डयनग्रहणादिति**। तथा च सूत्रे अन्तेवासिशब्देन साक्षादन्तेवासिन एव ग्रहणम्। न त्वन्तेवास्यन्तेवासिन इति वैशम्पायनान्तेवास्यन्तेवासिनोः कलापिखाण्डायनयोर्णिनिप्रत्ययसिद्ध्यर्थं तयोः पृथगुपादानमिति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु वैशम्पायनान्तेवास्यन्तेवासिभ्यः कलाप्यन्तेवास्यन्तेसिभ्यो वा णिनिर्न भवतीति। ते च पुराणादिष्वन्वेषणीयाः।

हरिद्रुः छगली तुम्बुरुः उलपः इति चत्वारः कलापिशिष्याः। आलम्बिः कलिङ्गः कमलः ऋचाभः आरुणिः ताण्डयः श्यामायनः कठः कलापी इति नव वैशम्पायनशिष्या इति बालमनोरमा।

इति चतुर्थोऽध्यायः

—o—

अथ पञ्चमोऽध्यायः

[ज्ञा. प.] उपसर्गाच्छन्दसि (सू. ५-१-११८) ॥ 'स्त्रियाः पुंवत्' (सू. ६-३-३४) इति निर्देशो ज्ञापयति न वत्यर्थे नञ्स्नञौ भवत इति।

[वि.] ननु स्त्रीपुंशब्दाभ्यां वतिप्रत्यये स्त्रीवत् पुंवत् इति रूपे इष्येते। ते साधयितुं न शक्येते। स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' (सू. ४-१-८७) इति सूत्रेण प्राग्भवनाद्येऽर्थास्तेषु सर्वेष्वर्थेषु प्रकृतिविशेषाभ्यां विधीयमानौ नञ्स्नञौ सर्वस्यापि प्रत्ययस्य बाधकौ। तथा च 'तेन तुल्यं क्रिया चेद्वतिः' (सू. ५-१-११५) इति वतिमपि बाधित्वा नञ्स्नञावेव भवेतामित्याशङ्क्याह— **स्त्रियाः पुंवदिति निर्देश** इति। 'स्त्रीपुंसाभ्यां नञ्स्नञौ' इति सूत्रं न वत्यर्थे प्रवर्तते। यदि प्रवर्तेत तदा 'पुंवत्' इति निर्देशोऽसाधुः स्यादिति भावः।

[ज्ञा. प.] न नञ्पूर्वात्तत्पुरुषात् (सू. ५-१-१२१) ॥ 'नञो गुणप्रतिषेधे संपाद्यार्हहितालमर्थास्तद्धिताः' (सू. ६-२-१५५) इति ज्ञापकात् सर्व एते तद्धिताः सापेक्षाद्भवन्ति।

[वि.] 'न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटयुधकतरसलसेभ्यः' इति सूत्रेण एतत्सूत्रानन्तरसूत्रैर्ये भावप्रत्यया विधीयन्ते ते नञ्तत्पुरुषान्न स्युरिति प्रतिपाद्यते। अपटित्वम् अपटुत्वम् इत्यादिकमुदाहरणम्। तत्र भाष्यकारः सूत्र-

प्रत्याख्यानं कर्तुं ज्ञापकमहिम्ना अपतित्वम् इत्यादौ उत्तरसूत्रविहितानां भावप्रत्ययानामप्रवृत्तिं साधयामास। तदाह—**इति ज्ञापकादिति**। अयं भावः—वत्सेभ्यो न हित इत्यादौ प्रतिषेधसापेक्षत्वेन निरपेक्षत्वलक्षणसामर्थ्याभावेन समर्थाधिकारीयतद्धितानुत्पत्तौ नञः परस्य संपाद्यार्थकतद्धितान्तस्यान्तोदात्तविधानमनुपपन्नम्। तत्क्रियमाणं सामान्येन सर्वस्तद्धितो नञर्थापेक्षाद्भवतीति ज्ञापयति। न पतिः अपतिः तस्य भाव इत्यत्र तु नञ्तत्पुरुषस्य सापेक्षत्वाभावेन उत्तरेषां तद्धितानामसंभवेन त्वतल्भ्यामिष्टसिद्धेः 'न नञ्पूर्वात्तत्पुरुषात्' इति सूत्रं प्रत्याख्यानयोग्यमिति भावः।

[ज्ञा.प.] समां समां विजायते (सू. ५-२-१२) ॥ यलोपवचनं ज्ञापयति नात्र लुग्भवतीति।

[वि.] ननु 'समां समां विजायते' इति सूत्रेण समायां समायामित्यस्मात् समुदायात् प्रसूयत इत्यर्थे स्वप्रत्ययो विधीयते। समांसमीना गौः इत्युदाहरणम्। या प्रतिवर्षं प्रसूयते सैवमुच्यते। तत्र तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' (सू. २-४-७१) इति सूत्रेण तदवयवस्य सुपो लुकि प्राप्ते समामिति यलोपनिपातनात् सुपोऽत्र पूर्वपदे लुङ्न भवतीति ज्ञाप्यते। यदि हि सुपो लुक् स्यात् तदा याटः सुब्भक्तत्वात सुब्लुकैव यलोपे सिद्धे सूत्रे यलोपनिपातनं यकारस्यैव लोपो भवति न सर्वस्य प्रत्ययस्येति नियमार्थम्। न चैवं सत्युत्तरपदेऽपि सुपो लुङ्न स्यादिति वाच्यम्। पूर्वपद एव यलोपनिपातनादामः श्रवणं न तूत्तरपद इत्याश्रयणात्। न च तर्हि सूत्रे उत्तरपदे समामिति यलोपयुक्तः सविभक्तिको निर्देशोऽसंगत इति वाच्यम्। वाक्ये पूर्वोत्तरपदयोर्विकल्पेन यलोपवचनात् सौत्रस्य च निर्देशस्य वाक्यरूपत्वादिति। तदाह—**यलोपवचन**मिति।

[ज्ञा.प.] यत्तदेतेभ्यः परिमाणे (सू. ५-२-३९) ॥ परिमाणग्रहणं ज्ञापयति अन्यत् प्रमाणम् अन्यत्परिमाणमिति।

[वि.] ननु 'यत्तदेतेभ्यः परिमाणे वतुप्' इति सूत्रे परिमाणग्रहणं व्यर्थम्। 'प्रमाणे द्वयसच्' (सू. ५-२-३७) इति सूत्रात् प्रमाणे इत्यस्यानुवृत्त्यैव परिमाणार्थलाभादित्याशङ्क्य परिमाणं प्रमाणादन्यदिति ज्ञापनार्थं तदुपादानमित्याह—**परिमाणग्रहणमिति**। आरोहपरिणाहाभ्यां स्वगताभ्यां धान्यादि येन मीयते काष्ठादिमयेन तत्परिमाणम्, प्रस्थादिकमुच्यते। दारुवस्त्रादीनां विस्तारो येन मीयते तत्प्रमाणं हस्तादि इति **कैयटः**।

'उर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः।
आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः॥'

इति 'अर्हादगोपुच्छसंख्यापरिमाणाट्ठक्' (सू. ५-१-१९) इति सूत्रस्थं भाष्यमत्रानुसन्धेयम्।

[ज्ञा. प.] एतदोऽन् (सू. ५-३-५) ॥ थकारादावादेशविधानात् ज्ञापकात् भवत्यत्र थमुः।

[वि.] भाष्ये एतेन प्रकारेणेत्यर्थे इत्थमिति रूपं साधयितुं 'एतदः' 'अन्' इति योगविभागः कृतः। तत्र 'एतदः' इति सूत्रस्यायमर्थः—'एतेतौ रथोः' (सू. ५-३-४) इति सूत्रमनुवर्तते। एतच्छब्दस्य एत इत् इत्यादेशौ भवतः रेफादौ थकारादौ च प्रत्यये परे इति। 'अनद्यतने र्हिलन्यतरस्याम्' (सू. ५-३-२१) इति सूत्रविहितः र्हिल्प्रत्ययो रेफादिः। तत्र एतर्हि इत्युदाहरणम्। थकारादिः प्रत्ययः थमुः। तत्र परे एतच्छब्दस्य इदादेशे इत्थमिति भवति। तत्र 'इदमस्थमुः' (सू. ५-३-२३) इति सूत्रेण इदंशब्दादेव प्रकारार्थे थमुर्विहित इति एतच्छब्दात् थमोरविधानेन थकारादौ प्रत्यये परे एतदः इदादेशविधानं न संगच्छत इत्याशङ्क्य, अत एव ज्ञापकात् एतच्छब्दादपि प्रकारार्थे थमुर्भवतीत्यवगम्यत इत्याह—**थकारादाविति**। न च थाल्प्रत्ययोऽपि थकारादिस्तस्मिन्परे इदादेशविधायकतया सार्थक्यसंभवात् कथं ज्ञापकत्वमिति वाच्यम्। इदमा थकारादेर्विशेषणेन इदम्शब्दमुच्चार्य

विहितो यस्थकारादिः प्रत्ययस्तस्मिन् परे एतदः इदादेश इति सूत्रार्थात्। न हि थाल् इदम्शब्दानुवादेन विहित इति थमुरेवात्र ग्राह्यः। न च एतदस्थमोरभावे तस्मिन् परे इदादेशविधानमुपपनीपद्यत इति तत्सामर्थ्यात् एतदस्थमुर्भवतीति लभ्यत इति भावः।

इति पञ्चमोऽध्यायः

अथ षष्ठोऽध्यायः

[ज्ञा. प.] अजादेर्द्वितीयस्य (सू. ६-१-२) ॥ 'न न्द्राः संयोगादयः' (सू. ६-१-३) इति प्रतिषेधो ज्ञापयति पूर्वनिवृत्तौ व्यञ्जनस्यानिवृत्तिरिति।

[वि.] ननु 'अजादेर्द्वितीयस्य' इति सूत्रेण आदिभूतादचः परस्य द्वितीयस्यैकाचो द्वित्वमुच्यमानम् 'एकाचो द्वे प्रथमस्य' (सू. ६-१ १) इति सूत्रप्राप्तं प्रथमस्यैकाचो द्विर्वचनं बाधत इति वक्तव्यम्। तत्र च सव्यञ्जनस्य प्रथमस्यैकाचो द्विर्वचनं प्राप्तमिति तथाभूतमेव द्विर्वचनं द्वितीयद्विर्वचनेन बाध्येत। तथा च प्रथमैकाजन्तर्गतव्यञ्जनस्य द्विर्वचनं न प्राप्नोति। ततश्च अटिटिषतीत्यत्र अट् इत्ययं प्रथमैकाच्। द्वितीयैकाच् इत्यनेन च टकारविशिष्टमिकारं गृहीत्वा टिशब्दस्य द्वित्वमिष्यते, तन्न सिध्येत् इत्याशङ्क्याह—**न न्द्राः संयोगादय** इति। 'न न्द्राः संयोगादयः' इत्यनेन हि अचः परेषां संयोगादीनां नकारदकाररेफाणां द्वित्वं प्रतिषिध्यते। यथा 'ऊर्णुनाव' इत्यत्र द्वितीयैकाच्पदेन रेफविशिष्टस्य 'र्णु' शब्दस्य द्वित्वे प्राप्ते रेफं परित्यज्य नुशब्दस्यैव द्वित्वं भवति। तत्र रेफस्य प्रथमैकाचि 'ऊर्' इत्यस्मिन्नन्तर्गतस्य प्रथमैकाच्द्विर्वचनबाधेनैव द्वित्वाभावे सिद्धे तस्य द्वित्वनिषेधो व्यर्थः सन् पूर्वनिवृत्तौ व्यञ्जनस्यानिवृत्तिरिति ज्ञापयति। द्वितीयैकाच्द्विर्वचनेन प्रथमै-

काच्द्विर्वचने बाध्यमाने तदन्तर्गतव्यञ्जनस्य द्वित्वं न बाध्यत इति तदर्थः। तथा च रेफस्यापि द्वित्वप्राप्तौ तत्प्रतिषेधार्थं 'न न्द्राः' इति सूत्रम्। इत्थं च अटिटिषतीत्यादौ टिशब्दस्य द्वित्वसिद्धिर्निराबाधेति भावः।

[ज्ञा. प.] ग्रहिज्यावयि (सू. ६-१-१६) ॥ 'लिटि वयो यः (सू. ६-१-३८) इति वयेर्यकारस्य संप्रसारण-प्रतिषेधात् ज्ञापकात् न वेञ्ग्रहणाद्वयेः संप्रसारण-प्रतिषेधो भवतीति।

[वि.] 'ग्रहिज्यावयि' इति सूत्रे वयिग्रहणं प्रत्याख्यातुमिच्छन् भाष्यकारः यजादिषु वेञः पाठात् वेञश्च 'वेञो वयिः' (सू. २-४-४१) इति सूत्रेण लिटि वयिरादेशः क्रियते इति वयेः स्थानिवद्भावेन वेञ्त्वात् 'वचिस्वपियजादीनां किति' (सू. ६-१-१५) इत्यनेनैव संप्रसारणे सिद्धे संप्रसारणार्थः 'ग्रहिज्यावयी'ति सूत्रे वयिपाठो व्यर्थः। न च ङित्यपि संप्रसारणसिद्ध्यर्थं तत्पाठ इति वाच्यम्। वयेः लिण्मात्रविषयकत्वेन ङिति प्रयोगाभावात्। लिटश्च कित्त्वात् यजादित्वादेव संप्रसारणं सिध्यति इत्युक्तवान्। तदुपरि वेञः लिटि 'वेञः' (सू. ६-१-४०) इति सूत्रेण संप्रसारणप्रतिषेधात् स वयेरपि प्राप्नुयादिति तस्य प्रतिषेधस्य बाधनार्थं वयेः पाठोऽस्तु इत्याशङ्क्य, 'न वा यकारप्रतिषेधो ज्ञापकोऽप्रतिषेधस्य' इत्यवोचत्। तस्यायमाशयः—'लिटि वयो यः' (सू. ६-१-३८) इति सूत्रेण वयो यकारस्य लिटि संप्रसारणं प्रतिषिध्यते। तत्र संप्रसारणनिषेधपरे 'वेञः' इति सूत्रे यदि वेञ्ग्रहणेन वयेर्ग्रहणमभविष्यत् तदा तेनैव प्रतिषेधसिद्धेः 'लिटि वयो यः' इति सूत्रं नाकरिष्यत्। कृतं तत् सूत्रं प्रतिषेधसूत्रे वयेर्वेञ्ग्रहणेन ग्रहणं नेति ज्ञापयति। एवं च ज्ञापकात् प्रतिषेधसूत्रे वेञ्ग्रहणेन वयेर्ग्रहणे निषिद्धेऽपि 'वचिस्वपियजादीनां किति' इति विधिसूत्रे वेञ्ग्रहणेन वयिग्रहणे बाधकाभावात् तेनैव संप्रसारणसिद्धेः 'ग्रहिज्यावयि' इति सूत्रे वयिग्रहणं प्रत्याख्येयमिति। तदेतत्सर्वमभिप्रेत्याह—**इति वयेर्यकारस्येति।**

[ज्ञा. प.] आदेच उपदेशे (सू. ६-१-४५)॥ 'मीनातिमिनोति' (सू. ६-१-५०) इत्यत्र एज्ग्रहणानुवर्तनं ज्ञापयति न परनिमित्तकस्यात्वं भवतीति। अशितीति प्रतिषेधो ज्ञापकः नायादय आत्वं बाधन्त इति।

[वि.] 'आदेच उपदेशेऽशिति' इति सूत्रे उपदेशग्रहणवैयर्थ्यं विवक्षुर्भाष्यकारः यद्युपदेशग्रहणं न क्रियते तदा चेता स्तोता इत्यादावपि गुणे कृते एजन्तत्वसद्भावादात्वं प्राप्नोतीत्याशङ्क्य 'मीनातिमिनोतिदीङां ल्यपि च' इति सूत्रे चकारमहिम्ना एजन्तानां मीनात्यादीनामात्वं विधीयमानम् 'आदेच उपदेशे' इति सूत्रेण परनिमित्तकस्यात्वं न भवतीति ज्ञापयति। मीधातोर्गुणे कृते मे ता इत्यत्र एजन्तत्वादेव 'आदेच उपदेश' इत्यनेन आत्वे माता इत्यादिरूपसिद्धेः मीनातीति सूत्रं व्यर्थं सत् परनिमित्तमकैजन्तस्य आत्वं न भवतीति ज्ञापयति तथा च परनिमित्तकगुणेन संपन्नो य एच् तदन्तस्य आत्वं न प्राप्नुयादिति तत्प्राप्तिफलकं मीनातीति सूत्रं सार्थकम्। ततश्च चेता इत्यादावपि एकारस्य आर्धधातुकनिमित्तकगुणेन संपन्नत्वात् तदन्तस्य 'आदेचः' इति सूत्रेण आत्वं न भवतीति न्यरूपयत्। तदाह—**इत्यत्र एज्ग्रहणानुवर्तन**मिति। अत्र 'एजन्तानां मीनात्यादीनामात्वमित्यर्थेऽनेनैवात्वसिद्धेस्तत्सूत्रं व्यर्थं सदेतदर्थज्ञापकमिति भाव' इत्युद्योतग्रन्थोऽनुसन्धेयः।

तत्रैव भाष्ये उपदेशशब्दस्य करणसाधनत्वे उपदेशशब्देन शास्त्रमुच्यते। शास्त्रस्य च नैज् विशेषणमिति तदन्तविध्यभावात् उपदेशे य एच् तस्य आत्वमित्यर्थो लभ्यते। यदा तूपदेशशब्दः कर्मसाधनस्तदा उपदेशशब्द उपदिश्यमानवाची। उपदिश्यमानस्य धात्वादेरेच् विशेषणं भवितुमर्हतीति तदन्तविधौ एजन्तस्योपदिश्यमानस्य आत्वमित्यर्थः पर्यवस्यति। तत्र एच् य उपदेश इति पक्षे पक्षान्तरे च ग्लैधातोरनीयर्प्रत्यये ग्लै अनीय इत्यत्र आत्वं बाधित्वा परत्वादाय् प्राप्नोति। तथा च ग्लानीयमिति रूपं न सिध्यति। तथा

निशानीयमित्यत्र आव् प्राप्नोति इत्याशङ्क्य, अत्रापि शित्प्रतिषेधो ज्ञापकः नायादय आत्वं बाधन्त इति' इत्युक्तम्। शिति आत्वप्रतिषेधस्य फलं हि ग्लायतीत्यादौ शपि परे आत्वाभावः। तत्रापि ग्लै अ ति इत्यवस्थायां आत्वं बाधित्वा परत्वादायादेशेनेष्टरूपसिद्धेः किं शित्प्रतिषेधेन। कृतश्च स प्रतिषेधः आयादय आत्वं न बाधन्त इति ज्ञापयति इति तदर्थः। ततश्च आत्वे प्राप्ते तत्प्रतिषेधार्थमशितीत्युक्तमिति ग्लायतीत्यादावात्वाभावः ग्लानीयमित्यादावात्वं च सिध्यति। तदेतन्मनसिकृत्याह—**अशितीति प्रतिषेध** इति।

[ज्ञा.] हल्ङ्याब्भ्यो (सू. ६-१-६८) ॥ 'न ङिसंबुद्ध्योः' (सू. ८-२-८) इति संबुद्धौ प्रतिषेधो ज्ञापयति सिद्धः संयोगान्तलोपो नलोप इति।

[वि.] 'हल्ङ्याब्भ्यो दीर्घात्' इति सूत्रे राजन् स् इत्यत्र 'संयोगान्तस्य लोपः' (सू. ८-२-२३) इत्यनेनैव सुलोपे सिद्धे तत्फलकं प्रथमहल्ग्रहणं मास्त्वित्याशङ्क्य, नलोपे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वात् नलोपो न सिध्येदिति वार्तिककारेणोक्तं समाधानं निराचिकीर्षुः भाष्यकारः नलोपे कर्तव्ये संयोगान्तलोपः सिद्धो भवति यदयं 'न ङिसंबुद्ध्योः' (८-२-८) इति संबुद्धौ नलोपप्रतिषेधं शास्ति इत्यवोचत्। राजन्शब्दात् संबुद्धेर्यदि संयोगान्तलोपस्य नलोपे कर्तव्ये असिद्धत्वं स्यात्तदा नकारस्य पदान्तत्वाभावादेव लोपाप्रसक्तेः तन्निषेधो व्यर्थः स्यात्। अतः स निषेधो ज्ञापयति नलोपे कर्तव्ये संयोगान्तलोपो नासिद्ध इति। ततश्च राजा इत्यत्र सोः संयोगान्तलोपेनैवेष्टसिद्धेः प्रथमहल्ग्रहणस्य राजेत्यत्र सुलोपाख्यं वार्तिकोक्तं प्रयोजनं न युक्तमिति भाष्याशयः। तदाह—**न ङिसंबुद्ध्योरिति संबुद्धौ प्रतिषेध** इति।

[ज्ञा. प.] प्रथमयोः (सू. ६-१-१०२) ॥ 'नादिचि' (सू. ६-१-१०४) इति इज्ग्रहणं ज्ञापयति न जश्शसोः पररूपं भवतीति।

[वि.] ननु वृक्षाः इत्यादौ वृक्ष+अस् इति स्थिते 'प्रथमयोः पूर्वसवर्ण' इति पूर्वसवर्णदीर्घ इष्यते स न स्यात्, सर्वापवादस्य पररूपस्य प्रसक्तेः। तदुक्तं भाष्ये—'आद्गुणयणादेशावुत्सर्गौ, तयोरपवादा वृद्धिसवर्णदीर्घपूर्वसवर्णादेशाः। तेषां सर्वेषां पररूपमपवादः' इति, इत्याशङ्क्य ज्ञापकेन पररूपाभावं साधयति—**इज्ग्रहणमिति**। 'नादिचि' (सू. ६-१-१०४) इति पूर्वसवर्णनिषेधके सूत्रे इज्ग्रहणस्य वृक्षाः इत्यादौ पूर्वसवर्णनिषेधाभावः प्रयोजनम्। यदि तत्र पूर्वसवर्णदीर्घं बाधित्वा पररूपं भवेत् तर्हि पूर्वसवर्णदीर्घस्याप्रसक्त्या प्रतिषेधोऽपि न भवतीति किं प्रतिषेधवारणफलकेन इज्ग्रहणेन। कृतं च तत् जश्शसोः परतः पररूपं न भवतीति ज्ञापयति इति भावः। न च 'दीर्घाज्जसि च' (सू. ६-१-१०५) इत्युत्तरसूत्रे अनुवृत्त्यर्थम् इज्ग्रणमिति वाच्यम्। तर्हि दीर्घादिज्जसोः' इति तत्रैव इज्ग्रहणं कुर्यात्। इह क्रियमाणमिहार्थमेव वक्तव्यम्। तदपि न संभवतीत्युक्तत्वात् व्यर्थं सदिज्ग्रहणं ज्ञापकमेवेति। विस्तरस्तु भाष्ये।

[ज्ञा. प.] प्लुतप्रगृह्या अचि (सू. ६-१-१२५)॥ प्लुतः प्रकृत्या इति प्रकृतिभावविधानात् ज्ञापकात् एकादेशात् प्लुतो भवति विप्रतिषेधेनेति।

[वि.] ननु 'प्लुतप्रगृह्या' इति सूत्रेण किमर्थं प्लुतस्य प्रकृतिभाव उच्यते। न च स्वरसन्धिबाधनार्थमुच्यत इति वाच्यम्। 'पूर्वत्रासिद्धम्' (सू. ८-२-१) इति प्लुतस्यासिद्धत्वात् एकादेशादिरूपः स्वरसन्धिरेव प्राप्नोतीति प्रकृतिभावविधानस्यानर्थकत्वादित्याशङ्क्याह—**प्लुतः प्रकृत्या इतीति**। यद्यसिद्धत्वात्प्लुतस्य स्वरसन्धिर्भवेत् तदा प्रकृतिभावविधानमनर्थकं स्यात्। अत एव विधानात् प्लुतः सिद्धः इति ज्ञापनद्वारा एकादेशात्प्लुतो भवतीति ज्ञाप्यते। तथा च सन्ध्यभावफलकं प्लुतस्य प्रकृतिभावविधानं सार्थकमिति भावः।

[ज्ञा. प.] अनुदात्तं पदम् (सू. ६-१-१५८)॥ यदयं 'तवै चान्तश्च युगपत्' (सू. ६-२-५१) इति सिद्धे यौगपद्ये यौगपद्यं शास्ति तज्ज्ञापयति न युगपत्स्वरो भवतीति ।

[वि.] 'अनुदात्तं पदमेकवर्जम्' इति सूत्रे भाष्ये—

"आगमस्य विकारस्य प्रकृतेः प्रत्ययस्य च ।
पृथक्स्वरनिवृत्त्यर्थमेकवर्जं पदस्वरः ॥"

इति श्लोकेन एकस्मिन् पदे प्रकृतिप्रत्ययादीनां युगपत्स्वरः प्राप्नोति इष्यते चैक एव स्वरः स्यादिति तदर्थमिदं सूत्रमुच्यत इति सूत्रप्रयोजनमुक्त्वा नैतदस्ति प्रयोजनं, यदयं 'तवै चान्तश्च युगपत्' (सू. ६-१-५१) इति सिद्धे यौगपद्ये यौगपद्यं शास्ति तज्ज्ञापयत्याचार्यः 'न युगपत्स्वरो भवतीति' तत्प्रयोजनं खण्डयामास । अयं तस्याशयः—'तवै चान्तश्च' इति सूत्रेण तवैप्रत्ययान्तस्यान्तोदात्तः गतिसंज्ञकस्य पूर्वपदस्य प्रकृतिस्वरश्च उभयं युगपत् भवतीति विधीयते 'अन्वेतवै' इत्युदाहरणम् । तत्र युगपद्ग्रहणमन्तरेणापि एकस्मिन् पदे एककाले विरोधाभावादनेकस्वरसिद्धौ युगपद्ग्रहणं व्यर्थं सत् युगपदनेकस्वरो न भवतीति ज्ञापयति । तथा च अन्वेतवै इत्यादौ प्रत्ययस्वरगतिस्वरयोर्युगपत्प्रवृत्त्यर्थं युगपद्ग्रहणं कृतमिति स्वांशे चारितार्थ्यम् । तेनान्यत्र पदे युगपत्स्वरो न भवतीति सिद्धम्। तथा च सूत्रप्रयोजनस्य ज्ञापकेनैव सिद्धिरिति । तदेतदाह— **यदयमिति ।**

[ज्ञा. प.] 'रिक्ते विभाषा' (सू. ६-१-२०८) इति सिद्धे पर्याये पर्यायविधानं ज्ञापकम् अन्यत्र न पर्यायो भवतीति ।

[वि.] नन्वनेन ज्ञापकेन युगपदनेकस्वराभावसिद्धावपि पर्यायेण विकल्पेनानेकस्वरः प्राप्नोति । इष्यते त्वेक एव स्वरः । तस्य कथं सिद्धिरित्याशङ्क्याह

रिक्ते विभाषेति। 'रिक्ते विभाषा' इति सूत्रेण रिक्तशब्दे विकल्पेन आद्युदात्तः विधीयते। पक्षे प्रत्ययस्वरेणान्तोदात्तत्वं भवति। यदि च पर्यायेण तत्तत्स्वरः स्यात् तदा कदाचित् धातुस्वरेण आद्युदात्तत्वं कदाचित् प्रत्ययस्वरेणान्तोदात्तत्वमित्येवं पर्यायेण स्वरद्वये सति विकल्पविधानफलसिद्धेः किं 'रिक्ते विभाषा' इति सूत्रेण। कृतं च तत् पर्यायेणानेके स्वरा न भवन्तीति ज्ञापयति। तदेवं पर्याययौगपद्ययोर्निरासे 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परिभाषया परत्वनित्यत्वादियुक्तः स्वरो भविष्यतीति नार्थः सूत्रेणेति सिद्धम्। परं त्वेताभ्यां ज्ञापकाभ्यामेकस्मिन् पदेऽनेकोदात्तसमावेशाभावे लब्धेऽपि उदात्तस्वरितसमावेशाभावो न लभ्यत इत्याशङ्का अवशिष्यते। तत्र भाष्यकार आह—'स्वरितेऽप्यनुदात्तोऽस्ति' इति। उदात्ते पर्याययौगपद्यनिरासे ज्ञापकात् कृते स्वरितेऽप्युदात्तसद्भावात् उदात्तस्वरितयोरपि पर्याययौगपद्ययोर्निरासः सिद्ध इति भाष्याशयः। परं त्वस्मिन् शास्त्रे उदात्तग्रहणेन स्वरितावयवोदात्तस्य ग्रहणं न भवति। अत एव 'उदात्तस्वरितयोः' (सू. ८-२-४) इत्यादौ भेदेन निर्देशः संगच्छते। एवं च स्वरितेन समावेशनिरासार्थम् 'अनुदात्तं पदमेकवर्जम्' इति सूत्रमावश्यकमेव। अत एवैतन्मनसि कुर्वता भाष्यकारेण 'आरभ्यमाणेऽप्येतस्मिन् योगे' इत्यनन्तरं प्रोक्तम्। तत्र **चोद्योतः**—

> "अनेन स्वरितविषयकत्वं ज्ञापकस्यासंगतम् इत्युक्तम्।
> एतन्मूलकमेव भाष्यकार आह—आरभ्यमाणेऽपीति"

इति स्पष्टं सूत्रावश्यकतां प्रकाशयतीत्यवधेयम्।

[ज्ञा. प.] तासेः परस्य लसार्वधातुकस्यानुदात्तविधानात् ज्ञापकात् सतिशिष्टोऽपि विकरणस्वरो लसार्वधातुकस्वरं न बाधत इति।

[वि.] ननु 'सति शिष्टस्वरबलीयस्त्वं च' इति वार्तिकेन एकस्मिन् पदे पूर्वमेव कस्यचित् स्वरे सति अनन्तरं कस्यचित्स्वरः अनुशिष्टः विहितः

बलीयानिति प्रोक्तम्। तथा चेत् सुनुतः धिनुतः इत्यादौ विकरणस्वरः सार्वधातुकस्वरं बाधेत। सार्वधातुके परतः विकरणस्य विधानेन विकरणस्वरस्य पूर्वमेव प्रवृत्ते सार्वधातुकस्वरे सति शिष्टत्वात् इत्याशङ्क्याह—**तासेः परस्येति**। 'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तम्' (सू. ६-१-१८६) इति सूत्रेण तासेः परस्य लसार्वधातुकस्यानुदात्तत्वं विधीयते। कर्तारौ कर्तार इत्युदाहरणम्। यदि सतिशिष्टेन विकरणस्वरेण सार्वधातुकस्वरो बाध्येत, तदा विकरणस्य तासः उदात्तत्वे 'अनुदात्तं पद'मिति शेषस्यानुदात्तत्वेन लसार्वधातुकस्यानुदात्तत्वे सिद्धे किं तासेः परस्य लसार्वधातुकस्यानुदात्तत्वविधानेन। विहितं च तत् सतिशिष्टोऽपि विकरणस्वरो लसार्वधातुकस्वरं न बाधत इति ज्ञापयति। तथा च तदनुसारेण कर्तारौ इत्यादौ सार्वधातुकस्योदात्तत्वे प्राप्ते तद्बाधनेन अनुदात्तत्वविधायकतया सूत्रं सार्थकम्। ततश्च धिनुतः इत्यादौ लसार्वधातुकस्वरेणान्तोदात्तत्वसिद्धिर्ज्ञापनफलमिति भावः।

[ज्ञा. प.] चतुरः शसि (सू. ६-१-१६७)॥ 'षट्त्रिचतुर्भ्यो हलादिः' (सू. ६-१-१७९) इति हलादिग्रहणं ज्ञापयति न निपातनस्वरो विभक्तिस्वरं बाधत इति।

[वि.] 'चतुरः शसि' इति सूत्रे 'चतुरः शसि स्त्रियामप्रतिषेधः आद्युदात्तनिपातनात्' इति वार्तिकम्। तस्यायमर्थः—चतुरः शसीति सूत्रेण शसि परतश्चतुर्शब्दस्यान्तोदात्तो विधीयते। तथा च स्त्रीलिङ्गे चतस्रः पश्येत्यत्रापि चतसृशब्दस्य स्थानिवद्भावेन चतुर्शब्दत्वमाश्रित्य अन्तोदात्तत्वं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः। न वक्तव्यः। चतसृशब्दस्य आद्युदात्तनिपातनं करिष्यते। तत्र चतुर्शब्दस्य चतेरुरन्प्रत्ययान्तत्वेन आद्युदात्ततया तत्स्थानिकस्य चतसृशब्दस्यापि स्थानिवद्भावेन आद्युदात्तत्वे सिद्धे पुनराद्युदात्तनिपातनम् 'चतुरः शसि' इति सूत्रविहितान्तोदात्तस्य बाधकमिति। एतदुपरि यथेदमाद्युदात्तनिपातनं 'चतुरः शसि' इति सूत्रविहितं प्रकृत्यन्तो-

दात्तत्वं बाधते एवं 'षट्त्रिचतुर्भ्यो हलादिः' (सू. ६-१-१७९) इति सूत्रविहितं विभक्तिस्वरमपि बाधेत। तथा च चतसृभिरित्यादौ विभक्त्युदात्तत्वं न स्यादित्याशङ्कायामाह—**इति हलादिग्रहणमिति**। हलादिग्रहणं हि चतसृः पश्येत्यत्र शसः उदात्तत्वं मा भूदिति क्रियते। यदा तु आद्युदात्तनिपातनं विभक्तिस्वरं बाधेत तदा चतसृ इत्यत्र चतसृ इत्यस्याद्युदात्तेन शस्स्वरबाधादेव इष्टसिद्धौ किं हलादिग्रहणेन। तत्क्रियमाणं विभक्तिस्वरस्य बलीयस्त्वं ज्ञापयतीति भावः। न च षट्संज्ञेभ्यः या अजादिर्विभक्तिः तद्व्यावृत्तिः हलादिग्रहणस्य प्रयोजनमिति वाच्यम्। षट्संज्ञानां हि द्विवचनैकवचने न स्तः। जश्शसी च 'षड्भ्यो लुक्' (सू. ७-१-२२) इति लुप्येते इति व्यावर्त्यालाभात्। एवं त्रिशब्दस्यापि बहुवचनविषयत्वात् द्विवचनैकवचने न स्तः। जसस्तु असर्वनामस्थानमिति विशेषणादेव व्यावृत्तिः। शसि तु त्रि अस् इत्यत्र पूर्वसवर्णदीर्घे 'एकादेश उदात्तेनोदात्तः' इति उदात्तत्वमिष्यत एवेति तदपि न व्यावर्त्यम्। तिसृशब्देऽप्येवम्। शसि परं तिसृः पश्येत्यत्र 'उदात्तयणो हल्पूर्वात्' (सू. ६-१-१७४) इति अन्तोदात्तत्वमिष्यत एवेति तदपि न व्यावर्त्यम्। चतसृः पश्येत्येकमेव व्यावर्त्यम्। तत्र च पूर्वोक्तरीत्यैव निर्वाहे हलादिग्रहणं व्यर्थं सदुक्तवचने ज्ञापकमिति भाष्ये स्पष्टम्।

[ज्ञा. प.] तास्यनुदात्तेत् (सू. ६-१-१८६)॥ अनुदात्तङिद्ग्रहणं ज्ञापकं न लुप्तविकरणेभ्योऽनुदात्तत्वं भवतीति।

[वि.] नन्वनेकान्ता अनुबन्धा इति पक्षे शपोऽप्यदुपदेशत्वात् ततः परस्य लसार्वधातुकस्य अत्तः जुहुतः इत्यादौ 'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तम्' इत्यनुदात्तत्वं प्राप्नोतीत्याशङ्क्याह—**अनुदात्तङिद्ग्रहणमिति**। आस्ते शेते इत्यादौ लसार्वधातुकस्यानुदात्तत्वसिद्ध्यर्थं 'तास्यनुदात्तेन्ङिददुपदेशात्' इति सूत्रे अनुदात्तेद्ग्रहणं ङिद्ग्रहणं च क्रियते। तदुभयं व्यर्थम्। अदुपदेशाच्छपः परत्वमादायैव अनुदात्तत्वसिद्धेः। अतस्तत् ज्ञापयति

लुप्तेभ्यो विकरणेभ्यः परस्य लसार्वधातुकस्यानुदात्तत्वं न भवतीति। अतः न दोष इति भावः।

[ज्ञा. प.] समासस्य (सू. ६-१-२२३)॥ 'नोत्तरपदेऽनुदात्तादौ' (सू. ६-२-१४२) इत्युक्त्वा 'अपृथिवीरुद्रपूषमन्थिषु' इति प्रतिषेधात् ज्ञापकात् तत्र सिद्धं तद्भवति व्यञ्जनादेर्व्यञ्जनान्ताच्चेति।

[वि] ननु अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्ताच्च न प्राप्नोति उदात्तत्वानुदात्तत्वादीनामज्घर्मत्वात्। ततश्च दाधित्थम् इत्यत्र 'अनुदात्तादेश्च' (सू. ४-३-१४०) इत्यञ्, 'अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे' (सू. ६-१-१६९) इति परमवाचेत्यादौ अन्तोदात्तादुत्तरपदात् परस्यास्तृतीयादिविभक्तेर्विधीयमानमुदात्तत्वं च न सिध्येदित्याशङ्क्याह—**समासस्येत्यादि**। 'नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु' (सू. ६-२-१४२) इति सूत्रेण देवताद्वन्द्वे अनुदात्तादावुत्तरपदे पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरः 'देवताद्वन्द्वे च' (६-२-१४१) इति सूत्रप्राप्तः प्रतिषिध्यते। तत्र च 'अपृथिवीरुद्रे' त्यादिना पृथिव्यादिषूत्तरपदेषु प्रतिषेधस्य प्रतिषेधः कथ्यते। पृथिव्यादीनां शब्दानां व्यञ्जनादीनामनुदात्तादित्वाभावेनैव प्रतिषेधाप्रवृत्तेः 'अपृथिवी' त्यादि पर्युदासो व्यर्थः सन् अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्ताच्च भवतीति ज्ञापयति। तेन अपृथिवीत्यादिपर्युदाससार्थक्यं दाधित्थमित्यादाविष्टसिद्धिश्च भवतीति भावः।

[ज्ञा. प.] अनिगन्तेऽञ्चतौ (सू. ६-२-५२)॥ 'अहरणे' (सू. ६-१-६५) इति प्रतिषेधात् ज्ञापकात् न कृत्स्वरो हारिस्वरं बाधत इति।

[वि] ननु बाडवहार्य इत्यत्र 'सप्तमीहारिणौ धर्म्येऽहरणे' (सू. ६-२-६५) इति सूत्रेण सप्तम्यन्तं हारिवाचि च आद्युदात्तं धर्म्ये परे इत्यर्थकेन बाडवशब्दस्याद्युदात्तत्वं प्राप्तम्। तथा 'गतिकारकोपपदात् कृत्'

(सू. ६-२-१३९) इति कृत्स्वरेण (ण्यत्स्वरेण) अन्तस्वरितत्वं च प्राप्तम्। तत्र परत्वात् हारिस्वरं बाधित्वा कृत्स्वरः प्राप्नोति। इष्यते तु हारिस्वरेण पूर्वपदाद्युदात्तत्वम्। तत्सिद्धिः कथमित्यत आह - **अहरण इति प्रतिषेधादिति।** अयमाशयः—बडवाया अयं बाडवः बीजाश्वः। तस्य बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं यद्दीयते तत् हरणमिति हार्यमिति चोच्यते। बाडवाय हरणमिति क्रिग्रहे बाडवहरणमिति भवति। देयं यः स्वीकरोति स हारीत्युच्यते। तथा च बाडवशब्दस्य हारिवाचित्वात् तस्य धर्म्यवाचिनि हरणशब्दे परे अनेन आद्युदात्तत्वं प्राप्तम्। तथा 'अनो भावकर्मवचनः' (सू. ६-२-१५०) इति सूत्रेण उत्तरपदान्तोदात्तत्वं च प्राप्तम्। तत्र परत्वात् उत्तरपदान्तोदात्तत्वेन हारिस्वरबाधात् हारिस्वराप्रवृत्तेः तन्निषेधकम् अहरण इत्येतद्व्यर्थं सत् कृत्स्वरो हारिस्वरं न बाधते अपि तु हारिस्वर एव कृत्स्वरं बाधत इति ज्ञापयति। न च 'गतिकारकोपपदात् कृत्' इति परत्वात् कृत्स्वरे प्राप्ते हरणोत्तरपदेऽपवादतया 'अनो भावकर्मणोः' इति प्राप्नोति। तत्प्राप्त्यनन्तरं 'सप्तमीहारिणौ धर्म्येऽहरणे' इत्युच्यते। एवं च 'अहरणे' इत्यनेन हारिस्वरं 'अनो भाव' इति स्वरो न बाधत इति ज्ञापनसंभवेऽपि कृत्स्वरो हारिस्वरं न बाधत इति कथं ज्ञापयितुं शक्यत इति वाच्यम्। कृत्स्वरबाधकस्य 'अनो भावकर्मणोः' इति स्वरस्य 'सप्तमीहारिणौ' इति स्वरो बाधक इति ज्ञापिते तद्बाधकबाधकस्य सुतरां तद्बाधकत्वस्य कैमुतिकन्यायेन सिद्धेः। ततश्च सामान्यतः कृद्विषये येन केनापि परेण सूत्रेण प्राप्तस्य स्वरस्य सर्वस्य पूर्वविप्रतिषेधेन हारिस्वरो बाधक इति ज्ञाप्यते। इत्थं च हरणशब्दे परेऽपि हारिस्वरस्य प्राप्तौ तन्निवृत्त्यर्थम् अहरण इत्युक्तमिति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु बाडवहार्यमित्यत्र हरणशब्दभिन्ने हार्यशब्दे परे कृत्स्वरं बाधित्वा 'सप्तमीहारिणौ' इति प्रकृतसूत्रेण पूर्वपदाद्युदात्तत्वं भवतीति।

[ज्ञा. प.] अन्तः (सू. ६-२-१४३) ॥ कपि पूर्ववचनं ज्ञापकम् उत्तरपदस्यान्तोदात्तत्वं न भवतीति।

[वि.] अन्तः इत्यधिकारसूत्रम् । तच्चोत्तरसूत्रैकवाक्यतापन्नं सत् अन्त उदात्तो भवतीत्यर्थं बोधयति । तत्र कस्यान्त उदात्त इत्याकांक्षायां 'समासस्य' (६-१-२२३) इत्यपि प्रकृतम्, 'उत्तरपदादिः' (सू. ६-२-१११) इत्यत उत्तरपदस्येत्यपि । तथा च समासस्य वा उत्तरपदस्य वा अन्त उदात्त इत्यर्थः पर्यवस्यति । तत्र उत्तरपदस्यान्तोदात्तत्वमिति पक्षे अनृचः बहृवृचः इत्यत्र 'ऋक्पूरब्धूःपथामानक्षे' (सू. ५-४-७४) इति सूत्रेण समासान्ते अप्रत्यये तस्य उदात्तत्वमिष्यते । तन्न सिध्येत् । अकारो हि समासस्यावयवो नोत्तरपदस्येति तस्योदात्तत्वं न प्राप्नोतीत्याशङ्क्याह—**कपि पूर्ववचनमिति ।** कस्यान्त इत्याकाङ्क्षायां समासस्येत्येव संबध्नाति नोत्तरपदस्येति । तथा च समासस्यान्त उदात्त इत्येव सूत्रार्थः । अत्र ज्ञापकं तु 'कपि पूर्वम्' (सू. ६-१-१७३) इति । तस्य हि नञ्सुभ्यां परं यदुत्तरपदं तदन्तस्य समासस्य कपि परे पूर्वमुदात्तमित्यर्थः । यथा सुकुमारीक इत्यत्र ईकारः उदात्तः । यदि हि उत्तरपदस्यान्त उदात्त इति स्यात् तदा कपः समासावयवस्योत्तरपदावयवत्वाभावात् कुमारीत्युत्तरपदस्यान्त ईकार एवोदात्तो भविष्यति 'नञ्सुभ्याम्' (सू. ६-२-१७२) इति सूत्रेणेति किं 'कपि पूर्वम्' इति सूत्रेण । कृतं च तत् समासस्यान्त एवोदात्तो नोत्तरपदस्येति ज्ञापयति । अतः कपि पूर्वमिति सूत्रसार्थक्यम् अनृच इत्यादौ समासान्तोदात्तत्वं च सिध्यत इति भावः ।

परं त्वत्र पक्षे इदंप्रथमका इत्यत्र 'बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने' (सू. ६-२-१६२) इति सूत्रेण विधीयमानः अन्तोदात्तः समासान्तत्वात् कपः प्राप्नोति । इष्यते तु मशब्दाकारस्य । तन्न सिध्येत् । अतस्तस्मिन् सूत्रे परं उत्तरपदस्येत्येतदेव संबध्नाति न तु समासस्येति वक्तव्यम् । स्पष्टं चेदं भाष्यकैयटयोः ।

[ज्ञा. प.] कारनाम्नि च (सू. ६-३-१०) ॥ एतदेवालुग्वचनं ज्ञापयति भवत्यत्र समास इति ।

[वि.] 'कारनाम्नि च प्राचां हलादौ' इति सूत्रेण प्राचां देशे यत् कारनाम तत्र हलादावुत्तरपदे हलदन्तात् सप्तम्या अलुग्विधीयते। तत्र वार्तिककारैः किमियं प्राप्तविभाषा उत अप्राप्तविभाषा इति विचार्य 'अप्राप्ते समासविधानम्' इत्युक्तम्। मुकुटेकार्षापणमित्यादौ 'हलदन्तात् सप्तम्याः संज्ञायाम्' (सू. ६-३-९) इति सूत्रेणालुक्यप्राप्ते विभाषा इत्युक्ते असंज्ञात्वं फलति। तत्र च समासो दुर्लभ इति समासोऽपि विधेयः। प्राप्तविभाषेति पक्षे तु संज्ञायामेव विषये विभाषेति 'संज्ञायाम्' (सू. २-१-४४) इति सूत्रेणैव समाससिद्धेः अलुङ्मात्रं विधेयमिति वार्तिकाशयः। भाष्यकारस्तु—

'नैष दोषः। एतदेव ज्ञापयति भवत्यत्र समास इति
यदयं कारनाम्नि सप्तम्या अलुकं शास्ति'

इत्याह। अप्राप्तविभाषेति पक्षेऽपि असंज्ञात्वेऽपि अलुग्विधानसामर्थ्यादेव समासो भवतीति ज्ञायते। अन्यथा लुक एवाप्रसक्तेरलुग्विधानवैयर्थ्यादिति भाष्यतात्पर्यम्। तदेतदाह—**एतदेवालुग्वचनमिति।**

[ज्ञा. प.] चौ (सू. ६-३-१३८)॥ एतदेव ज्ञापयति न चौ प्रत्यङ्गं भवतीति।

[वि.] ननु प्राचा दधीचा इत्यादौ नलोपानन्तरमन्तरङ्गत्वादेकादेशे यणादेशे च कृते अजन्तत्वाभावात् 'चौ' इति दीर्घो न प्राप्नोतीत्यत आह—**एतदेव ज्ञापयतीति।** दीर्घविधानसामर्थ्यात् 'चौ' इति सूत्रं प्रति यदन्तरङ्गं तन्न भवतीत्यर्थः। वस्तुतस्तु 'चौ' इति निर्देशेन अकारलोपानन्तरमेतत् सूत्रं प्रवर्तत इत्यवगमात् एकादेशयणादीनामकारलोपानन्तरं प्रवृत्तियोग्यत्वविरहाच्चिन्त्यमिदम्। प्रत्यङ्गशब्दोऽन्तरङ्गवाची॥

[ज्ञा. प.] आर्धधातुके (सू. ६-४-४६)॥ नानेन शपोऽकारस्य लोपो भवतीत्यत्र अदिप्रभृतिभ्यः शपो लुग्विधानं ज्ञापकम्। आकारान्तेभ्यो लुग्विधानं वा ज्ञापकम्।

[वि.] कानि पुनरार्धधातुकाधिकारस्य प्रयोजनानीत्याशङ्क्य भाष्ये

'अतो लोपो यलोपश्च णिलोपश्च प्रयोजनम् ।
आलोप ईत्वमेत्वं च चिण्वद्भावश्च सीयुटि ॥'

इति प्रयोजनपरिगणनं कृत्वा अतो लोपे आर्धधातुकाधिकाराभावे चिकीर्षतीत्यत्रापि सनोऽकारस्य लोपः स्यादित्यभिधाय, अस्त्वत्र सनोऽकारलोपः शपोऽकारस्य श्रवणं भविष्यतीत्याक्षिप्य, शप एवाकारस्य लोपो मा भूदित्येवमर्थमार्धधातुकाधिकार इति समाधाय, नैतदस्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति नानेन शपोऽकारस्य लोपो भवतीति, यदयमदिप्रभृतिभ्यः शपो लुकं शास्ति इत्यभिहितम् । तदेतदाह—**नानेनेति** । आर्धधातुकाधिकारीयेण 'अतो लोपः' इति सूत्रेणेत्यर्थः । ननु वित्तः मृष्ट इत्यादौ शपोऽकारस्य यद्यतो लोपः स्यात् तदा प्रत्ययलक्षणेन गुणवृद्ध्यादिकार्यं भवेत् । तन्निवृत्तये शपो लुग्विधानमिति प्रयोजनान्तरसद्भावात् कथमिदं ज्ञापकमित्याशङ्क्याह—**आकारान्तेभ्य** इति । यदि शपोऽतो लोपः स्यात् तदा 'या वा' प्रभृतय आकारान्ता धातवो भूवादिष्वेव पठ्येरन्, न त्वदादिषु, लुग्लोपयोस्तत्र विशेषाभावादिति भावः ।

इति षष्ठोऽध्यायः ।

अथ सप्तमोऽध्यायः

ननु शङ्खः शण्ढ इत्यादावपि आयन्नादय आदेशाः प्राप्नुवन्ति । 'शमेः खः' (सू. उ. सू. १०७) इत्याद्युणादिसूत्रैः ख ढ इत्यादीनां प्रत्ययानां विधानेन खादीनां प्रत्ययादित्वेन 'आयनेयी' इति सूत्रप्राप्तेरित्याशङ्क्याह—

[ज्ञा. प.] ऋतेरीयङ् (सू. ३-१-२९) ॥ इति धातोरीयङ्विधानं ज्ञापकं न धातुप्रत्ययानामायन्नादयो भवन्तीति ।

[वि.] अयं भावः—ऋतिः सौत्रो धातुः जुगुप्सार्थकः। ततः स्वार्थे ईयङ्प्रत्ययः 'ऋतेरीयङ्' (सू. ३-१-२९) इति सूत्रेण विधीयते। ऋतीयते इति रूपम्। तत्र लाघवात् ऋतेश्छङ् इत्येव वक्तुं शक्यम्। छकारस्य 'आयनेयी' इति सूत्रेण ईयादेशे ऋतीय इतीष्टं रूपं सिद्धमेव। ततश्च लघीयांसं न्यासं परित्यज्य ऋतेरीयङ् इति गरीयांसं न्यासं यत्करोति तज्ज्ञापयति धातोः परेषां प्रत्ययानां ये फादयः तेषामायन्नादयो न भवन्तीति। ततश्च छङ्विधाने धातोः परस्य छङः छकारस्य ईयादेशो न भवेदिति ईयङ्विधानं सार्थकम्। तेन शङ्ख इत्यादौ 'आयनेयी' इति सूत्रं न प्रवर्तत इति।

[ज्ञा. प.] इकोचि (सू. ७-१-७३)॥ अज्ग्रहणं ज्ञापयति भवतीह कश्चिदन्योऽपि प्रकारः प्रत्ययलक्षणं नामेति।

[वि.] 'इकोऽचि विभक्तौ' इति सूत्रे अज्ग्रहणमुत्तरार्थमित्युक्तं वार्तिककारेण। तत्र भाष्यकारः यद्युत्तरार्थं स्यात् तर्हि तत्रैव कुर्यात् इह क्रियमाणस्य तस्य प्रयोजनं किंचित् वाच्यम् इत्याशङ्क्य, त्रपु जपु इत्यत्र नुम्वारणं प्रयोजनमित्युक्त्वा ततः विभक्तावित्यस्यानुवृत्तेः विभक्तौ परत एव नुम् भवति। त्रपु जतु इत्यत्र विभक्तेर्लुका लुप्तत्वात् विभक्तिपरकत्वाभावादेव नुम् न भविष्यतीति अज्ग्रहणं व्यर्थम्। न च प्रत्ययलक्षणेन विभक्तिपरत्वमाशङ्कनीयम्। 'न लुमताङ्गस्ये'ति निषेधादित्याशङ्क्य एवं तर्हि सिद्धे सति यदज्ग्रहणं करोति तज्ज्ञापयति भवतीह कश्चिदन्योऽपि प्रकारः प्रत्ययलक्षणं नाम। तथा च प्रत्ययलक्षणेन विभक्तिपरकत्वात् त्रपु इत्यादौ नुमि प्राप्ते तद्वारणाय अज्ग्रहणम्। एवं ज्ञापनस्य प्रयोजनं तु हे त्रपो इत्यत्र संबुद्धेर्लोपेऽपि प्रत्ययलक्षणेन संबुद्धिपरकत्वात् 'ह्रस्वस्य गुणः' (सू. ७-३-१०८) इति गुणः सिद्धो भवतीत्युक्तवान्। तदाह—**अज्ग्रहणमिति।**

[ज्ञा. प.] स्त्रियां च (सू. ७-१-९६)॥ 'न तिसृचतसृ' (सू. ६-४-४) इति प्रतिषेधो ज्ञापयति न रादेशो नुटं बाधत इति।

[वि.] 'स्त्रियां च' (सू. ७-१-९६) इति सूत्रे 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकम्। अचिरस्योदाहरणम् तिसृणां चतसृणामिति। तिसृ आम् चतसृ आम् इत्युभयत्रापि 'अचि र ऋतः' (सू.७-२-१००) इति रादेशे 'ह्रस्वनद्यापः' (सू. ७-१-५४) इति नुडागमे च प्राप्ते परत्वात् रेफादेशे कृते नुडागमो न प्राप्नोति। अतः पूर्वविप्रतिषेधेन अचि रादेशं बाधित्वा नुडागमो भवतीति वार्तिकस्याशयः। तदनन्तरं 'न वा नुड्विषये रप्रतिषेधात्' इत्यन्यद्वार्तिकम्। नुड्विषये रादेशो न भवतीति वक्तव्यम्। अन्यथा रादेशस्य गुणपूर्वसवर्णबाधकत्वमिव नुड्बाधकत्वमपि स्यादिति तदाशयः। तदेतत् वार्तिकद्वयं प्रत्याचक्षाणो भाष्यकारः 'न तिसृचतसृ' इति सूत्रेण नामि परतः तिसृचतसोः दीर्घनिषेधात् रादेशस्य नुड्बाधकत्वे नाम्परकत्वस्यासम्भवात् रादेशो नुटं न बाधत इति ज्ञापनात् नुड्विषये रादेशस्याप्राप्तेः नुड्विषये रप्रतिषेधोऽपि न वक्तव्यः पूर्वविप्रतिषेधेन नुटः उपसंख्यानमपि अनावश्यकमिति न्यरूपयत्। तन्मनसिकृत्याह - **न तिसृचतसृ इति प्रतिषेध इति।**

[ज्ञा. प.] विभाषा भावादि (सू. ७-२-१७)॥ योगविभागो ज्ञापकः यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति।

[वि.] ननु 'आदितश्च' 'विभाषा भावादिकर्मणोः' (सू. ७-२-१६,१७) इति सूत्रद्वयमष्टाध्याय्यां पठ्यते। तत्र प्रथमसूत्रस्य आकारेतो धातोर्निष्ठाया इण्न स्यादित्यर्थः। प्रस्विन्न इत्युदाहरणम्। द्वितीयसूत्रस्य भावे आदिकर्मणि च आदितो निष्ठाया इड्वा स्यादित्यर्थः। तत्र सूत्रद्वयं मास्तु 'आदितो विभाषा भावादिकर्मणोः' इत्येकमेव सूत्रं क्रियताम्। भावे आदिकर्मणि च आदितो धातोर्विभाषा इट् इति सूत्रार्थः। तर्हि कर्तरि इट्प्रतिषेधः कथं लभ्यते इति चेत्- 'यस्य विभाषा' (सू. ७-२-१५) इति सूत्रेण लभ्यते। यस्य क्वचित् विभाषा इड्उक्तः ततो निष्ठाया इण्न स्यादिति तस्य सूत्रस्यार्थः। ततश्च आदितो भावादिकर्मणोर्विभाषा इटः उक्तत्वात् कर्तरि निष्ठायाः यस्य विभाषेति इण्निषेधः

सिध्यति। तथा च योगं विभज्य प्रथमसूत्रस्य इण्निषेधपरतया द्वितीयस्य वेड्विधायकतया च वर्णनं किमर्थमित्याशङ्क्य, अत एवैवमेकेन योगेन सिद्धे योगविभागकरणं ज्ञापयति यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति। यादृश-विशेषणविशिष्टस्य विकल्पः विहितः तादृशविशेषणविशिष्ट एव प्रतिषेधोऽपि भवितुमर्हति। तत्र च भावादिकर्मणोरुपाध्योर्विकल्पविधानात् कर्तरि निष्ठया यस्य विभाषेति इटः प्रतिषेधो न स्यात्। भावादिकर्मणोरपि विकल्पप्रतिषेधयोरसंभवात् प्रतिषेधो न स्यात्। तथा च सूत्रवैयर्थ्यं स्यात्। अतः कर्तरि कर्मणि च निष्ठाया इट्प्रतिषेधाय, भावे आदिकर्मणि च विकल्पेन इड्विधानाय च योगविभागः कृतः। यदुपाधेरिति ज्ञापनस्य फलं तु विद ज्ञाने इति धातोः 'विभाषा गमहनविदविशाम्' (सू. ७-२-६८) इति सूत्रेण वसोर्विकल्पेन विविदिवान् विविद्वान् इत्येवमिड्विधानात् निष्ठायां विदित इत्यत्र 'यस्य विभाषा' इति इण्निषेधः प्राप्तः। स च उक्तज्ञापकाद्वार्यते। 'विभाषा गमहन' इति सूत्रे तौदादिकेन विशिना साहचर्यात् तौदादिकस्य 'विद्लृ लाभे' इत्यस्यैव ग्रहणमिति तस्यैव विकल्पेन इट् विहित इति तस्यैव 'यस्य विभाषा' इत्यनेन इट्प्रतिषेधः न ज्ञानार्थकस्येति ज्ञानार्थकस्य विदित इति रूपस्य सिद्धिरिति भाष्यादिषु निर्णीतम्। तदभिसन्धायाह - **योगविभाग** इति। अत्र च 'यद्यपि हन्तिना साहचर्यं विदेरस्ति तथापि शब्दपरविप्रतिषेधाद्विशिर्व्यवस्थाहेतुर्न हन्ति'रिति कैयटग्रन्थोऽप्यनुसन्धातव्यः।

[ज्ञा. प.] स्वरतिसूति (७-२-४४)॥ 'सनीवन्तर्ध'(सू.७-२-४९) इत्यत्र स्वृग्रहणात् ज्ञापकात् नेयं विभाषा उग्लक्षणस्य प्रतिषेधस्य विषये भवतीति।

[वि.] ननु स्वृत्वा इत्यत्र 'स्वरतिसूतिसूयतिधूञूदितो वा' इति सूत्रेण इड्विकल्पापत्तिः। न च 'श्रुचुकः किति' (सू. ७-२-११) इति उगन्तात् परस्य कितः इण्निषेधात् नेट्प्रसङ्ग इति वाच्यम्। स्वरतीति सूत्रं येननाप्राप्तिन्यायेन यथा एकाज्लक्षणस्य इण्निषेधस्य बाधकं तथा 'श्रुयुकः किति' इत्यस्यापि

बाधकमिति इडापत्तेर्दुर्वारत्वात् इत्याशङ्क्याह — **सनीवन्तर्ध इत्यत्रेति।** अयमाशयः— 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्' (७-२-४९) इति सूत्रेण इवन्तेभ्यः ऋधादिभ्यश्च परस्य सन इड्वा स्यादिति कथ्यते। स्वृधातुरपि तत्र निर्दिष्टः। तस्य चोदाहरणम् सुस्वूर्षति सिस्वरिषतीति च। तत्र 'स्वरतिसूति' इति सूत्रेणैव इड्विकल्पस्य सिद्धत्वात् स्वृग्रहणं व्यर्थं सत् ज्ञापयति स्वरतिसूतीति विभाषा उग्लक्षणस्य प्रतिषेधस्य विषये न भवतीति। ततश्च 'श्र्युकः किति' इति प्रतिषेधप्राप्तौ तद्बाधनाय 'सनीवन्तर्ध' इति सूत्र स्वृग्रहणम्। एवं च स्वृत्वा इत्यत्र इड्विकल्पाप्रवृत्तेः 'श्र्युकः किति' इतीण्निषेधात् नेटः प्रसङ्ग इति।

[ज्ञा. प.] तद्धितेष्वचामादेः (सू. ७-२-११७)॥ अनुशतिकादिषु पुष्करसच्छब्दपाठो ज्ञापयति अचामादिवृद्धौ अन्त्योपधालक्षणा वृद्धिर्न भवतीति।

[वि.] ननु 'क्रौष्ट्रः, जागतः' इत्यत्र क्रोष्टृशब्दात् जगच्छब्दाच्च तस्येदमित्यण् भवति, तद्धितेष्वचामादेः इत्यादिवृद्धिश्च। तत्र ऋकारस्य अन्त्यस्य 'अचो ञ्णिति' (सू. ७-२-११५) इति वृद्धिः जगच्छब्दे उपधाया अकारस्य 'अत उपधायाः' (सू. ७-२-११६) इति वृद्धिः प्राप्नोति। न चाचामादिवृद्धिरन्त्यलक्षणायाः उपधालक्षणायाश्च वृद्धेर्बाधिका, अतः तयोः शब्दयोरचामादिवृद्धिरेव भवतीति वाच्यम्। येननाप्राप्तिन्यायेन ह्यपवादत्वात् बाधकत्वं वक्तव्यम्। तच्चात्र न भवति। यत्र अन्त्यलक्षणा उपधालक्षणा च वृद्धिर्भवितुमयोग्या तत्रापि सौश्रुतः इत्यादावचामादिवृद्धेः सावकाशत्वेन बाधकत्वासंभवादित्याशङ्क्याह — **अनुशतिकादिष्विति।** अयं भावः—पुष्करसदः अपत्यमित्यर्थे पुष्करसच्छब्दात् 'बाह्वादिभ्यश्च' (सू. ४-१-९६) इति इञि आदिवृद्धौ प्राप्तायामुभयपदवृद्ध्यर्थं पुष्करसच्छब्दः अनुशतिकादिषु पठ्यते। यदि अचामादिवृद्धिविषयेऽपि उपधावृद्धिर्भवेत् तर्हि उकारस्य अचामादिवृद्ध्या

सकाराकारस्य उपधावृद्ध्या च पौष्करसादिः इति उभयपदवृद्धिसिद्धेः तदर्थं क्रियमाणः अनुशतिकादिषु तत्पाठो व्यर्थः स्यात्। कृतश्च सः उक्तवचनं ज्ञापयतीति। यद्यपि उपधावृद्ध्यर्हस्य पुष्करसाच्छब्दस्य पाठः उपधावृद्ध्यभावमेव ज्ञापयितुमलम्, तथाप्येकदेशानुमत्या वा वृद्धिसामान्यं न भवतीत्येवं सामान्यापेक्ष-ज्ञापकत्वेन वा अन्त्यलक्षणा वृद्धिरपि न भवतीति लभ्यत इति ध्येयम्।

[ज्ञा.प.] जाग्रोऽवि (सू. ७-३-८५)॥ चिण्णलोः प्रतिषेधो ज्ञापयति न गुणाभिनिर्वृत्तस्य वृद्धिर्भवतीति।

[वि.] ननु जागृधातोर्णिजन्तालुटि जागरयतीत्यत्र जागृ इ अति इति स्थिते ऋकारस्य 'जाग्रोऽविचिण्णल्ङित्सु' इति सूत्रेण गुणे रपरे सति जागर् इ अति इति स्थिते 'अत उपधायाः' (सू. ७-२-११६) इति वृद्धिः प्राप्नोति इत्याशङ्क्याह—**चिण्णलोरिति**। 'जाग्रोऽविचिण्णल्ङित्सु' इति सूत्र एव चिणि णलि च परतः गुणो निषिध्यते। तत्फलं च अजागारि, जजागार इत्युभयत्रापि गुणाप्रवृत्तिपूर्वकवृद्धिसिद्धिरिति। तत्रापि सत्यपि गुणे अजागर् इ, जजागर् अ इत्यवस्थायां 'अत उपधायाः' इति वृद्ध्या इष्टरूपसिद्धेः किं तयोर्गुणप्रतिषेधेन। कृतश्च प्रतिषेधो ज्ञापयति गुणशब्देन निष्पन्नो योऽकारः तस्य अत उपधाया इति वृद्धिर्न भवतीति। एवं च चिण्णलोर्जाग्रो गुणे सति तदभिनिर्वृत्तस्य अकारस्य वृद्धिर्न भवेदिति तयोर्गुणप्रतिषेधः कृतः। ततश्च गुणाभावे 'अचो ञ्णिति' इति वृद्धौ अजागारि जजागार इति रूपसिद्धिरिति स्वांशे चरितार्थता। ज्ञापनप्रयोजनं तु जागरयतीत्यादौ अत उपधाया इति वृद्धिः न भवतीति इत्याशयः॥

[ज्ञा. प.] पुगन्त (सू. ७-३-८६)॥ कृनुसनोः कित्करणं ज्ञापकं भवत्येवंजातीयकानां गुण इति।

[वि.] ननु भिदेस्तृचि तुमुनि च भेत्ता भेत्तुमित्यत्र 'पुगन्तलघूपधस्य च' इति गुणो न सिध्यति। भिद् तृ, भिद् तुम् इत्यत्र धात्वन्तप्रत्ययाद्योर्हलो-

रनन्तरयोः संयोगसंज्ञायां 'संयोगे गुरु' (सू. १-४-११) इति इकारस्य गुरुसंज्ञया लघुसंज्ञाया बाधात् उपधाया इकारस्य लघुत्वाभावादित्याशङ्क्याह— **कृनुसनोरिति**। 'त्रसिगृधिधृषिक्षिपेः कृनुः' (सू. ३-२-१४०) इति सूत्रे कृनोः कित्करणं गृध्नुः इत्यादौ उपधागुणप्रतिषेधार्थम्। तत्रापि धात्वन्तप्रत्ययाद्योर्हलोः संयोगसंज्ञायां 'संयोगे गुरु' इति ऋकारस्य गुरुसंज्ञया लघुसंज्ञायाः बाधात् उपधायाः लघुत्वाभावादेव गुणाप्रवृत्तेः गुणनिषेधफलकं कित्करणमनर्थकम्। एवं 'हलन्ताच्च' (सू. १-२-१०) इति सूत्रेण इक्समीपाद्धलः परस्य झलादेः सनः कित्त्वविधानं बिभित्सतीत्यादौ गुणनिषेधफलकं क्रियमाणं व्यर्थम्। धात्वन्तदकारप्रत्ययादिसकारयोः संयोगसंज्ञायां तस्मिन् परे इकारस्य गुरुत्वेन लघुत्वाभावादेव गुणाप्रवृत्तेः। तथा च क्नुसनोः कित्करणं व्यर्थं सत् **एवंजातीयकानां**—धात्वन्तप्रत्ययाद्योर्हलोः संयोगसंज्ञां निमित्तीकृत्य लब्धगुरुव्यपदेशानामिकां गुणो भवतीति ज्ञापयति। एवं च गुणप्राप्तौ तन्निषेधफलकं कित्करणं सार्थकं भवति। ज्ञापनफलं तु भेत्ता भेत्तुमित्यादौ गुणसिद्धिरिति भावः॥

[ज्ञा. प.] 'ङेराम्नद्याम्नीभ्यः' (सू. ७-३-११६) इति पृथगाब्ग्रहणात् नापो नदीसंज्ञा भवतीति।

[वि.] 'यू स्त्र्याख्यौ नदी' इति सूत्रेण नित्यस्त्रीलिङ्गयोरीदूदन्तयोर्नदीसंज्ञा उच्यते। तत्र यू इत्यनुक्तौ खट्वा माला इत्यादेः नित्यस्त्रीलिङ्गस्य टाबन्तस्यापि नदीसंज्ञायां खट्वाबन्धुः मालाबन्धुः इत्यत्र 'नदी बन्धुनि' (सू. ६-२-१०९) इति सूत्रेण पूर्वपदान्तोदात्तस्वरः प्रसज्येत। इष्यते तु खटेः औणादिके क्वनि खट्वाशब्दनिष्पत्तेः नित्स्वरेण आद्युदात्तत्वात्मकः पूर्वपदप्रकृतिस्वरः। यू इत्युक्तौ तु खट्वाशब्दस्य ईदूदन्तत्वाभावात् नदीसंज्ञाया अप्राप्त्या न पूर्वोक्तदोष इति यू इत्यस्य प्रयोजनं वक्तव्यम्। तत्तु प्रयोजनं ज्ञापकेन आबन्तस्य नदीसंज्ञायाः वारयितुं शक्यत्वादयुक्तम्। तथा हि—यदि आबन्त-

स्यापि नदीसंज्ञा स्यात् तर्हि 'ङेराम्नद्याम्नीभ्यः' इति सूत्रे नदी इत्यनेनैव आबन्तस्यापि ग्रहणे सिद्धे पृथक् आब्ग्रहणमनर्थकं स्यात्। कृतं च तत् आबन्तस्य नदीसंज्ञा न भवतीति ज्ञापयति। तदेतदाह — **इति पृथगिति।** तथा च आबन्तस्य नदीसंज्ञावारणफलकत्वं यू इत्यस्य न भवतीति मात्रे मातुः इत्यत्र ऋकारान्तस्य नदीत्ववारणमेव तत्फलं वक्तव्यम्। तस्य हि नदीत्वे 'आण् नद्याः' इति ततः परस्य ङितः आडागमो भवेदिति भाष्ये स्थितम्।

[ज्ञा. प.] ऋतश्च (सू. ७ ४-९२)॥ अङ्गविशेषणमेतदित्यत्र तपरकरणं ज्ञापकम्।

[वि.] ननु 'ऋतश्च' (सू. ७-४-९२) इति सूत्रे ऋत इत्येतत् किमङ्गविशेषणम् आहोस्विदभ्यासविशेषणम्। अभ्यासविशेषणत्वपक्षे धातोरवयवस्य ऋदन्तस्याभ्यासस्य रुक् रिक् रीक् आगमाः यङ्लुकि स्युरिति सूत्रार्थः। अङ्गविशेषणत्वपक्षे ऋकारान्तस्य धातोरवयवस्याभ्यासस्य उक्तागमाः स्युरिति सूत्रार्थः। कतरः पक्षोऽत्र न्याय्य इत्याशङ्क्य अङ्गविशेषणमित्याह—**अङ्गविशेषणमिति।** अत्र सूत्रे तपरकरणाभावे 'कॄ विक्षेपे' इति धातोर्यङ्लुकि चाकर्तीत्यत्र अभ्यासस्य रुगाद्यागमः प्राप्नुयात्। कॄ यङ्लुक् ति इति स्थिते धातोर्द्वित्वे कॄ कॄ ति इति स्थिते अभ्यासह्रस्वे 'उरत्' इत्यभ्यासस्य अकारे कर् कॄ ति इति जाते हलादिशेषे चुत्वे 'दीर्घोऽकितः' (सू. ७-४-८३) इति अभ्यासस्य दीर्घे चाकॄति इति स्थिते 'सार्वधातुकार्धधातुकयोः' इति ऋकारस्य गुणे च चाकर्तीति रूपं सिध्यति। तत्र ऋकारस्याभ्यासविशेषणत्वपक्षे तपरकरणं व्यर्थम्। अभ्यासस्थदीर्घऋकारव्यावर्तनं हि तत्फलम्। न ह्यभ्यासे दीर्घः संभवति। 'ह्रस्वः' (सू. ७-४-५९) इति सूत्रेण ह्रस्वप्राप्तेः। तथा च तपरकरणं ज्ञापयति अङ्गविशेषणमेतत् इति। तत्र च तपरकरणाभावे अभ्यासह्रस्वेऽपि कॄ कॄ इत्यङ्गस्य दीर्घान्तस्य संभवात् तदवयवाभ्यासस्य रुगाद्यागमे सति चर्कर्ति चरिकर्ति चरीकर्ति इति

रूपाणि कृघातोर्भवेयुः । इष्यते तु चाकर्तीति रूपम् । अतस्तत्परकरणं कृतम् । कृते च तस्मिन् कृ कृ इत्यङ्गस्य ह्रस्वऋकारान्तत्वासंभवात् न तदवयवाभ्यासस्य रुगाद्यागमप्राप्तिरिति भावः ॥

[ज्ञा. प.] सन्वल्लघुनि (सू. ७-४-९३) ॥ 'अत्स्मृदृत्वर' (सू ७-४-९५) इति इत्वबाधनार्थात्वविधानं ज्ञापयति भवति संयोगव्यवहितानामित्वमिति ।

[वि.] ननु 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सूत्रेण चङ्परे णौ यल्लघु तस्मिन् परतोऽभ्यासस्य सन्वत्कार्यं भवतीत्युच्यते । एवं च अचिक्षणत् इत्यत्र अभ्यासस्य इत्वं न प्राप्नोति । क्षणधातोर्णिजन्तात् लुङि अटि चङि द्वित्वे हलादिशेषे चुत्वे च अचक्षण् इ अत् इत्यत्र चङ्परे णौ यल्लघु क्ष इत्यत्र अकारः तत्परकत्वमभ्यासस्य नास्ति संयोगसंज्ञककारषकारव्यवधानात् इत्याशङ्क्याह — **इत्वबाधनार्थेत्यादि ।** अयं भावः—'अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्' (सू. ७-४-९५) इति सूत्रेण स्मृ इत्यादीनां धातूनामभ्यासस्य अकारोऽन्तादेशो विधीयते चङ्परे णौ परे। असस्मरत् इत्यादिकमुदाहरणम् । 'सन्वल्लघुनि' इति सूत्रेण सन्वद्भावातिदेशप्राप्तस्य इत्वस्य बाधनाय अत्वं विधीयते । तत्र सकारमकाररूपसंयोगव्यवहितत्वात् अभ्यासस्य चङ्परणिपरकलघुपरकत्वं नास्तीत्यत एव सन्वद्भावाभावेन इत्वाप्रसक्तेः तद्बाधनार्थतया विधीयमानमत्वं व्यर्थं सत् ज्ञापयति संयोगव्यवहितानामपि इत्वं भवतीति । तथा च अचिक्षणत् इत्यत्र इत्वं सुलभमिति भावः ॥

इति सप्तमोऽध्यायः

अथ अष्टमोऽध्यायः

[ज्ञा.प.] पदस्य (सू.८-१-१६)॥ 'नलोपः प्रातिपदिकान्तस्य' (सू. ८-२-७) इति अन्तग्रहणं ज्ञापयति विशेषणषष्ठ्येषा न स्थानषष्ठीति ।

[वि.] ननु 'पदस्ये'त्यधिकारसूत्रमुत्तरसूत्रेषु संबध्नाति। तत्र पदस्येति स्थानषष्ठी वा विशेषणषष्ठी वेति संदेहे आह— **नलोप** इत्यादिना। 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेऽपि पदस्येत्यधिक्रियते। यदि तत्स्थानषष्ठी स्यात् तदा अन्तग्रहणं व्यर्थम्। तथा हि सति प्रातिपदिकस्येति पदस्येत्यस्य विशेषणम्। प्रातिपदिकसंज्ञकस्य नान्तस्य पदस्य लोप इति सूत्रार्थः। तत्र चालोन्त्यपरिभाषया पदान्तस्य नकारस्य लोपो भविष्यतीति किमन्तग्रहणेन। कृतं च तत् पदस्येति विशेषणषष्ठीति ज्ञापयति। तेन पदावयवभूतं यत्प्रातिपदिकं तदवयवस्य नस्य लोप इति सूत्रार्थः। तत्र च स्थानषष्ठीत्वाभावात् अलोऽन्त्यपरिभाषायाः अनुपस्थितौ अन्त्यस्य नकारस्य लोपो न लभ्येतेति अन्तग्रहणं अन्तनकारलोपार्थं क्रियत इति स्वांशे चारितार्थ्यम्। विशेषणषष्ठीति ज्ञापनस्यान्यत्र प्रयोजनं तु 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (सू. ८-२-४) इति सूत्रे पदस्येत्यधिकारात् तस्य च स्थानषष्ठीत्वे उदात्तस्वरितयोर्यो यण् ततः परो योऽनुदात्तः तदन्तस्य पदस्य स्वरितत्वमलोऽन्त्यस्य भवतीति सूत्रार्थः स्यात्। ततश्च कुमार्यौ इत्यत्रैव तत्सूत्रं प्रवर्तेत, कुमार्यः इत्यत्र न प्रवर्तेत। तथा हि कुमारी औ इति स्थिते उदात्तस्य ईकारस्य स्थाने यो यण् ततः परोऽनुदात्तः औकारः तदन्तस्य कुमार्यौ इति पदस्य अन्त्यः औकारः तस्य स्वरितत्वं यद्यपि सिध्यति, तथापि कुमारी जस् इत्यत्र उदात्तेकारस्थानिकयणः परः यः अनुदात्तः जसोऽकारः हल्स्वरप्राप्तेरत्राभावेन व्यञ्जनस्याविद्यमानत्वाभावादिति तदन्तत्वं पदस्य नास्ति, सकारान्तत्वात् इति जसोऽकारस्य कुमार्यः इति स्वरितत्वं न सिध्येत्। पदस्य इत्यस्य विशेषणषष्ठीत्वे तु पदस्यावयवो यः उदात्तस्वरितस्थानिकयणः परोऽनुदात्तस्तस्य स्वरितत्वमिति वाक्यार्थः। तत्र च जसवयवाकारस्यानुदात्तस्य पदावयवत्वमस्तीति स्वरितत्वं सिध्यतीति। एवम् 'एकादेश उदात्तेनोदात्तः' (सू. ८-२-५) इत्यत्रापि प्रयोजनं बोध्यम्।

[ज्ञा. प.] अनुदात्तं सर्वमपादादौ (सू. ८-१-१८) ॥ **'न लुट्'** (सू. ८-१-२९) **इति प्रतिषेधात् ज्ञापकात् अनादेरप्य-**

नुदात्तत्वं भवति। 'गत्यर्थलोटा' (सू. ८-१-५१) इति लटि प्रतिषेधात् ज्ञापकात् अनन्त्यस्याप्यनुदात्तत्वं भवति।

[वि.] 'अनुदात्तं सर्वमपादादौ' इत्यधिकारसूत्रम्। तत्र सर्वग्रहणं यदि न क्रियते तदा 'तिङ्ङतिङः' (सू. ८-१-२८) इति सूत्रेऽप्येतत्सूत्रानुवृत्तेः अतिङन्तात्परस्य तिङन्तस्यानुदात्तत्वमुच्यमानम् 'आदेः परस्य' इति आदेरेव स्यात्। आदिभिन्नस्य न स्यात्। इष्यते तु तिङन्तस्य सर्वोऽवयवोऽनुदात्त इति। तदर्थं सर्वग्रहणं क्रियत इति प्रयोजनं वक्तव्यम्। इदं च प्रयोजनं ज्ञापकेनापि सिध्यतीत्याह—**न लुट्** इति। 'न लुट्' इति सूत्रेण हि अतिङन्तात्परं लुडन्तं न निहन्यत इत्युच्यते। लुडन्तस्य निघातप्राप्तिश्च 'तिङ्ङतिङः' इति सूत्रेणेति वक्तव्यम्। तेन सूत्रेण आदेरेवानुदात्तत्वं यदि विधीयेत तदा लुडन्तस्य निघातप्रतिषेधो व्यर्थः। आद्युदात्तस्य लुडन्तस्याभावात्। लुडन्ते तासेः परस्य लसार्वधातुकस्यानुदात्तत्वात्तासिरुदात्तः। तत्र कर्तेत्यादौ टिलोपविषये उदात्तनिवृत्तिस्वरेणान्तोदात्तः। कर्तारावित्यादौ मध्योदात्तः। आद्युदात्तस्तु लुडन्तो नास्ति यस्य प्राप्तमनुदात्तत्वं प्रतिषिध्येत। अतो 'न लुट्' इति प्रतिषेधो व्यर्थः सन् ज्ञापयति 'तिङ्ङतिङ' इति सूत्रे आदेः परस्येति नोपतिष्ठते। तथा च पदावयवस्यानादेरपि अनुदात्तत्वं भवतीति। तेन कर्ता कर्तारावित्यादौ अन्तमध्ययोरप्यनुदात्तत्वे प्राप्ते तन्निषेधकतया 'न लुट्' इति सूत्रसार्थक्यम्। अतः सर्वस्येति मास्तु इति भावः।

नन्वेवमप्यादेः परस्येत्यस्याप्रवृत्तावप्यलोन्त्यपरिभाषया अन्त्यस्यैव निघातः स्यादिति तद्वारणार्थं सर्वग्रहणमस्त्वित्यत आह—**गत्यर्थलोटेति**। 'गत्यर्थलोटा' (सू. ८-१-५१) इति सूत्रेण लृडन्तस्य निघातः प्रतिषिध्यते। सर्वं च लृडन्तं लसार्वधातुकानुदात्तत्वेन मध्योदात्तमिति निघातस्य प्राप्त्यभावेन प्रतिषेधोऽनर्थकः सन् अलोऽन्त्यस्येति न प्रवर्तत इति ज्ञापयति। तथा चार्थात् सर्वस्यानुदात्तत्वलाभात् सर्वग्रहणं मास्तु इति भावः। वस्तुतो भोक्ष्ये इति

लङन्तस्यान्तोदात्तस्य सद्भावात् तस्य अलोन्त्यनिघाते प्राप्ते तत्प्रतिषेधार्थतया गत्यर्थलोटा इत्यस्य चरितार्थत्वात् अज्ञापकत्वात् सर्वग्रहणम् आवश्यकमिति भाष्ये स्पष्टम् ॥

[ज्ञा.प.] नलोपः प्रातिपदिकान्तस्य (सू. ८-२-७)॥ अहन्ग्रहणं रूपरात्रिरथन्तरेषूपसंख्यानं वा ज्ञापकं नानन्त्यस्य रुर्भवतीति ।

[वि.] 'नलोपः प्रातिपतिकान्तस्ये'ति सूत्रविहितो नलोपः अहोभ्यामित्यत्रापि प्राप्नोतीत्याशङ्क्य 'अह्नो नलोपप्रतिषेधः' इत्युक्तं वार्तिककृता । ननु प्रतिषेधो न वक्तव्यः । अहन्भ्यामित्यत्र नलोपं बाधित्वा रुत्वप्रवृत्तेर्नलोपाप्राप्तेः । न च नलोपे कर्तव्ये रुत्वस्यासिद्धत्वात् नलोपः प्राप्नोतीति वाच्यम् । अनव काशस्य रोर्नलोपबाधकत्वात् नलोपं प्रति रुत्वस्यासिद्धत्वे हि रुत्वविधानमनर्थकं स्यात् । अहन्शब्दे रुत्वप्रवृत्तिकाले नलोपस्यापि प्राप्तेः नलोपप्राप्त्ययोग्यस्याहन्शब्दस्याभावात् । न च अहन्शब्दे नलोपे सति हकारोत्तराकारस्य रुत्वविधानं अस्तु । तथा चानन्त्यरूपावकाशवान् रुः न नलोपबाधक इति वाच्यम् । यदि 'अहन्' इति सूत्रेण अनन्त्यस्य रुत्वं विधित्सितमभविष्यत् तदा लाघवात् अह इत्येवाऽवदिष्यत् । तथा अनुक्ता नकारसहिततया निर्देशं कुर्वन् ज्ञापयति न अहन्नित्यनेन अनन्त्यस्य रुत्वं विधीयते इति । तथा च तेन अन्त्यस्य नकारस्यैव रुत्वं विधेयम् । तस्यैव नलोपः प्रतिपदिकान्तस्येति लोपोऽपि इति अनवकाशेन रुत्वेन नलोपस्य बाधात् 'अह्नो नलोपप्रतिषेध' इति वार्तिकमनावश्यकमिति भाष्यकारः प्रत्यपादयत् । तदाह—**अहन्ग्रहणमि**ति । ननु अहन्ग्रहणं न ज्ञापकम् , संबुद्धौ हे दीर्घाह्नो अत्र इत्यादौ रुत्वविधायकतया सूत्रसार्थक्यात् । तत्र हि 'न ङिसंबुद्ध्योः' (सू. ८-२-८) इति नलोपो निषिध्यते । तथा च नलोपप्रवृत्त्ययोग्यावकाशवत्त्वात् रुत्वस्य निरवकाशत्वाभावेन नलोपबाधकत्वासंभवात् नलोपे कर्तव्ये 'पूर्वत्रासिद्धम्' इति रुत्वस्यासिद्धत्वात् अहोभ्यामित्यत्र नलोपः प्राप्नुयादिति नलोपप्रतिषेधकं

वार्तिकमावश्यकमेवेत्यरुचेराह—**रूपरात्रिरथन्तरेषूपसंख्यानं** वेति। अयं भावः—रूपरात्रिरथन्तरेषु परतः अहन्शब्दस्य रुत्वं विधीयते। तत्रापि नलोपे सति अनन्त्यस्याकारस्य यदि रुत्वं स्यात् तदा रेफमेव विदध्यात् न रुम्। अतः परस्य हि रोः उत्वम् 'अतो रोरप्लुतात्' (सू. ६-१-११३) इति सूत्रेण विधीयते। अकारस्य तु रुत्वे तस्य ह् इत्यस्मात्परस्य अतः परत्वं नास्तीत्युत्वाप्रवृत्तेः उत्वफलकं रुत्वं न विदध्यात् रेफादेशमेव विदध्यात्। यतः रुत्वं विहितवान् अतो ज्ञापयति नानन्त्यस्य रुर्भवतीति। तथा चान्त्यस्य नस्यैव रुत्वे लोपोऽपि तस्यैवेति अनवकाशेन रुत्वेन नलोपबाधात् अहोरूपमित्यादिसिद्धिरिति स्वांशे चारितार्थ्यम्। ज्ञापनप्रयोजनं तु अहोभ्यामित्यादौ नलोपो न भवत्यपि तु रुत्वमेवेति।

[ज्ञा. प.] 'संज्ञायाम्' 'आसन्दीवत्' (सू. ८-२-११), (८-२-१२)॥ 'ईवत्याः' (सू. ६-१-२२१) इति ज्ञापयति भवत्यहीवत्यादौ वत्वमिति।

[वि.] ननु 'संज्ञायाम्', 'आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्द्रुमण्वच्चर्मण्वती' इत्यनयोः किमेकसूत्रत्वम् उत भिन्नसूत्रत्वम्। यद्येकसूत्रत्वं तदा अत्रापठितानां अहीवती कपीवतीत्यादीनां वत्वं न प्राप्नोति, असंज्ञात्वात्। भिन्नसूत्रत्वे प्रथमसूत्रेण मतोर्मस्य वत्वं, द्वितीयसूत्रेण आसन्दीवदादीनां निपातनं च क्रियत इति वक्तव्यम्। तथा सति इक्षुमती द्रुमती इत्यादावपि प्रथमसूत्रेण वत्वं प्राप्नोति संज्ञात्वात् इत्याशङ्क्य, यथेच्छसि तथास्तु इति भाष्यकार उक्तवान्। तत्र एकसूत्रत्वपक्षे कथं अहीवतीत्यादौ वत्वप्राप्तिः इत्याशङ्क्याह—**ईवत्याः** इत्यादिना। 'ईवत्याः' इति सूत्रेण ईवत्यन्तस्य शब्दस्यान्तोदात्तस्वरो विधीयते। अहीवती मुनीवती इत्युदाहरणम्। यदि अहीवतीत्यादौ वत्वं न भवेत् 'ईवती' इति शब्दस्वरूपस्यैव दुर्लभतता ईवत्या इत्यनुवादः असंगतः स्यात्। तथा च ईवत्या इति निर्देशो ज्ञापयति भवत्येवंजातीयकानां शब्दानां

वत्वमिति। "ननु आसन्दीश्रदाद्यर्थं ईवत्या इति स्यादिति कथं ज्ञापकमेतदिति चेन्न। स्त्रियामेषां प्रयोगाभावादेषामीवतीशब्दान्तत्वाभावादिति" **कैयटग्रन्थो** ऽत्रानुसन्धातव्यः॥

[ज्ञा. प.] नुदविदोन्द (सू. ८-२-५६)॥ ह्रीग्रहणं ज्ञापयति भवत्येतस्माद्विधिरिति।

[वि.] ननु 'नुदविदोन्द्रत्राघ्राह्रीभ्योऽन्यतरस्याम्' इति सूत्रेण किं नुदादिभ्यः परस्य निष्ठातकारस्य नत्वं विकल्पेन विधीयते, उत विकल्पेन प्रतिषिध्यते। किमयं योगः विधिः उत निषेध इति यावत्। तत्र विधिरिति पक्षे नः इति वक्तव्यम्। न च 'रदाभ्यां निष्ठातो नः' इति सूत्रात् (८-२-४२) नः इत्यनुवर्तिष्यत इति वाच्यम्। 'शुषः कः' 'पचो वः' (सू. ८-२-५१,५२) इत्यादिभिः नकारस्य व्यवच्छिन्नत्वात्। प्रतिषेधपक्षे तु नुदादिभ्यो निष्ठातस्य यत् प्राप्नोति तत्र भवतीत्यन्तरेणापि नकारग्रहणं नकारस्य प्रतिषेधः सिध्यति। परं त्वत्र पक्षे ह्रीग्रहणमनर्थकं भवति ह्रीधातोः परस्य निष्ठातस्य नत्वप्राप्त्यभावात्। नुदादीनां त्रयाणां 'रदाभ्यां' इत्यनेन त्रा घ्रा इत्यनयोः 'संयोगादेरातो धातोर्यण्वतः' (सू. ८-२-४३) इत्यनेन प्राप्तेस्तेषां निषेधो युक्तः न तु ह्रीधातोः, अतः कतरः पक्षः आश्रयणीय इत्याशङ्क्य, विधिपक्षं समर्थ्य प्रतिषेधपक्षोऽपि 'अथवा पुनरस्तु प्रतिषेधः' इत्यादिना भाष्ये समाश्रितः। तत्र पक्षे ह्रीग्रहणं ज्ञापनार्थम् 'ह्रीधातोः परस्य निष्ठातस्यापि नत्वं भवतीति'। न ह्यप्रसक्तस्य प्रतिषेधः संभवति इत्याशयवानाह—**ह्रीग्रहणमिति**॥

[ज्ञा. प.] नित्यं समासे (सू. ८-३-४५)॥ अनुत्तरपदस्थस्येति प्रतिषेधो ज्ञापकः भवति वाक्ये विभाषेति।

[वि.] ननु 'नित्यं समासेऽनुत्तरपदस्थस्य' इति सूत्रे अनुत्तरपदस्थस्येत्येतत् परमसर्पिःकुण्डिका इत्यादौ विसर्गस्य षत्ववारणार्थमुपादीयते। तत्रानेन षत्वाभावेऽपि 'इसुसोः सामर्थ्ये' (सू. ८-३-४४) इति सूत्रेण षत्वापत्तिः।

न च तत्र सूत्रे सामर्थ्यपदेन व्यपेक्षालक्षणं सामर्थ्यमेवाश्रीयते, परमसर्पिः-कुण्डिका इत्यादेः समासत्वेन एकार्थीभावलक्षणसामर्थ्यसत्त्वेऽपि व्यपेक्षा-लक्षणसामर्थ्याभावात् न पूर्वसूत्रं प्रवर्तते इति वाच्यम् । सामर्थ्ये इति सामान्यतः श्रवणेन द्विविधस्यापि सामर्थ्यस्य पूर्वसूत्रे ग्रहीतुं शक्यत्वात् । न च तथापि कृत्प्रत्यययो इसुसोर्ग्रहणात् प्रत्ययग्रहणपरिभाषया सर्पिस् इत्यस्य इसन्त-त्वेऽपि परमसर्पिस् इत्यस्य इसन्तत्वाभावेन परमसर्पिःकुण्डिका इत्यत्र पूर्वसूत्रेण षत्वं न भवतीति वाच्यम् । एवं सति 'परमसर्पिष्करोति' इति वाक्येऽपि पूर्वसूत्रेण षत्वविकल्पानुपपत्तेः इत्याशङ्कां मनसि निधायाह— **अनुत्तरपदस्थस्येति प्रतिषेध** इति । अयं भावः—'नित्यं समास' इति सूत्रे इसुसोरित्यनुवर्तते । तत्र यदि इसुसोर्विषये प्रत्ययग्रहणपरिभाषोपतिष्ठेत तदा परमसर्पिःकुण्डिका इत्यत्र परमसर्पिःशब्दस्य इसन्तत्वाभावेनैव षत्वं न भवि-ष्यतीति किमनुत्तरपदस्थस्येत्यनेन । कृतं च तत् इसुसोर्विषये प्रत्ययग्रहण-परिभाषा न प्रवर्तत इति ज्ञापयति । तेन 'इसुसोः सामर्थ्ये' इति पूर्वसूत्रेऽपि तस्याः अप्रवृत्त्या परमसर्पिष्करोति इति वाक्येऽपि षत्वं विकल्पेन सिध्यतीति । भवति वाक्ये विभाषा इत्यस्य प्रत्ययग्रहणपरिभाषायाः अप्रवृत्तिद्वारा इत्यादिः । एवं च परमसर्पिःकुण्डिका इत्यादौ षत्ववारणाय पूर्वसूत्रे व्यपेक्षालक्षणमेव सामर्थ्यमाश्रयणीयमिति तत्त्वम् इति ।

[ज्ञा. प.] आदेशप्रत्यययोः (सू. ८-३-५९) ॥ 'सात्पदाद्योः' (सू. ८-३-१११) इति सात्प्रतिषेधो ज्ञापयति भवति प्रत्ययावयवस्यापि षत्वमिति ।

[वि.] 'आदेशप्रत्यययोः' इति सूत्रे आदेशः प्रत्ययश्च यः सकार इति सामानाधिकरण्येनान्वयपक्षे करिष्यति हरिष्यतीत्यादौ षत्वं न प्राप्नोति, सकारस्य 'स्य' इति प्रत्ययावयवत्वेऽपि प्रत्ययत्वाभावादित्याशङ्क्य, भाष्ये ज्ञापकेन प्रत्य-यावयवस्य सस्य षत्वं साधितम् । तदाह—**सात्पदाद्योरिति** । 'सात्पदाद्योः'

इति सूत्रेण सादवयवस्य पदादेश्च सकारस्य षत्वं प्रतिषिध्यते। तत्र सादवयवस्य सकारस्य प्रत्ययत्वाभावेन 'आदेशप्रत्यययोः' इति षत्वाप्राप्त्या तन्निषेधो व्यर्थः सन् प्रत्ययावयवस्यापि 'आदेशप्रत्ययोः' इत्यनेन षत्वं भवतीति ज्ञापयति। ततश्च सादिति प्रत्ययावयवस्य सस्यापि षत्वप्राप्तौ तन्निषेधफलकं सादग्रहणं सार्थकम्। इत्थं च करिष्यतीत्यादावपि षत्वं सेत्स्यतीति भावः।

तत्रैव आदेशः प्रत्ययस्य च यः सकारः तस्य षत्वमिति व्याख्यानान्तरं प्रदर्शितम्। तत्र पक्षे प्रथमान्तादेशशब्दस्य षष्ठ्यन्तप्रत्ययशब्दस्य च समासो नोपपद्यत इत्याशङ्क्य ज्ञापनात् समर्थनं कृतं भाष्ये। तदाह—

[ज्ञा. प.] 'शासिवसिघसीनां च' (सू. ८-३-६०) इति घसिग्रहणं ज्ञापकं नानाविभक्त्योरेष समास इति।

[वि.] 'शासिवसिघसीनां च' इति सूत्रेण घसेः सकारस्य षत्वं विधीयते। जक्षतुरित्युदाहरणम्। यदि आदेशः प्रत्ययस्य च यः सकार इति न स्यात् तदा आदेशस्य यः सः तस्य षत्वमित्यर्थः स्यात्। तदा घसेः अदधात्वादेशत्वेन तदवयवस्य सस्य आदेशप्रत्ययोरित्यनेनैव षत्वसिद्धेः घसिग्रहणमनर्थकम्। कृतं च तत् आदेशः प्रत्ययावयवश्च यः सकारस्तस्य षत्वमिति सूत्रार्थं ज्ञापयत् नानाविभक्त्योः आदेशप्रत्ययोः समासः न तु समानविभक्तिकयोरिति ज्ञापयति। तथा च घसेः सकारस्य आदेशत्वाभावात् षत्वाप्राप्तौ तत्प्राप्तिफलकं शासिवसीति सूत्रे घसिग्रहणं सार्थकमिति भावः। अत्र प्रत्ययावयवपरप्रत्ययशब्देन आदेशशब्दस्य द्वन्द्वः। तथा च समानविभक्तिकयोरेव समासः। तथापि षष्ठ्यन्तप्रत्ययशब्दार्थलाक्षणिकत्वात्प्रत्ययशब्दस्य व्यधिकरणविभक्तिकत्वोक्तिरित्यवधेयम्। न च घसिग्रहणं आदेशशब्दो नादेशावयवपर इत्यत्रैव ज्ञापकमस्तु नोक्तवचने, अथवा यथाश्रुतादेशशब्दप्रत्ययशब्दयोः समानविभक्तिकयोरेव समास इत्यत्रैव ज्ञापकमस्तु इति वाच्यम्। समानविभक्तिकयोः समासस्य ज्ञापकसाध्यत्वाभावात्। असति बाधके समानविभक्तिकयोः समासः। प्रकृते च करिष्यतीत्यादौ षत्वानुपपत्तेः षष्ठ्यन्तप्रत्ययपदेन समास इति निश्चिते आदेशशब्दस्यापि तत्समान-

विभक्तिकस्यैव समासोऽस्तु इति शङ्कायामुक्तज्ञापकेन आदेशशब्दस्य प्रथमान्तत्वमिति निश्चिते नानाविभक्त्योरेष समास इत्यर्थतः पर्यवसानादिति ।

[ज्ञा. प.] न रपरसृपि (सू. ८-३-११०)॥ सवनादिषु अश्वसनिपाठो ज्ञापयति अनिणन्तादपि षत्वं भवतीति ।

[वि.] ननु 'न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्' इति षत्वनिषेधसूत्रे सवनादिगणे अश्वसनिशब्दपाठो व्यर्थः । न च तत्पाठाभावे तदवयवसकारस्य षत्वापत्तिरिति वाच्यम् । 'पूर्वपदात्' (सू. ८-३-१०६) इति सूत्रेण हि षत्वप्राप्तिर्वक्तव्या । तत्र इण इत्यस्यानुवृत्तेः इणन्तपूर्वपदात्परस्यैव सस्य षत्वं विधीयते । अश्वसनिशब्दे च सकारस्य इणन्तपूर्वपदात्परत्वाभावेन षत्वाप्राप्तेरित्याशङ्क्य ज्ञापकतया तत्पाठसार्थक्यमाह—**सवनादिष्विति ।** तथा च क्वचिदनिणन्तात्परस्यापि षत्वं भवतीति ज्ञाप्यते । तेनाश्वसनिशब्देऽपि षत्वप्राप्तौ तत्प्रतिषेधार्थं सवनादिषु तस्य पाठः क्रियते । ज्ञापनप्रयोजनं तु जलाषाहं माष इत्यादौ षत्वसिद्धिरिति भाष्ये स्पष्टम् ।

[ज्ञा. प.] ष्टुना ष्टुः (सू. ८-४-४१)॥ 'तोः षि' (सू. ८-४-४३) इति प्रतिषेधो ज्ञापयति नेह संख्यातानुदेशो भवतीति ।

[वि.] ननु 'ष्टुना ष्टुः' इति सूत्रे 'यथासंख्यमनुदेशः समानाम्' इति सूत्रेण यथासंख्यमन्वयेन सकारस्य षकारेण योगे षकारः, तवर्गस्य टवर्गेण योगे टवर्गः आदेश इति सूत्रार्थः स्यात् । ततश्च रामष्टीकते पेष्टा इत्यादौ ष्टुत्वं न स्यादित्याशङ्क्याह—**तोः षि इति प्रतिषेध** इति । 'तोः षि' इति सूत्रेण तवर्गस्य षकारे परे ष्टुत्वं निषिध्यते । सन् षष्ठ इत्युदाहरणम् । यदि च 'ष्टुना ष्टु'रिति सूत्रे यथासंख्यमन्वयो भवेत् तदा तवर्गस्य टवर्गेण योग एव तत् सूत्रं प्रवर्तेत न षकारेणेति सन् षष्ठ इत्यादौ टवर्गाप्रवृत्तेः 'तोः षि' इति सूत्रं व्यर्थं भवेत् । कृतं तत् सूत्रं 'ष्टुना ष्टुः' इत्यत्र यथासंख्यान्वयो नेति ज्ञापयति । अतो रामष्टीकत इत्यादिसिद्धिरिति भावः ॥

ज्ञापकसंग्रहपरिशिष्टम् (२)

अत्र भाष्यानारूढान्यपि कैमुद्यां तत्र तत्र पठितानि वचनानि संकलय्य व्याख्यायन्ते ।

[ज्ञा.प.] एओङ्, ऐऔच्॥ ग्लावम्, ग्लावः । 'औतोऽम्शसोः' (सू. ६-१-९३) इतीह न प्रवर्तते । ऐऔच् इति सूत्रेण ओदौतोः सावर्ण्याभावज्ञापनात् ।

[वि.] ननु ग्लौशब्दात् अमि ग्लौ अम् इति स्थिते 'औतोऽम्शसोः' इति सूत्रेण औकार-अकारयोः आकार एकादेशः प्राप्नोति । न च ओकारादम्शसोरचि परे विधीयमानः आकारः औकारात्तयोः परतः कथं प्राप्नुयादिति वाच्यम् । ओदौतोः कण्ठोष्ठरूपस्थानसाम्यात् प्रयत्नसाम्याच्च सवर्णसंज्ञायाम् अणुदित्सूत्रेण ओकारेण औकारस्यापि ग्रहणादित्याशङ्क्याह— **इतीह न प्रवर्तत इति ।** यदि एकार - ऐकारयोः ओकार - औकारयोश्च मिथः सावर्ण्यं भवेत् तदा 'ऐऔच्' इति पृथक्सूत्रं नारभ्येत । आरम्भबलात्तु एदैतोः ओदौतोश्च सावर्ण्यं नास्ति । अतः ग्लौशब्दे औकारे 'औतोऽम्शसोः' इति न प्रवर्तत इति भावः ।

[ज्ञा.प.] तरप्तमपौ घः (सू. १-१-२२)॥ आतिशायनिकप्रकरणे 'तादी घः' 'पितौ घः' इति वा वक्तव्ये प्रकरणान्तरे गुरुसूत्रकरणमत्यन्तस्वार्थिकमपि तरपं ज्ञापयति । तेन 'अल्पाच्तरम्' 'लोपश्च बलवत्तरः' इत्यादि सिद्धम् । अल्पाजेव ह्यल्पाच्तरम्, न त्वत्र द्वयोरेकस्यातिशयविवक्षायां तरप् ।

[वि.] स्पष्टोऽर्थः ।

[ज्ञा. प.] सर्वादीनि (सू. १-१-२७) तदन्तस्यापीयं संज्ञा। 'द्वन्द्वे च' (सू. १-१-३१) इति ज्ञापकात्।

[वि.] ननु 'सर्वादीनि सर्वनामानि' इति सूत्रेणोच्यमाना सर्वनामसंज्ञा तद्गणपठितानां सर्व विश्व इत्यादीनामेव प्राप्नोति। तथा च परमसर्व इति समुदायस्य गणे पाठाभावात् सर्वनामसंज्ञायाः अप्राप्तौ सर्वनामसंज्ञानिमित्तकाः त्रतसिलादयः ततो न प्राप्नुयुः इत्यत आह—**तदन्तस्यापीति।** 'द्वन्द्वे च' इति सूत्रेण हि सर्वनामशब्दान्तसमुदायरूपस्य द्वन्द्वसमासस्य सर्वनामसंज्ञा निषिध्यते वर्णाश्रमेतराणाम् इत्यादौ। तत्र इतरशब्दस्य गणे पाठेऽपि तदन्तस्य गणे पाठाभावादेव सर्वनामसंज्ञाया अप्रसक्तेः प्रतिषेधो निरर्थकः स्यात्। प्रतिषेधमहिम्ना च सर्वाद्यन्तस्यापि सर्वनामसंज्ञा भवतीति ज्ञाप्यते। तेन परमसर्वत्र इत्यत्र त्रल्, परमसर्वतः इत्यत्र तसिल्, परमभवकान् इत्यत्र अकच्च सिध्यतीति भावः। यद्यपि परमसर्वक इत्यत्र अकच् - सिद्धिरपि प्रयोजनतया वक्तुं शक्या, तथापि कप्रत्ययेनेष्टसिद्धिर्भवितुमर्हतीत्याशयेन परमभवकान् इत्यत्र अकच् प्रयोजनत्वेन उक्त इति मन्तव्यम्।

[ज्ञा. प.] समः सर्वपर्यायः। तुल्यपर्यायस्तु नेह गृह्यते। 'यथासंख्यमनुदेशः समानाम्' (सू. १-३-१०) इति ज्ञापकात्।

[वि.] ननु सर्वादिगणे समशब्दः पठितः। तस्य च सर्व इत्यर्थ इव तुल्य इत्यप्यर्थोऽस्ति। तत्र तुल्यवाचकसमशब्दस्यापि सर्वनामसंज्ञा प्राप्नोति, गणे समशब्दस्यार्थविशेषानिर्देशात् इत्याशङ्क्याह—**सम इति।** यदि तुल्यार्थकसमशब्दस्यापि सर्वनामसंज्ञा स्यात् तदा 'समेषाम्' इति तुल्यार्थे निर्देष्टव्यं स्यात्। 'आमि सर्वनाम्नः सुट्' सू. ७-१-५२) इति सुटः प्राप्तेः। तथा अनिर्देशात् तुल्यपर्यायस्य समशब्दस्य सर्वनामसंज्ञा नास्तीति ज्ञाप्यत इति भावः।

[ज्ञा. प.] विभाषा (सू. २-१-११)॥ एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वम्। 'सह सुपा' (सू. २-१-४)

इति तु न नित्यसमासः । 'अव्ययम्' (सू. २-१-६) इत्यादिसमासविधानात् ज्ञापकात् ।

[धि.] ननु 'प्राक्कडारात्समासः' (सू. २-१-३) इत्यत ऊर्ध्वं 'सह सुपा' (सू. २-१-४) इत्यतः प्रागेव 'विभाषा' इत्यधिकारः कुतो न कृतः । समासविधायकसूत्राणि आदौ कानिचिद्विधाय पश्चाद्बहूनि विधास्यन् मध्ये विभाषाधिकारं कुतः करोति ? समासविधानारम्भ एव विभाषाधिकारोऽस्तु इत्याशङ्क्याह — **एतत्सामर्थ्यादिति ।** मध्ये विभाषाधिकारसामर्थ्यादेवेतः प्राचीनानां नित्यसमासत्वं गम्यत इत्यर्थः । यद्यपीतः प्राचीनानां विकल्पे प्रमाणाभावादेव नित्यत्वं सिद्धम् । तथापि तस्यैवार्थस्य लिङ्गेन दृढीकरणमिति मन्तव्यम् । नन्वेवं सति 'सह सुपा' इत्यपि नित्यसमासः स्यात् । ततश्च भूतपूर्व इत्यादौ पूर्वं भूत इति लौकिकविग्रहवाक्यप्रदर्शनमसंगतं स्यादित्यत आह—**सह सुपेतीति ।** यदि 'सह सुपा' इति सूत्रेण सुबन्तस्य सुबन्तेन विधीयमानः समासो नित्यः स्यात् तर्हि 'विभाषा' इत्यतः प्राक्तनैः 'अव्ययं विभक्ति' इत्यादिभिः सूत्रैर्विधीयमानानां नित्यत्वेनाभिमतानां समासानामपि तेनैव सूत्रेण सिद्धेः 'अव्ययं विभक्ति' इत्यादिसमासविधानं व्यर्थं स्यात् । अतस्तद्विधानं 'सह सुपा' इति समासस्य वैकल्पिकत्वं ज्ञापयतीति भावः ।

[ज्ञा. प.] पूर्वसदृश (२-१-३१) ॥ मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम् । 'मिश्रं चानुपसर्गमसन्धौ' (सू. ६-२-१५४) इत्यत्रानुपसर्गग्रहणात् ।

[वि.] ननु गुडेन संमिश्राः गुडसंमिश्रा इत्येवं संमिश्रशब्देन तृतीयान्तस्य तत्पुरुषसमासः साधुर्न स्यात् । 'पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः' इति सूत्रेण मिश्रशब्देनैव तृतीयान्तस्य तत्पुरुषसमासविधानादित्याशङ्क्याह— **मिश्रग्रहणे** इति । 'मिश्रं चानुपसर्गमसन्धौ' इति सूत्रेण तत्पुरुषे तृतीयान्तात्परस्य उपसर्गरहितस्य मिश्रशब्दस्यान्तोदात्तस्वरः उच्यते । तिलमिश्राः इत्यादिक-

मुदाहरणम्। तत्र अनुपसर्गग्रहणाभावे तिलसंमिश्रा इत्यादावपि अन्तोदात्तस्वरः स्यादिति तद्वारणाय अनुपसर्गग्रहणमिति वक्तव्यम्। सोपसर्गेण मिश्रशब्देन समासाभावे तत्पुरुषसमासे विधीयमानस्य स्वरस्याप्राप्तेः किमनुपसर्गग्रहणेन। कृतं च तत् मिश्रग्रहणे सोपसर्गस्यापि ग्रहणमिति ज्ञापयति। तथा च तिलसंमिश्रा इत्यादौ स्वरवारणार्थमनुपसर्गग्रहणमिति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु 'पूर्वसदृश' इत्यादिसूत्रे मिश्रशब्देन संमिश्रशब्दस्यापि ग्रहणात् गुडसंमिश्रा इत्यादौ तृतीयातत्पुरुषस्य साधुत्वमिति।

[ज्ञा. प.] पूर्वापरा (सू. २-२-१)॥ सर्वोऽप्येकदेशोऽह्ना समस्यते। 'संख्याविसाय' (सू. ६-३-११०) इति ज्ञापकात्।

[वि.] ननु 'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे' इति सूत्रेण पूर्वादीनामवयविना सह विधीयमानः समासः मध्याह्नः इत्यादौ न प्राप्नोति। अह्नो मध्य इति विग्रहे अह्नोऽवयवित्वेऽपि अवयविना सह 'पूर्व अपर अधर उत्तर' इत्येतेषां चतुर्णामेव अवयववाचकानां समासविधानात् मध्यशब्दस्य समासाप्राप्तेरित्याशङ्क्याह—**सर्वोऽपीति**। सूत्रनिर्दिष्टपूर्वादिचतुष्टयभिन्नोऽप्यवयववाचकः शब्दः अहन्शब्देन समस्यते। तत्र ज्ञापकं 'संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ' (सू. ६-३-११०) इति सूत्रेण सायपूर्वकस्य अह्नशब्दस्य अहन्नादेशविधानम्। अह्नः सायः अवसानं सायाह्नः इत्यत्र एकदेशस्य सायशब्दस्य पूर्वादिचतुष्टयानन्तर्गतस्य अह्ना समासाभावे अह्नस्य सायपूर्वकत्वासंभवेन सायपूर्वकस्य तस्य अहन्नादेशविधानमसंगतं स्यात्। कृतं च तत् सर्वोऽप्येकदेशोऽह्ना सह समस्यत इति ज्ञापयति। यद्यपि अह्नशब्दस्य सायपूर्वकत्वकथनेन अह्नशब्देन सहैव समासो ज्ञापयितुं शक्यते न त्वहन्शब्देन इत्याशङ्का अवतरति, तथापि सायपूर्वकस्य अह्नशब्दस्य अहन्नादेशे विहिते आदेशस्य अहन्शब्दस्यापि सायपूर्वकत्वमनुमतमेव। तच्च सायस्य अहन्शब्देन समासाभावे न संगच्छत इति तात्पर्यम्। न केवलं सर्वोऽप्येकदेशोऽह्नैव समस्यते

अपि तु कालसामान्येन। ज्ञापकस्य सामान्यापेक्षत्वात्। तेन मध्यरात्रः पश्चिमरात्र इत्यादिप्रयोगाणां साधुत्वं सिध्यतीति पक्षान्तरमपि **कौमुद्यामुपन्यस्तम्**। यद्यपि तस्मिन् पक्षे दिनमध्यः रात्रिमध्य इत्यादि न सिध्येत् तथापि 'ज्ञापकसिद्धं न सर्वत्र' इति परिभाषया समाधेयमित्याहुः **तत्त्वबोधिनीकाराः**।

[ज्ञा.प.] अर्धं नपुंसकम् (सू. २-२-२)॥ अर्धमिति निर्देशादेव नपुंसकत्वे सिद्धे नपुंसकग्रहणं 'सूत्रेषु लिङ्गनिर्देशो न विवक्षितः' इति ज्ञापयितुम्।

[वि.] ननु 'अर्धं नपुंसकम्' इति सूत्रे नपुंसकसहणाभावेऽपि अर्धमिति नपुंसकलिङ्गेन निर्देशादेव लिङ्गान्तरव्यावृत्तिसिद्धेः नपुंसकमिति पदं व्यर्थमित्यत्राह—**अर्धमिति**। तथा च पूर्वोक्तरीत्या व्यर्थं सत् नपुंसकग्रहणं सूत्रेषु लिङ्गनिर्देशो न विवक्षित इति ज्ञापयति। तेन 'तस्येदम्' (सू. ४-३-१२०) इत्यादिसूत्रेषु इदमित्यादिलिङ्गनिर्देशस्याविवक्षिततया तस्यायमित्याद्यर्थेष्वपि सूत्रप्रवृत्तिः सिध्यति। 'सूत्रे लिङ्गवचनमतन्त्रम्' इति एतत्समानार्था परिभाषा।

[ज्ञा.प] पूरणगुण (सू. २-२-११)॥ अनित्योऽयं गुणेन निषेधः। 'तदशिष्यं संज्ञाप्रमाणत्वात्' (सू. १-२-५३) इत्यादिनिर्देशात्।

[वि.] ननु 'अर्थगौरवम् बुद्धिमान्द्यम्' इत्यादयः शब्दाः अर्थस्य गौरवमित्यादिषष्ठीसमासरूपाः शिष्टैः प्रयुज्यन्ते। तेषां साधुत्वं न स्यात्। गौरवमान्द्यादिशब्दानां गुणवाचकत्वेन तैः सह षष्ठ्यन्तस्य समासो न भवतीति 'पूरणगुण' इत्यादिसूत्रेण प्रतिपादनादित्याशङ्क्याह—**अनित्योऽयमिति**। योऽयं गुणेन सह षष्ठ्याः समासनिषेधः स न सार्वत्रिकः। 'संज्ञाप्रमाणत्वात्' इति गुणवाचिना प्रमाणत्वशब्देन षष्ठ्यन्तसंज्ञाशब्दस्य समासेन निर्देशात्। तेन क्वचित् गुणे षष्ठीसमासस्य साधुत्वं ज्ञाप्यत इति अर्थगौरवमित्यादेः साधुत्वसिद्धिरिति भावः।

[ज्ञा. प.] सप्तमीविशेषणे (सू. २-२-३५) ॥ अत एव ज्ञापकात् व्यधिकरणपदोऽपि बहुव्रीहिः ।

ननु 'सच्छास्त्रजन्मा हि विवेकलाभः' इत्यादिः व्यधिकरणपदः बहुव्रीहिः प्रयोगे दृश्यते । सच्छास्त्रात् जन्म यस्येति विग्रहात् । तस्य साधुत्वं कथम् ? 'अनेकमन्यपदार्थे' (सू. २-२-२४) इति सूत्रे समानाधिकरणानां बहुव्रीहिरिति सिद्धान्तितत्वात् इत्यत आह—**अत एव ज्ञापकादिति ।** सप्तम्यन्तस्य बहुव्रीहौ कण्ठेकालः इत्यादौ पूर्वनिपातविधानं ज्ञापयति विभिन्नविभक्तिकपदयोरपि बहुव्रीहिसमासो भवतीति । अतः पूर्वोक्तप्रयोगसाधुत्वमिति भावः ।

[ज्ञा. प.] सप्तमीपञ्चम्यौ (सू. २-३-७) ॥ अधिकशब्देन योगे सप्तमीपञ्चम्यावित्येते । 'तदस्मिन्नधिकम्' (सू. ५-२-४५) इति 'यस्मादधिकम्' (सू. २-३-९) इति च सूत्रनिर्देशात् ।

[वि.] ननु 'लोके लोकाद्वा अधिको हरिः' इत्यादौ अधिकशब्दयोगे पञ्चमीसप्तम्योः विधायकसूत्राभावात् कथं तयोः साधुत्वम् । अवधित्वसंबन्धे षष्ठ्या एवोचितत्वादित्याशङ्क्याह—**अधिकशब्देनेति ।** तथा च सूत्रकारनिर्देशप्रामाण्यादेव तयोः साधुत्वमिति भावः ।

[ज्ञा. प.] कर्मप्रवचनीययुक्ते (सू. २-३-८) ॥ परापि हेतौ तृतीया अनेन बाध्यते । 'लक्षणेत्थंभूत' (सू. १-४-९०) इत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात् ।

[वि.] ननु जपमनु प्रावर्षत् इत्यत्र अनोः 'अनुर्लक्षणे' (सू. १-४-८४) इति सूत्रेण कर्मप्रवचनीयसंज्ञायां 'कर्मप्रवचनीययुक्ते द्वितीया' (सू. २-३-८) इति द्वितीया जपपदोत्तरमिष्यते । तत्र जपस्य लक्षणत्वमिव हेतुत्वमपि वर्तते ।

तथा च परया 'हेतौ' (सू. २-३-२३) इति तृतीयया द्वितीयायाः बाधः स्यादित्याशङ्क्याह—**परापीति**। अहेतौ लक्षणे द्योत्ये 'लक्षणेत्थम्भूत' (सू. १-४-९०) इति सूत्रेणैव कर्मप्रवचनीयसंज्ञायाः सिद्धेः 'अनुर्लक्षणे' इति सूत्रेण हेतुभूते लक्षण एव कर्मप्रवचनीयसंज्ञा विधीयत इति वक्तव्यम्। तत्र च हेतौ तृतीयायां प्राप्तायां सत्यामेव द्वितीयाफलककर्मप्रवचनीयसंज्ञाविधानात् येननाप्राप्तिन्यायेन द्वितीयया तृतीया बाध्यते। अतो न दोष इति भावः।

[ज्ञा. प.] नमःस्वस्ति (सू. २-३-१६)॥ प्रभ्वादियोगे षष्ठ्यपि साधुः। 'तस्मै प्रभवति' (सू. ५-१-१०१) 'स एषां ग्रामणीः' (सू. ५-२-७८) इति निर्देशात्।

[वि.] ननु 'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' इति सूत्रे 'अलमिति पर्याप्त्यर्थग्रहण'मिति वार्तिकोक्तेः पर्याप्त्यर्थकशब्दयोगे चतुर्थ्या एव साधुत्वलाभात् 'प्रभुर्बुभूषुर्भुवनत्रयस्य' इत्यादिषष्ठ्यन्तप्रयोगाणां साधुत्वं कथमित्याशङ्क्याह—**प्रभ्वादियोग इति**। 'स एषां ग्रामणीः' इति निर्देशात् षष्ठ्याः साधुत्वे लब्धे तद्बलादेव अलंशब्दः पर्याप्तीतरार्थकः, तद्योगे च चतुर्थी, पर्याप्त्यर्थकशब्दयोगे न चतुर्थी अपि तु षष्ठ्येवेति प्रसक्तं भ्रमं वारयितुं षष्ठ्यपीत्यपिशब्दः। तथा च 'तस्मै प्रभवति' इति चतुर्थीनिर्देशात् पर्याप्त्यर्थकशब्दयोगे चतुर्थ्याः साधुत्वम् इति भावः।

[ज्ञा. प.] अन्यारात् (सू. २-३-२९)॥ अवयववाचियोगे तु न। 'तस्य परमाम्रेडितम्' (सू. ८-१-२) इति निर्देशात्।

[वि.] ननु 'अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते' इति सूत्रे दिक्छब्दपदेन दिशि दृष्टः शब्दः गृह्यते। तेन कदाचिद्दिग्वाचकत्वेन प्रसिद्धानां पूर्वादीनां सांप्रतं कालवाचिनामपि योगे पञ्चमी भवति। तेन 'चैत्रात्पूर्वः फाल्गुनः' इत्यादि सिद्धमिति व्याख्यानं कृतम्। एवं चेत् अवयववाचि-

योगेऽपि पञ्चमी स्यात्। तथा च पूर्वं कायस्य इत्यत्र पूर्वशब्दस्य शरीरावयववाचकत्वेऽपि अन्यत्र दिग्वाचकत्वात् तद्योगे पञ्चमीप्रसक्त्या षष्ठ्याः साधुत्वं न स्यादित्याशङ्क्याह—**अवयववाचीति**। 'तस्य परमाम्रेडितम्' इति सूत्रे तस्येत्यनेन पूर्वप्रकृतं द्विरुक्तं परामृश्यते। परशब्देन परावयव उच्यते। यदि अवयववाचिना परशब्देन योगेऽपि पञ्चमी स्यात् तदा तस्येति षष्ठीनिर्देशोऽसंगतः स्यात्। तेन च दिशि दृष्टस्य शब्दस्य सांप्रतमवयववचाचित्वे तद्योगे पञ्चमी नेति ज्ञाप्यते। अतः पूर्वं कायस्येत्यादौ न पञ्चम्यापत्तिरिति भावः।

[ज्ञा. प.] 'अपादाने पञ्चमी' (सू. २-३-२८) इति सूत्रे 'कार्तिक्याः प्रभृति' इति भाष्यप्रयोगात् प्रभृत्यर्थयोगे पञ्चमी।

[वि.] नन्वेवमपि 'भवात्प्रभृति आरभ्य वा सेव्यो हरिः' इत्यादौ कथं पञ्चमी, अन्यादिशब्दयोगाभावादित्यत आह—**भाष्यप्रयोगादिति**। तथा हि 'अपादाने पञ्चमी' इति सूत्रे भाष्ये 'यतश्चाध्वकालनिमानम्' इति वार्तिकं पठित्वा 'कार्तिक्याः आग्रहायणी मासे' इत्युदाहृत्य 'इदं न वक्तव्यम्' इति तद्वार्तिकप्रत्याख्यानमुपक्षिप्य 'इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते कार्तिक्याः प्रभृत्याग्रहायणी मासे इति' इत्युक्तम्। प्रभृतिशब्दाभावेऽपि तदर्थसत्तया पञ्चमी सिद्धेत्यर्थः। एवं वदता भाष्यकृता प्रभृत्यर्थकशब्दयोगे पञ्चमीति वचनं ज्ञाप्यते। अन्यथा प्रभृतिपदाभावे पञ्चम्यर्थं वार्तिकस्यावश्यकत्वात्तदसंगतिः स्पष्टैव। एवं च प्रभृतिपदपर्यायशब्दयोगेऽपि पञ्चमी। अत एव 'कार्तिक्याः प्रभृति' इति भाष्यव्याख्यानावसरे 'तत आरभ्येत्यर्थः' इति कैयट आह। तत्र हि तत इति पञ्चम्यास्तसिः इति **बालमनोरमाकाराः** प्राहुः।

[ज्ञा. प.] अपपरिबहिः (सू. २-१-१२) इति समासविधानात् ज्ञापकात् बहिर्योगे पञ्चमी।

[वि.] एवं बहिर्योगे पञ्चमीविधायकसूत्रस्याभावेऽपि ज्ञापकात् पञ्चमी साध्यते। 'अपपरिबहिरञ्चवः पञ्चम्या' इति सूत्रेण पञ्चम्यन्तेन बहिःशब्दस्य

समासविधानं बहिर्योगे पञ्चमीं विना अनुपपद्यमानं पञ्चमीं तद्योगे ज्ञापयति । तेन ग्रामाद्बहिः इत्यादिप्रयोगाणां साधुत्वं सिध्यतीति भावः ।

[ज्ञा. प.] अधीगर्थ (सू. २-२-५२) ॥ **अधिशब्दोच्चारणम् 'इङिकावध्युपसर्गं न व्यभिचरतः' इति ज्ञापनार्थम् ।**

[वि.] ननु 'अधीगर्थ' इति सूत्रे अधिशब्दोच्चारणं मास्तु । इगर्थ इत्यनेनैव स्मरणार्थकधातुलाभादित्यत्राह—**अधीति** । तथा च 'इक् स्मरणे' इति धातुः अधि इत्युपसर्गेण सहैव प्रयोक्तव्य इति ज्ञापनार्थं तदुच्चारणमिति भावः । यद्यपि अत्रत्यमधिशब्दोच्चारणम् इग्धातोरेव अध्युपसर्गाव्यभिचारे ज्ञापकं भवेत् नेङ्धातोः । तथापि यथा 'इङ् अध्ययने' इति धातुः अध्युपसर्गं न व्यभिचरति तथा 'इक् स्मरणे' इति धातुरपीति दृष्टान्तप्रदर्शनार्थम् इङ्धातोरपि वचनशरीरे प्रवेशः । इङः अध्युपसर्गाव्यभिचारे ज्ञापकं तु 'णेरध्ययने वृत्तम्' (सू. ७-२-२६) इत्यत्र अधिशब्दोच्चारणमिति ध्येयम् ।

[ज्ञा. पा.] नन्दिग्रहि (सू. ३-१-१३४) ॥ **पचादिराकृतिगणः । 'शिवशमरिष्टस्य करे' (सू. ४-४-१४३) 'कर्मणि घटोऽठच्' (सू. ५-२-३५) इति सूत्रयोः करोतेर्घटेश्चाच्प्रयोगात् । अच्प्रत्यये परे यङ्लुग्विधानाच्च ।**

[वि.] ननु 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति सूत्रे नन्द्यादिः ग्रह्यादिः पचादिश्चेति गणत्रयं निर्दिष्टम् । तत्र नन्द्यादिग्रह्यादी न आकृतिगणौ । ताभ्यां सह पचादेर्निर्देशात् पचादिरप्याकृतिगणो न स्यादित्याशङ्क्य तस्याकृतिगणत्वं ज्ञापकेन साधयति—**पचादिराकृतिगण** इति । 'शिवशमरिष्टस्य करे' इति सूत्रे करशब्दस्य पचादिगणे अपठितात् कृधातोरच्प्रत्ययेन निष्पन्नस्य, तथा 'घटोऽठच्' इति सूत्रे घटशब्दस्य तत्रापठितात् घटधातोः अच्प्रत्ययेन निष्पन्नस्य च प्रयोगात् पचादेराकृतिगणत्वं ज्ञायते । एवं 'यङोऽचि च' (सू.२-४-७४)

इति सूत्रेण यङन्तादच्प्रत्यये परे यङो लुग्विधीयते। पचादिगणे यङन्तस्य पाठाभावात् ततोऽच्प्रत्ययस्य दुर्लभतया अच्प्रत्यये परे यङो लुग्विधानमसंगतं सत् पचादेराकृतिगणत्वं ज्ञापयतीति भावः।

(ज्ञा. पा.) मतिबुद्धि (सू. २-२-१८८) ॥ अयं न भूते क्तस्य बाधकः। 'तेन' (सू. ४-३-११२) इत्यधिकारे 'उपज्ञाते' (सू. ४-३-११५) इति लिङ्गात्।

[वि.] ननु 'मतिबुद्धिपूजार्थेभ्यश्च' इति सूत्रेण विशिष्य इच्छार्थकेभ्यो धातुभ्यो वर्तमानार्थे क्तप्रत्ययविधानं तदर्थकेभ्यो धातुभ्यः भूतार्थे सामान्येन विहितस्य 'निष्ठा' इति क्तप्रत्ययस्यापवादः स्यात्। ततश्च 'पूजितो यः सुरासुरैः' इत्यादिप्रयोगाणामसाधुता प्रसज्यते। न च तत्रापि वर्तमानार्थक एव क्तः इति वाच्यम्। तथा सति तद्योगे 'क्तस्य च वर्तमाने' (सू. २-२-६७) इति षष्ठ्यापत्त्या तृतीयाया असाधुताप्रसङ्गादित्यत्राह—**अयं नेति**। तेन उपज्ञातमित्यर्थे 'उपज्ञाते' इति सूत्रेण छप्रत्ययो विधीयते पाणिनिना उपज्ञातं पाणिनीयम् इत्युदाहरणम्। तत्र तृतीयासमभिव्याहारमहिम्ना उपज्ञातशब्दस्य भूतार्थकक्तान्तत्वं निश्चितम्। यदि च 'मतिबुद्धि' इति सूत्रविहितः वर्तमानार्थकक्तप्रत्ययः भूतार्थकक्तप्रत्ययस्य बाधकः स्यात् तर्हि 'तेन उपज्ञातम्' इति निर्देशः असंगतः स्यात्। 'उपज्ञा' इत्यस्यापि बुद्ध्यर्थकत्वात्। तथा च बुद्ध्यर्थकधातोः भूते क्तप्रत्ययस्य पाणिनिना निर्देशात् 'मतिबुद्धि' इति सूत्रविहितः क्तप्रत्ययः भूते क्तस्य नापवादः इति सिध्यतीति भावः।

[ज्ञा.प.] यजयाच (सू. ३-३-९०) ॥ प्रश्नः। 'प्रश्ने चासन्न' (सू. ३-२-११७) इति ज्ञापकान्न संप्रसारणम्।

[वि.] ननु प्रच्छधातोः 'यजयाचयतविच्छप्रच्छरक्षो नङ्' इति सूत्रेण नङ्प्रत्यये च्छस्य 'च्छ्वोः शूडनुनासिके च' (सू. ६-४-१९) इति सूत्रेण शकारे प्रश्नः इति रूपमिष्यते। तत्र प्रत्ययस्य ङित्त्वात् तस्मिन् परे धातोः

रेफस्य 'ग्रहिज्यावयि' (सू. ६-१-१६) इत्यादिसूत्रेण संप्रसारणं प्राप्नोतीत्याशङ्क्याह—**प्रश्ने चासन्न इति।** तथा च संप्रसारणमन्तरेण सूत्रकृता निर्देशः अस्मिन् धातौ संप्रसारणाभावं ज्ञापयतीति भावः।

[ज्ञा. प.] स्थागापापचो (सू. ३-३-९५) ॥ अवस्था संस्थेति 'व्यवस्थायाम्' (सू. १-१-३४) इति ज्ञापकात्।

[वि.] ननु 'स्त्रियां क्तिन्' (सू. ३-३-९४) 'स्थागापापचो भावे' इति सूत्रेण स्थाधातोः भावे क्तिन्प्रत्ययो विधीयते। अयं च 'आतश्चोपसर्गे' (सू. ३-३-१०६) इत्यनेन विधीयमानस्य अङोऽपवादः। प्रस्थितिः उपस्थितिः इत्यादीनि रूपाणि। एवं चेत् 'अवस्था' 'संस्था' इत्यादयः अङन्ताः प्रयोगाः कथं साधवः स्युः? इत्याशङ्क्याह—**अवस्था संस्थेति।** एवं च 'व्यवस्थायाम्' इति सौत्रनिर्देशबलात् स्थाधातोः परं भावे स्त्रियाम् अङपि भवतीति ज्ञायत इति भावः।

[ज्ञा.प.] खनो घ च (सू. (३-२-१२५) ॥ धित्करणम् अन्यतोऽप्ययमिति ज्ञापनार्थम्। तेन भजेः भगः पदम्, करणे घः।

[वि.] ननु 'खनो घ च' इति सूत्रेण घप्रत्ययो विधीयते। आखनः इत्युदाहरणम्। तत्र प्रत्यये घकारः इत्संज्ञकः। तस्य च प्रकृते प्रयोजनं नास्ति। धातौ चजोरभावेन 'चजोः कु घिण्ण्यतोः' (सू. ७-३-५२) इति कुत्वस्याप्रसक्तेरित्याशङ्क्य, अत एव धित्करणात् ज्ञापकात् कुत्वयोग्यात् अन्यस्मादपि धातोः घप्रत्ययो भवति। तेन भजधातोः घप्रत्यये जकारस्य कुत्वे च भगः इति शब्दः सिध्यतीत्याह—**धित्करणमिति।**

[ज्ञा. प.] अनुपसर्जनात् (सू. ४-१-१४) ॥ अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति।

ननु बहवः कुरुचराः यस्यां सा बहुकुरुचरा इत्यादौ उपसर्जनेभ्यः कुरुचरादिशब्देभ्यः 'टिड्ढाणञ्' (सू. ४-१-१५) इत्यादिसूत्रेण विधीयमानानां ङीबादिप्रत्ययानां वारणार्थं 'अनुपसर्जनात्' इत्यधिकारः इष्यते। स च व्यर्थः, बहुकुरुचरशब्दस्य टिदन्तत्वाभावादेव ततः ङीपोऽप्रसक्तेः। न च टिदन्तस्य प्रातिपदिकविशेषणत्वात् तदन्तविधौ टिदन्तान्तादपि ङीपः प्राप्तिरस्तीति वाच्यम्। समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधादित्याशङ्क्याह—**अयमेवेति**। उक्तरीत्या व्यर्थः सन्ननुपसर्जनाधिकारः स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति। अतः बहुकुरुचरा इत्यादौ ङीबादिवारणार्थमनुपसर्जनाधिकार इति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनं तु 'वनो र च' (सू. ४-१-७) इत्यादौ वन्नन्तान्तलाभः।

[ज्ञा. प.] स्त्रीपुंसाभ्याम् (सू. ४-१-८७)॥ वत्यर्थे न। 'स्त्री पुंवच्च' इति ज्ञापकात्। स्त्रीवत्। पुंवत्।

[वि.] 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति सूत्रेण 'धान्यानां भवने' (सू. ५-२-१) इत्यतः प्राक्तनेषु अर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः इत्युच्यते। तौ च वत्यर्थे नेष्येते। वत्यर्थस्तु भवनात् प्राक्तनोऽर्थः (सू. ५-१-११५)। तथा च वत्यर्थेऽपि नञ्स्नञौ प्रसज्येयाताम् इत्याशङ्क्याह—**वत्यर्थे नेति**। यदि वत्यर्थेऽपि स्त्रीपुंसाभ्यां नञ्स्नञौ भवेताम् तर्हि पुंवत् इति निर्देशो न युक्तः। विशेषविहितेन स्नञा वतेर्बाधात्। यद्यपि पुंवत् इति निर्देशः पुंशब्दविषय एव ज्ञापकः स्यात् तथापि ज्ञापकस्यात्र सूत्रापेक्षत्वात् स्त्रीपुंसाभ्यां नञ्स्नञौ वत्यर्थे न प्रवर्तेते इत्याश्रीयत इति भावः।

[ज्ञा. प.] लुबविशेषे (सू. ४-२-४)॥ 'विभाषा फाल्गुनी-श्रवणाकार्तिकीचैत्रीभ्यः' (सू. ४-२-२३) इति निर्देशेन पौर्णमास्यामयं लुब्नेति ज्ञाप्यते। तेन पुष्ययुक्ता पौर्णमासी पौषीति सिध्यति।

[वि.] ननु 'नक्षत्रेण युक्तः कालः' (सू. ४-२-३) इति सूत्रेण विहितस्याणः 'लुबविशेषे' इति सूत्रेण षष्टिदण्डात्मककालस्य अवान्तरविशेषो न गम्यते चेत् लुप् भवतीत्युच्यते। अद्य पुष्यः इत्युदाहरणम्। अत्र हि न ह्यः न श्वः इति विशेषे गम्यमानेऽपि अहोरात्रात्मककालावान्तरविशेषस्यानवगमात् लुप् भवति। एवं च पुष्ययुक्ता पौर्णमासी पौषीत्यत्रापि अहोरात्रात्मककालावान्तरविशेषानवगमात् अणः लुप् स्यात् इत्यत आह—**पौर्णमास्यामयं लुब्नेति**। फल्गुन्या युक्ता पौर्णमासीत्यर्थे फाल्गुनी इति लुपं विना निर्देशात् अयं लुप् पौर्णमास्यां नक्षत्रयुक्तायां न प्रवर्तत इति भावः। यद्यपि तत्रैव श्रवणा इति लुपा निर्देशात्कथमेवं ज्ञापयितुं शक्यत इति शङ्का अवतरति तथापि तथा निर्देशात् तत्र परं लुबभावः ज्ञाप्यत इति भावः।

[ज्ञा. प.] न व्यो लिटि (सू. ६-१-४६)। परमपि हलादिशेषं बाधित्वा यस्य संप्रसारणम्, उभयेषां ग्रहणसामर्थ्यात्।

[वि.] ननु 'व्येञ् संवरणे' इति धातोर्लिटि णलि व्ये अ इति स्थिते 'अचो ञ्णिति' (सू. ७-२-११५) इति वृद्धौ व्यैअ इत्यत्र धातोर्द्वित्वे व्यै व्यै अ इति जाते अभ्यासयकारस्य 'लिट्यभ्यासस्योभयेषाम्' (सू.६-१-१७) इति सूत्रेण संप्रसारणे पूर्वरूपे विव्यै अ इति स्थिते आयादेशे विव्याय इति रूपमिष्यते। तत्र सिध्यति। संप्रसारणात् प्राक् परत्वात् हलादिशेषेण यकारस्य निवृत्तौ वकारस्य संप्रसारणे उकारे सति उव्यायेत्यापत्तेरित्याशङ्क्याह—**परमपीति**। 'लिट्यभ्यासस्ये'ति सूत्रे 'वचिस्वपियजादीनाम्' (सू.६-१-१५) इत्यस्य 'ग्रहिज्यावयव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनाम्' (सू. ६-१-१६) इत्यस्य च अनुवृत्त्यैव उभयेषामित्यस्य लाभे सति पुनरुभयेषांग्रहणं पुनर्विधानार्थम्। तथा च वच्यादीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं स्यालिटीति द्विर्विधानं लभ्यते। तत्र द्वितीयं विधानं नियमार्थम्—उभयेषामभ्यासस्य संप्रसारणमेव स्यान्नेतरदिति। तथा च हलादिशेषं बाधित्वा अभ्यासयकारस्य संप्रसारणे विव्यायेति रूपं सिध्यतीति भावः।

[ज्ञा. प.] दीर्घात् (सू. ६-१-७५) ॥ दीर्घस्यायं तुक् न तु छस्य । 'सेनासुराच्छाया' (सू. २-४-२५) इति ज्ञापकात् ।

[वि.] ननु 'दीर्घात्' इति सूत्रे 'छे च' (सू. ६-१-७३) इति सूत्रात् छे इत्यनुवर्तते । पञ्चमीषष्ठ्योरुभयोर्निर्देशस्थले पञ्चमीनिर्देशस्य बलीयस्त्वेन दीर्घात् इत्येषा पञ्चमी छे इति सप्तम्याः षष्ठीं प्रकल्पयेत् । तथा च दीर्घात् परस्य छस्य तुक् इति सूत्रार्थः स्यात् । एवं च चेच्छिद्यते इत्यादौ छकारादनन्तरं तुक् स्यात् न तु दीर्घादनन्तरमित्याशङ्क्याह—**दीर्घस्यायं तुगिति ।** यद्यपि उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्, तथापि अत्र सूत्रे सप्तमीनिर्देशस्य बलवत्त्वमाश्रित्य पञ्चम्याः षष्ठीं स निर्देशः कल्पयतीत्याश्रीयते । तत्र ज्ञापकं तु 'सेनासुराच्छाया' इति पाणिनिनिर्देशः । यदि हि छस्य तुक् स्यात् तर्हि छकारोपरि चकारो निर्दिश्येत । दीर्घादुपरि चकारनिर्देशमहिम्ना तु दीर्घस्यायं तुगिति ज्ञापयतीति भावः । 'सेनासुराच्छाया' इति निर्देशात् दीर्घादिति पञ्चम्यन्तस्य षष्ठ्यन्तत्वज्ञापनद्वारा दीर्घस्यायं तुगिति ज्ञाप्यत इति परमार्थः ।

[ज्ञा. प.] इको यणचि (सू. ६-१-७७) ॥ स्थानित्वेन निमित्तत्वमिको न बाध्यते । 'तस्मादित्युत्तरस्य' (सू. १-१-६७) 'वाग्वृतुपित्रुषसः' (सू. ४-२-३१) इत्यादिनिर्देशात् ज्ञापकात् ।

[वि.] ननु धात्रंश इत्यत्र रेफस्य 'यणो मयो द्वे वाच्ये' इति वार्तिकेन मय इति पञ्चमी यण इति षष्ठीति पक्षे प्राप्तं द्वित्वं 'अचो रहाभ्याम्' (सू. ८-४-४६) इति साक्षाच्छ्रुतेन निमित्तत्वेन कार्यित्वस्य बाधात् यथा वार्यते तथा सुद्युभ्यः इत्यत्रापि उकारस्य 'इको यणचि' इति सूत्रे श्रूयमाणेन स्थानित्वेन निमित्तत्वस्य बाधात् तस्मिन् परत ईकारस्य यणादेशो न स्यादित्यत आह—**स्थानित्वेनेति ।** 'इत्युत्तरस्य' इत्यत्र उकारे परतः इकारस्य यणादेशनिर्देशात्

'पित्रुषसः' इत्यत्र उकारे परे ऋकारस्य यणादेशनिर्देशाच्च ज्ञापकात् स्थानित्वेन निमित्तत्वमिको न बाध्यत इति ज्ञाप्यत इति भावः।

[ज्ञा. प.] संपरिभ्यां करोतौ (सू. ६-१-१३७) ॥ संपूर्वस्य क्वचिदभूषणेऽपि सुट्। 'संस्कृतं भक्षाः' (सू.४-२-१६) इति ज्ञापकात्।

[वि.] संपूर्वस्य परिपूर्वस्य च करोतेः भूषणे संघाते चार्थे सुट्प्रत्ययो विधीयते 'संपरिभ्यां करोतौ भूषणे' 'समवाये च' इति सूत्राभ्याम्। न केवलमुक्तार्थयोरेव सुट्, अर्थान्तरेऽपि अष्टसु कपालेषु संस्कृतः पुरोडाश इत्यादौ सुटः दर्शनात्। तत्समर्थनार्थमाह—**संपूर्वस्येति**। 'संस्कृतं भक्षाः' इति सूत्रे संस्कृतशब्दस्य भोजनाद्युपयोगफलकक्रियाविषयीकृता इत्यर्थः। भ्राष्ट्रे संस्कृताः भ्राष्ट्रा यवा इत्युदाहरणात्। तथा चाभूषणेऽपि सुटो निर्देशात् तत्साधुत्वं ज्ञायत इति भावः।

[ज्ञा. प.] वीरवीर्यौ च (सू. ६-२-१२०) ॥ वीर्यशब्दो यत्प्रत्ययान्तः, तत्र 'यतोऽनावः' (सू. ६-१-२१३) इत्याद्युदात्तत्वं नेति वीर्यग्रहणं ज्ञापकम्। तत्र हि सति पूर्वेणैव सिद्धं स्यात्।

[वि.] ननु सुशब्दात्परयोर्वीरवीर्ययोः बहुव्रीहिसमासे सुवीरः सुवीर्यः इत्यत्र 'वीरवीर्यौ' इति सूत्रेण आद्युदात्तत्वमुपदिश्यते। तत्र वीर्यशब्दस्य आद्युदात्तविधानं व्यर्थम्। तस्य 'यतोऽनावः' इति सूत्रेण आद्युदात्ततया 'आद्युदात्तं द्व्यच् छन्दसि' (सू. ६-२-११९) इति सूत्रेणैव यदाद्युदात्तं द्व्यच् तत्सोरुत्तरं बहुव्रीहावाद्युदात्तमित्यर्थकेन आद्युदात्तत्वसिद्धेरित्याशङ्क्य अत एव वीर्यशब्दे 'यतोऽनावः' इत्याद्युदात्तत्वं न प्रवर्तत इति ज्ञाप्यत इत्याह—**तत्रेत्यादिना। तत्र हि सतीति**। 'यतोऽनावः' इत्याद्युदात्तत्वे सतीत्यर्थः। **पूर्वेणैवेति**। 'आद्युदात्तं द्व्यच् छन्दसि' इति सूत्रेणैवेत्यर्थः।

[ज्ञा. प.] कृत्योकेष्णुच्चार्वादयश्च (सू. ६-२-१६०) ॥ इष्णुज्-ग्रहणे खिष्णुचो द्यनुबन्धकस्यापि ग्रहणम् इकारादेर्विधानसामर्थ्यात् । अनाढ्यंभविष्णुः ।

[वि.] ननु अनाढ्यः आढ्यः भवति आढ्यंभविष्णुः इत्यत्र चूर्ण्यर्थे कर्तर्युपपदे भूधातोः 'कर्तरि भुवः खिष्णुच्खुकञौ' (सू. ३-२-५७) इति सूत्रेण खिष्णुच्प्रत्ययो भवति । तत्र न आढ्यंभविष्णुः अनाढ्यंभविष्णुः इति नञ्समासे 'कृत्योकेष्णुच्चार्वादयश्च' इति सूत्रेण अन्तोदात्तस्वर इष्यते, स न स्यात् । एकानुबन्धकस्य इष्णुच एव तत्र ग्रहणेन द्यनुबन्धकस्य खिष्णुचोऽग्रहणादित्याशङ्क्य, भवतेः खष्णुच्प्रत्ययं विधाय इडागमेनैव इकारादित्वस्य साधयितुं शक्यत्वात् इकारादेः खिष्णुचो विधानं इष्णुच् इत्यनेन खिष्णुचोऽपि ग्रहणार्थमिति ज्ञापयति । अतो न दोष इत्याह—**इष्णुज्ग्रहण इति ।**

[ज्ञा. प.] अप्तृन्तृच् (सू. ६-४-११) ॥ तृ इत्येव सिद्धे तृन्तृचोर्भेदेनोपादानं क्वचित्सामान्योक्तावपि विशेष एव गृह्यत इति ज्ञापनार्थम् ।

[वि.] ननु 'अप्तृन्तृच्' इति सूत्रे 'तृन्तृच्' इत्यनयोः स्थाने तृ इत्येव पठ्यताम् । तृ इत्यनेन सामान्येन तृन्तृचोर्ग्रहणं भविष्यति । यथा 'तुरिष्टेमेयस्सु' (सू. ६-४-१५४) इत्यत्र तृ इत्यनेन तृन्तृचोः सामान्यग्रहणं तद्वत् इत्यत्राह—**तृ इत्येवेति** । तथा च क्वचित् सामान्यनिर्देशेऽपि विशेष एव गृह्यत इति ज्ञापनार्थं तृन्तृचोर्भेदेनोपादानम् । एवं ज्ञापनस्य प्रयोजनं तु 'न कोपधायाः' (सू. ६-३-३७) इति सूत्रे क इति सामान्यतो निर्देशेऽपि तद्धितस्यैव कस्य ग्रहणं न तु कृतः । तेन पाका भार्या यस्य स पाकभार्य इत्यत्र पुंवद्भावप्रतिषेधो न भवति । पाकशब्दो हि कप्रत्ययान्तः उणादिषु निपातितः । तेन 'कोपधप्रतिषेधे तद्धितवृग्रहणम्' इत्येतदुपपन्नं भवति इति ।

अन्ये त्वाहुः—'अप्तृ-' इत्येव वक्तव्ये तृन्तृजिति भेदेनोपादानम् 'अर्वणस्तृ' व्यावृत्तये। यद्यप्यर्थवत्परिभाषया तन्निवृत्तिः सिध्यति, तथापि तस्याः परिभाषाया अनित्यत्वज्ञापनाय तयोः पृथगुपादानम्। तेन 'अनिनस्मन्-ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' इति सिद्धमित्याहुः इति मतान्तरमपि **तत्त्वबोधिन्यां** प्रतिपादितम्।

[ज्ञा. प.] श्नाभ्यस्तयोरातः (सू. ६-४-११२)॥ 'आत औ णलः' इत्यत्र ओ इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृते श्रवणार्थम्। अत एव ज्ञापकादाम् नेत्येके॥

[वि.] दरिद्राधातोर्लिटि 'कास्यनेकाचश्चुलुम्पाद्यर्थम्' इति वार्तिकेन आमि दरिद्रांचकारेति रूपमुक्तं 'कास्प्रत्ययात्' (सू. ३-१-३५) इति सूत्रे भाष्ये। कैयटस्तु आमम् अननुमन्यमानः ददरिद्रौ इत्यादिरूपमेव मन्यते। तथा हि—'आत औ णलः' (सू. ७-१-३४) इत्यत्र प्रथमातिक्रमे कारणाभावात् ओकार एव विधातुमुचितः। ययावित्यादिरूपस्य आ-ओकारयोः 'वृद्धिरेचि' (सू. ६-१-८८) इति वृद्धचैव साधयितुं शक्यत्वात्। तस्मादौकारविधानं दरिद्राधातोर्णलि 'दरिद्रातेरार्धधातुके लोपो वक्तव्यः' इत्यालोपे ददरिद्रौ इत्यौकार-श्रवणार्थं संपद्यते। ओकारविधाने तु आलोपे सति वृद्धेरसंभवात् ददरिद्रो इत्योकार एव श्रूयेतेति। तन्मतमाह—**आत औ णल इत्यत्रेति। अत एवेति।** अस्मादेव दरिद्रातेः औकारश्रवणार्थात् औकारविधानात् दरिद्रातेर्लिटि आम् नेति विज्ञायते। आमि सति णल एवाप्रसक्तेः इति भावः।

[ज्ञा. प.] अष्टाभ्य औश् (सू. ७-१-२१)॥ कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति।

[वि.] 'अष्टाभ्य औश्' इति सूत्रे अष्टा इत्येतत् कृतात्वस्याष्टन्शब्दस्यानुकरणम्। ततश्च कृताकारादष्टन्शब्दात्परयोर्जश्शसोरौश् भवतीति सूत्रार्थः

संपद्यते। तत्र 'अष्टन आ विभक्तौ' इति सूत्रे हलीत्यपकृष्य हलादौ विभक्तौ परत एव आत्वस्य विधानात् जश्शसोः परतः अष्टनः आत्वं न भवतीति कथं कृताकारादष्टन्शब्दात्परत्वं जश्शसोरुच्यत इत्याशङ्क्य, अत एव कृतात्वानुकरणात् ज्ञापकात् जश्शसोरपि आत्वं अनुमीयत इत्याह—**कृतात्वेति**। न च नेदं कृतात्वस्य अनुकरणम्, अपि तु लक्षणवशसंपन्नमिदमिति वाच्यम्। तथा सति अष्टन आत्वस्य वैकल्पिकतया लाघवार्थम् 'अष्टभ्य औश्' इत्येव ब्रूयात् इति भावः।

[ज्ञा. प.] त्रेस्त्रयः (सू. ७-१-५३) ॥ 'णिजां त्रयाणाम्' (सू. ७-४-७५) इति निर्देशादेव त्रयादेशे सिद्धे 'अबाधकान्यपि निपातनानि भवन्ति' इति ज्ञापनार्थमिदं सूत्रम्। तेन पुरातनमिति सिध्यति।

[वि] ननु 'त्रेस्त्रयः' इति सूत्रे त्रय इत्येतददन्तं वा सान्तं वेति संदेहे 'णिजां त्रयाणाम्' इति निर्देशेन अदन्तमिति निर्णयः कार्यः। तथा चेत् तन्निर्देशमहिम्नैव नुट्दीर्घादिबाधनेन त्रयादेशस्यापि सिद्धेः 'त्रेस्त्रयः' इति सूत्रं व्यर्थमित्याशङ्क्य वचनविशेषज्ञापनार्थतया सार्थक्यमाह—**इति निर्देशादेवेति**। तथा च त्रयादेशनिपातनस्याबाधकत्वात् पक्षे त्रीणामित्यपि रूपप्राप्तौ तद्वारणार्थं त्रेस्त्रयः इति सूत्रम्। ज्ञापनफलं तु पुरातनशब्दसिद्धिः। अन्यथा पुराशब्दात् 'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च' (सू. ४-३-२३) इति सूत्रेण प्राप्तौ ट्युट्युलौ तुटं च 'पुराणप्रोक्तेषु' (सू. ४-३-१०५) इति निपातनं बाधेत इति भावः।

[ज्ञा. प.] द्वारादीनां च (सू. ७-३-४) ॥ शौवस्तिकम्। वुञ्छणादिषु ठचश्चित्त्वेन इकादेशोऽन्तरङ्गेभ्यो बलवानिति ज्ञाप्यते।

[वि.] ननु श्वस्शब्दात् 'श्वसस्तुट् च' (सू. ४-३-१५) इति सूत्रेण ठञ्प्रत्यये प्रत्ययसंनियोगशिष्टत्वेनान्तरङ्गत्वात् इकादेशात् पूर्वं तुडागमे ठस्य

प्रत्ययादित्वाभावेन कर्मठ इत्यत्र अठचष्ठकारस्येव इकादेशो न स्यात्। 'ठस्येकः' (सू. ७-३-५०) इति सूत्रे अङ्गात्परस्य ठकारस्यैवेकादेशविधानात् इत्याशङ्क्याह—**वुञ्छणादिष्विति**। 'वुञ्छण्' (सू. ४-२-८०) इत्यादिसूत्रे ठचश्चित्करणं हि अन्तोदात्तत्वार्थम्। तत्र चित्करणाभावेऽपि इकादेशात्पूर्वमेवान्तरङ्गत्वात् 'आद्युदात्तश्च' (सू. ३-१-३) इति ठस्य अकारस्योदात्तत्वे पश्चादिकादेशे अन्तोदात्तत्वसिद्धेः किं चित्करणेन ? तत् क्रियमाणम् 'इकादेशोऽन्तरङ्गेभ्यो बलवा'निति ज्ञापयति। तथा च प्रथमतः इकादेशानन्तरं 'आद्युदात्तश्च' इति स्वरप्रवृत्तौ इकार एवोदात्तः स्यात् न त्वन्त उदात्त इति चित्करणं इति स्वांशे चारितार्थ्यम्। प्रयोजनं तु शौवस्तिकम् इत्यादौ अन्तरङ्गात्तुडागमात्पूर्वमेव इकादेशस्य प्रवृत्त्या इष्टरूपसिद्धिरिति। अत्र ठचश्चित्त्वेनेत्युपलक्षणम्, ठचश्चित्त्वं सामान्यापेक्षं ज्ञापकम् 'प्रत्ययसंबन्ध्यादेशा अन्तरङ्गेभ्यो बलवन्तः' इति इत्यादिकं **शब्दरत्ने** स्पष्टम्।

[ज्ञा. प.] यजयाच (सू. ७-३-६६) ॥ अर्च्यम्। ऋदुपधत्वेऽप्यत एव ज्ञापकात् ण्यत्।

[वि.] ननु 'ऋच्' धातोः 'ऋहलोर्ण्यत्' (सू. ३-१-१२४) इति सूत्रेण ण्यत्प्रत्यये 'चजोः कु' (सू. ७-३-५२) इति सूत्रप्राप्तस्य कुत्वस्य 'यजयाचरुचप्रवचर्चश्च' इति सूत्रेण निषेधे उपधागुणे च अर्च्यम् इति रूपमिष्यते। तन्न सिध्यति। 'ऋदुपधाच्चाकृपिचितेः' (सू. ३-१-११०) इति सूत्रेण ण्यदपवादस्य ऋदुपधत्वलक्षणस्य क्यप एव प्राप्तेरित्याशङ्क्याह—**ऋदुपधत्वेऽपीति**। ण्ये परतः उच्यमानः ऋचः कुत्वनिषेधः ण्यत्प्रत्ययाभावे न संगच्छत इति ऋचः ण्यदेव भवति न तु क्यबिति कुत्वनिषेधेन ज्ञाप्यत इति भावः।

[ज्ञा. प.] अत्रानुनासिकः (सू. ८-३-२) ॥ वाग्रहणं स्पष्टार्थम्। 'अनुनासिकात्परः' (सू. ८-३-४) इति ज्ञापकादेव सिद्धेः।

[वि.] ननु 'अत्रानुनासिकः पूर्वस्य तु वा' इति सूत्रे वाग्रहणं मास्तु। तदभावेऽपि 'अनुनासिकात्परोऽनुस्वारः' इति सूत्रे अनुनासिकात् इत्यस्य ल्यब्लोपे पञ्चमीमाश्रित्य अनुनासिकं विहाय इति व्याख्यानात् अनुनासिकाभावपक्षे इति च तदर्थात् अनुनासिकस्य वैकल्पिकत्वाभावे अनुनासिकाभावपक्षस्यासंभवादेव तद्वैकल्पिकत्वस्य सिद्धेरित्यत्राह—**वाग्रहणं स्पष्टार्थमिति**। इदमेव ध्वनयितुं वृत्तौ तुवेति शब्दावनुक्त्वा रोः पूर्वस्यानुनासिकः स्यादित्येवोक्तम्।

[ज्ञा. प.] खरवसानयोः (सू. ८-३-१५)॥ अन्तवद्भावेन पदान्तरेफस्य न विसर्गः। 'उभयथर्क्षु' (सू. ८-३-८) 'कर्तरि चर्षिदेवतयोः' (सू. ३-२-१८६) इत्यादिनिर्देशात्।

[वि.] ननु प्र+ऋच्छति इत्यादौ 'उपसर्गादृति धातौ' (सू. ६-१-९१) इति सूत्रेण वृद्धौ प्रार्छति इति स्थिते आर् इत्येकादेशस्य पूर्वान्तवद्भावेन रेफस्य पदान्तत्वात् 'खरवसानयोर्विसर्जनीयः' (सू. ८-३-१५) इति सूत्रेण विसर्गः प्राप्नोति इत्याशङ्क्याह—**अन्तवद्भावेनेति**। अन्तवद्भावेन पदान्तत्वं प्रापितस्य रेफस्य विसर्गो न भवति। 'उभयथर्क्षु' 'चर्षिदेवतयोः' इति निर्देशात्। उभयथा+ऋक्षु इति स्थिते 'आदृगुणः' (सू. ६-१-८७) इति गुणे उभयथर्क्षु इति भवति। अत्राप्येकादेशस्य अर् इत्यस्य पूर्वान्तवद्भावेन रेफस्य पदान्तत्वात् विसर्गे 'उभयथःक्षु' इत्येव निर्देष्टव्यं स्यात्। यतस्तथा न निर्दिष्टम् तेन अन्तवद्भावेन पदान्तरेफस्य न विसर्ग इति ज्ञाप्यत इति भावः।

[ज्ञा. प] द्विस्त्रिश्चतुः (सू. ८-३-४३)॥ कृत्वोऽर्थग्रहणं तु साहचर्यं न सर्वत्र व्यवस्थापकमित्यत्र ज्ञापकम्। तेन 'दीधीवेवीटाम्' (सू. १-१-६) इत्यत्र धातुसाहचर्येऽप्यागमस्येटो ग्रहणम्।

[वि.] ननु द्वित्रिभ्यां सुजन्ताभ्यां साहचर्याच्चतुःशब्दस्यापि सुजन्तस्यैव ग्रहणमिति त्रयाणां कृत्वोऽर्थे वर्तमानत्वस्य लाभात् 'द्वित्रिभ्यश्चतुरिति कृत्वोऽर्थे' इति सूत्रे कृत्वोऽर्थग्रहणं व्यर्थमित्यत आह—**कृत्वोऽर्थग्रहणं त्विति**। तथा च साहचर्यस्य सर्वत्र व्यवस्थापकत्वाभावात् चतुरशब्देन असुजन्तस्यापि ग्रहणं मा भूदिति कृत्वोऽर्थग्रहणं कृतमिति स्वांशे चारितार्थ्यम्। अन्यत्र प्रयोजनमाह—**तेनेति**। धातुभ्यां दीधीवेवीभ्यां साहचर्यात् इट् इत्यनेन भौवादिकस्य गत्यर्थकस्य धातोर्ग्रहणे प्राप्ते साहचर्यं न सर्वत्र व्यवस्थापकमित्याश्रयणात् आगमस्यैव इटः ग्रहणं 'दीधीवेवीटाम्' इति सूत्रे इति भावः।

[ज्ञा. प.] चिति स्मृत्याम्। चिन्तेति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिङ्गम्। तेन चिन्त्यात् चिन्त्यते इत्यादौ नलोपो न। एतच्च ज्ञापकं सामान्यापेक्षमित्येके। विशेषापेक्षमित्यपरे।

[वि.] ननु चुरादौ स्मृत्यर्थकः चितिधातुः इदित्त्वेन पठ्यते। तस्य इदित्करणं मास्तु। प्रक्रियालाघवाय 'चिन्त स्मृत्याम्' इत्येव पठ्यताम्। न च नलोपनिवृत्त्यर्थम् इदित्करणमिति वाच्यम्। चिन्तयति चिन्तयांचकार इत्यादौ णिचः क्ङित्त्वाभावादेव नलोपस्याप्रसक्तेः। न च णिजभावे आशीर्लिङि चिन्त्यादित्यत्र, कर्मलकारे यकि चिन्त्यते इत्यत्र च नलोपनिवृत्त्यर्थमिदित्त्वमिति शङ्क्यम्। चुर दिणिचः नित्यत्वेन णिचं विना केवलात् चिन्त्यात् चिन्त्यत इति प्रयोगस्य शशशृङ्गायमाणत्वादित्यत आह—**चिन्तेत्यादि। तेनेति**। पाक्षिकत्वेनेत्यर्थः। तथा च कदाचित् चिन्त्यात् चिन्त्यते इति प्रयोगस्य सत्त्वात् तत्र नलोपनिवृत्त्यर्थमिदित्करणमिति भावः। ज्ञापकमिदं चिन्तधातौ यत्र नलोपप्रसक्तिः तन्मात्रविषयकमिति न, किं तु चिन्तधातुसामान्यविषयम्, अत एव चिन्तति चिन्तेत् इति णिजरहितप्रयोगस्य साधुता। अथवा चुरादित्वसामान्यापेक्षम्। अत एव वृत्तिकृता जगाण जगणतुरित्युदाहृतम् 'अत एकहल्' (सू. ६-४-१२०) इति सूत्रे इत्याशयेनाह—**एतच्च ज्ञापकमिति**।

केचित्तु चितिधातुमात्रविषयकं णिज्विकल्पज्ञापनम्, न चुरादिधातुसामान्यविषयकम्। अन्यथा सर्वस्य चुरादेः णिज्विकल्पे सति 'आधृषाद्वा' (ग. सू.) इति कतिपयचुराद्यन्तर्गणपठितानां णिज्विकल्पविधिवैयर्थ्यं स्यादिति मन्यन्ते। तन्मतमाह—**विशेषापेक्षमित्यपरे इति**। इयं **बालमनोरमा**संमता व्याख्या।

अनयोर्मतयोः विशेषापेक्षं ज्ञापकमिति मतमेव युक्तम्। न च तथा सति जगाण जगणतुरिति वृत्तिप्रयोगः कथं संगच्छतामिति वाच्यम्। भ्वादेराकृतिगणत्वात् तत्रत्यधातोस्तत्सिद्धेः। सामान्यापेक्षज्ञापकत्वपक्षे 'आधृषाद्वा' इति सूत्रसार्थक्याय ज्ञापकसिद्ध्यासार्वत्रिकत्वमाश्रित्य आधृषीयाणामेवैच्छिको विकल्पः अन्येषां तु शिष्टप्रयोगाद्व्यवस्थित इत्यादिकं कल्पनीयमिति क्लेशो वर्तत इति **तत्त्वबोधिनीकाराः** निरूपयन्ति।

[ज्ञा. प.] एषिषति। इह नित्यमपि द्वित्वं गुणेन बाध्यते। उपधाकार्यं हि द्वित्वात् प्रबलम्। ओणेर्ऋदित्करणस्य सामान्यापेक्षज्ञापकत्वात्।

[वि.] ननु इषधातोः सनि इटि हलादित्वाभावेन कित्त्वाभावाद्गुणे एष् इस इति स्थिते 'अजादेर्द्वितीयस्य' इति षिस् इत्यस्य द्वित्वे हलादिशेषे सनः षत्वे च एषिषिषति इति रूपमिष्यते। तन्न सिध्यति। द्वित्वस्य गुणे कृते अकृते च प्राप्त्या नित्यत्वेन गुणं बाधित्वा आदौ द्वित्वे कृते धात्ववयवस्य इकारस्य उपधात्वाभावेन गुणाप्राप्तेः इत्याशङ्क्याह—**इह नित्यमपीति**। द्वित्वापेक्षया उपधाकार्यस्य प्रबलत्वात् आदौ उपधागुणः तदनन्तरमेव द्वित्वम्। अतो न दोषः। द्वित्वादुपधाकार्यस्य प्रबलत्वे ओणेः ऋदित्करणं ज्ञापकम्। तथा हि—ओणृधातोर्ण्यन्ताल्लुङि चङि 'णौ चङ्युपधाया ह्रस्वः' (सू. ७-४-१) इति ह्रस्वस्य 'नाग्लोपिशास्वृदिताम्' (सू. ७-४-२) इति निषेधे सति ओणि अत् इति स्थिते णि इत्यस्य द्वित्वे मा भवान् ओणिणत्

इति रूपम्। अत्र उपधाह्रस्वनिषेधार्थम् ओणेर्ऋदित्करणम्। उपधाह्रस्वे कृते तु उण् इ अत् इति स्थिते णि इत्यस्य द्वित्वे मा भवानुणिणत् इति स्यात्। ओकारो न श्रूयेत इति स्थितिः। यदि तु नित्यत्वात् उपधाह्रस्वात् प्रागेव ओण् इ अत् इत्यस्यां दशायां द्वित्वं स्यात् तदा ओकारस्योपधात्वाभावादेव ह्रस्वाप्रसक्तेस्तन्निषेधार्थं क्रियमाणमृदित्त्वं व्यर्थं स्यात्। तस्मादुपधाह्रस्वात्मकमुपधाकार्यं द्वित्वात् प्रबलमिति विज्ञायते। ननूक्तज्ञापकादुपधाह्रस्वस्य द्वित्वात्प्रबलत्वे लब्धेऽपि उपधागुणस्य कथं द्वित्वात्प्रबलता लभ्यत इत्यत्राह—**सामान्यापेक्षेति।**

वचनानि न दृब्धानि यानि ज्ञापकसंग्रहे।
भाष्यादृतानि तान्यत्र प्रथमे परिशिष्टके॥

अष्टाध्यायीक्रमेणैव नागेशादृतवर्त्मना।
विवृत्या स्विकया साकं समगृह्णां यथामति॥

नसन्दृष्टानि भाष्यादौ वचनान्यपि कानिचित्।
साधितानि ज्ञापकेन कौमुद्यां दीक्षितोत्तमैः॥

शब्दसाधुत्वविषये तेषामप्युपयोगिताम्।
अकार्षं संग्रहं पश्यन् द्वितीये परिशिष्टके॥

इति द्वितीयं ज्ञापकसंग्रहपरिशिष्टम्

—o—

ज्ञापकसिद्धवचनसूची

वचनम्	पृष्ठसंख्या
अ इति प्रतिषेधार्थकमव्ययमप्रामाणिकम्	२६
अकारः प्रक्रियादशायां विवृतः	१
अग्वतां लोपोऽप्यग्लोपः	१२६
अङ्गविशेषणमेतत्	१९२
अचामादिवृद्धावन्त्योपधावृद्धिर्न	१८९
अचूतद्याप्यप्रत्याहारेष्वितां न ग्रहणम्	६
अण् पूर्वेण न परेण	८
अत्यन्तापरदृष्टाः परभूता लुप्यन्ते	१५८
अधिकशब्दयोगे सप्तमीपञ्चम्यौ	२०७
अनन्तोदात्तादपि भवति	१६४
अनन्त्यस्याप्यनुदात्तत्वम्	१९५
अनयोर्योगयोर्निवृत्तं सुप् सुपा	१५२
अनर्थकानामपि निपातानामर्थवत्कृतम्	४९
अनादेरप्यनुदात्तत्वं भवति	१९४
अनिणन्तादपि षत्वम्	२०१
अनित्योऽयं गुणेन निषेधः	२०६
अनुबन्धलक्षणे स्वरे प्रत्ययलक्षणं न	१०६
अनुवर्तते विभाषा	६
अन्त इतीह न संबध्यते	१००
अन्तवद्भावेन पदान्तरेफस्य न विसर्गः	२२१
अन्यत्प्रमाणमन्यत्परिमाणम्	१७०
अन्यत्र ग्रामग्रहणे नगरग्रहणं न	१२१
अन्यत्र ण्यधिकस्य कुत्वं भवति	१२४
अन्यत्र धातुग्रहणे तदादिविधिः	१०९
अन्यत्र प्राग्ग्रहणे भरतग्रहणं न	१५७
अन्यत्र श्नन्ग्रहणे तदादिग्रहणम्	१२०
अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं न	६६
अन्येभ्योऽप्ययम् (आरक्)	८०
अन्येभ्योऽप्ययम् (अलुच्)	१६०
अन्येभ्योऽप्ययम् (यन्)	१६५
अपूर्वग्रहणं जातुविशेषणं न तिङन्तस्य	१३१
अभ्यर्हितं पूर्वम्	८६
अभ्यासादेशः सिद्ध एत्वे	११२
अर्थनियमः प्रत्ययनियमश्च	४७
अर्थेष्वयम् (अण्)	७७
अस्विधौ स्थानिवद्भावो न	१४०

वचनम्	पृष्ठसंख्या
अवयववाचियोगे तु न	२०८
अव्ययेभ्य औत्सर्गिकमेकवचनम्	४८
अव्ययेभ्यः सुपो भवन्ति	४८
अष्टन आकारान्तस्य षट्संज्ञा भवति	२०
अष्टनो जश्शसोरात्वम्	२१८
अस्ति च पाठो बाह्यश्च सूत्रात्	४३
अस्त्यन्यः कर्तुस्तुमुनोऽर्थः	१६२
अस्त्यन्यदूपात्त्वं शब्दस्य	१४४
आगमा अनुदात्ताः	६०
आगमा अविद्यमानवत्	६०
आयन्नादय उपदेशावस्थायां भवन्ति	११७
इकादेशोऽन्तरङ्गेभ्यो बलवान्	२१९
इङिकावध्युपसर्गं न व्यभिचरतः	२१०
इण् परेणैव	१२
इत उत्तरं समावेशो भवति	१६२
इदं काण्डम् 'उदात्तादनुदात्तस्य' इत्यतः परम्	३७
इवशब्देन योगे सप्तमी भवति	९१
उत्तरपदस्यान्तोदात्तत्वं न भवति	१८२
उत्तरपदाधिकारे प्रत्ययग्रहणे रूपग्रहणम्	१०८
उत्पद्यते द्विगोस्तद्धितः	५६
उत्पद्यन्ते दिव्शब्दात्स्वादयः	१४७
उपधालक्षणस्यापि गुणस्य प्रतिषेधोऽयम्	१४
उत्पद्यन्ते ऊङन्तात्स्वादयः	३९
ऋदुपधत्वेऽपि ण्यत्	२२०
ऋवर्णान्नस्य णत्वम्	५
एकादिकायाः संख्यायाः संख्या-प्रदेशेषु ग्रहणम्	२०
एकादेशनिमित्तात्परस्य न षत्वम्	२६
एकादेशात् प्लुतो भवति विप्रतिषेधेन	१७६
एदैतोरोदौतोश्च न सावर्ण्यम्	२०२
औपदेशिकस्य कित्त्वस्य प्रतिषेधो नातिदेशिकस्य	१४४
कर्मकर्तरि यग्भवति	१५९
कर्मसंज्ञायां कर्तृसंज्ञा न	१४९
कारकसंज्ञायां तरतमयोगो न	१५१
कालपरिमाणानां परिमाणग्रहणेन ग्रहणं न	१२२
किमिदंभ्यां वतुप्	९१
क्यजाद्यन्ताः क्रियावचनाः	६१
क्रियार्थायां क्रियायां वासरूपेण तृजादयो न	७२

वचनम्	पृष्ठसंख्या
क्वचित्सामान्योक्तावपि विशेष एव गृह्यते	२१७
क्वचिदेकयोगेऽप्यनुवृत्तिः	८३
खित्यनन्तरस्य न	१०८
ङिदादेशानां ङित्कार्यं न	१६
चरेष्टः अधिकरण एव, न कर्मणि	६६
चित्रगुरित्यादौ न णित्त्वात्त्वे	३०
चेन कृतोऽर्थश्चार्थः	१५४
णिचः पाक्षिकत्वम्	२२२
णौ स्थानिवद्भावो भवति	३२
तत्र सिद्धं तद्भवति व्यञ्जनादेर्व्यञ्जनान्ताच्चेति	१८१
तदन्तस्यापि सर्वनामसंज्ञा	२०३
तदेकदेशभूतं तदग्रहणेन गृह्यते	३५
तद्धिते तत्वं न भवति	११५
तरप् अत्यन्तस्वार्थिकोऽपि	२०२
ताच्छीलिकास्ताच्छीलिकेषु वासरूपेण न	७०
ताच्छीलिकेषु सर्व एव तृजादयो वासरूपेण न	६९
तातङ् सर्वादेशः	२८
तादर्थ्ये चतुर्थी समस्यते न चतुर्थीमात्रम्	५४
तिसृचतसृभ्यां ङीप् न	२४
तुल्यपर्यायस्तु नेह गृह्यते	२०३
दीर्घस्यायं तुक् न तु ह्रस्य	२१५
द्विर्वचनाद्धस्वत्वं बलीयः	१२४
न कर्मादिविशिष्टे प्रथमा भवति	१५६
न कृत्स्वरो हारिस्वरं बाधते	१८१
न गुणाभिनिर्वृत्तस्य वृद्धिर्भवति	१९०
न चौ प्रत्यङ्गं भवति	१८४
न जश्शसोः परूपं भवति	१७५
न तद्विशेषेभ्यो भवति	१९
न तिङन्तादणादयो भवन्ति	१५९
नदीपौर्णमासीत्यत्र न नदीसंज्ञकग्रहणम्	१८
न दीर्घे ह्रस्वलक्षणो विधिः	१३५
न दीर्घे ह्रस्वाश्रयो विधिः	१३४
न द्विमात्रोऽन्ते भवति	१४६
न धातुप्रत्ययानामायन्तादयः	१८५
न धातुमात्रात् क्यप्	१५८
न निपातनस्वरो विभक्तिस्वरं बाधते	१७९
न परनिमित्तकस्यात्वं भवति	१७४
न पर्यायो भवति	१७७
न प्रत्ययलक्षणेनाव्ययसंज्ञा	२४
न प्रत्ययस्योवङादेशः	१४६
न मात्रिकोऽन्ते भवति	१४५

वचनम्	पृष्ठसंख्या
न मात्रिको मध्ये भवति	१४६
न युगपत्स्वरो भवति	१७७
न रादेशो नुटं बाधते	१८६
नर्छेर्लिटयाम् भवति	१५९
न लुप्तविकरणेभ्योऽनुदात्तत्वम्	१८०
न वत्यर्थे नञ्स्नञौ	१६९
न विभक्तौ तद्धिते प्रतिषेधः	४३
न वेञ्ग्रहणाद्वये: संप्रसारण-प्रतिषेधः	१७३
न संबुद्धिलोपे स्थानिवद्भावः	१४१
नाकारस्थस्याकारस्य लोपः	१३५
नाकारस्य गुणः	१३६
नाण्विषये घादयः	१६७
नातस्तद्धितोत्पत्तिः	१६३
नात्र तदन्तविधिः	८१
नात्र लुग्भवति	१७०
नानन्त्यस्य रुः	१९६
नानाधिकरणवाचिबहुशब्दस्य ग्रहणम्	४६
नानाविभक्त्योरेष समासः	२००
नानेन शपोऽकारस्य लोपः	१८४
नानेन संप्रसारणस्य दीर्घः	१३३
नान्तेवास्यन्तेवासिभ्यो भवति	१६८
नान्त्यस्य परूपं भवति	१४३
नापवादे उत्सर्गकृतम्	२९
नापवादविषयेऽण्	७७
नापो नदीसंज्ञा	१९१
नायादय आत्वं बाधन्ते	१७४
नाव्यपवृक्तस्यावयवस्य तद्विधिः	४
नाहेरीड् भवति	२९
नित्यमपि द्वित्वं गुणेन बाध्यते	२२३
निष्पूर्वाच्चिनोतेस्थाथादिस्वरो न	७२
नेयं विभाषा उग्लक्षणस्य प्रतिषेधस्य विषये	१८८
नेह संख्यातानुदेशो भवति	२०१
नैवंजातीयकानामिदिद्विधिः	१४७
नैवंजातीयकानामेत्वं भवति	११४
नोदात्तनिवृत्तिस्वरः शुन्यवतरति	१४९
नोभे युगपत्प्रकल्पिके भवतः	३४
पचादिराकृतिगणः	२१०
पदस्येत्पत्रावयवषष्ठ्यपि	१९३
पदार्थः कृत्स्नः सद्रव्यः सलिङ्गः ससंख्यश्च	५८
परस्मैपदविषये आत्मनेपदं न भवति	१४९
परस्य संप्रसारणं न पूर्वस्य	९७
परात्र निष्ठा भवति	१५५
पर्श्वादिभ्यो लुग्भवति	८१

वचनम्	पृष्ठसंख्या
पितृष्वसृढक् भवति	१६५
पुरुषसंज्ञा परस्मैपदसंज्ञां न बाधते	५०
पूर्वं गणपाठः पश्चात्सूत्रपाठः	२२
पूर्वत्र तदन्तविधेः प्रतिषेधो न	९०
पूर्वनिवृत्तौ व्यञ्जनस्यानिवृत्तिः	१७२
पूर्वश्च वुञ् परमञं बाधते	१६६
पूर्वादीनां द्यादिपर्युदासेन पर्युदासो न	२३
पौर्णमास्यामयं लुप् न	२१३
प्रगृह्यसंज्ञायां प्रत्ययलक्षणं न	१३७
प्रत्ययलक्षणेन भसंज्ञा न	१४२
प्रत्ययलक्षणेनाप्रत्यय इति निषेधो न	४०
प्रत्ययाश्रयोऽपीट्प्रतिषेधो नियम्यते	११८
प्रधानस्य सापेक्षस्यापि वृत्तिर्भवति	५७
प्रभृत्यर्थयोगे पञ्चमी	२०९
प्रभ्वादियोगे षष्ठ्यपि	२०८
प्रश्ने न संप्रसारणम्	२११
प्रागमुतः समावेशः	१६२
प्रागेतस्माद्योगाद्विभाषानुवर्तते	९५
प्राङ् ण्वुलः कृत्यसंज्ञा	१६०
बहिर्योगे पञ्चमी	२०९
बहूनामपि समासः	१५३
ब्रिदादिषु येऽनृषयः तेषामनन्तरेऽपि वृत्तिः	८०
भवत एतेभ्योऽगुणवचनेभ्योऽप्यजादी	९५
भवति तादर्थ्ये चतुर्थी	१५५
भवति प्रत्ययावयवस्यापि षत्वम्	१९९
भवति बहुगणादीनां संख्याकार्यम्	१३७
भवति लुकि प्रत्ययलक्षणम्	३३, १४२
भवति वाक्ये विभाषा	१९८
भवति संयोगाव्यवहितानामित्वम्	१९३
भवतीह कश्चिदन्योऽपि प्रकारः प्रत्ययलक्षणं नाम	१८६
भवतीह तदन्तविधिः	७६
भवतीह तदन्तविधिः	१६६
भवतीह तदन्तविधिः	९२
भवत्यघशब्दाच्छन्दसि परेच्छायां क्यच्	६१
भवत्यत्र थमुः	१७१
भवत्यत्र समासः	१८३
भवत्यनद्यतने लुट्	१६१
भवत्यर्थशब्दयोगे चतुर्थी	१५५
भवत्यव्ययीभावाल्लुक्	१३८
भवत्यहीवत्यादौ वत्वम्	१९७
भवत्यात्वे कृते षट्संज्ञा	१०१
भवत्याभीयेष्वसिद्धेष्वपि विप्रतिषेधः	११०

वचनम्	पृष्ठसंख्या
भवत्येतत्सूत्रोपात्ताभ्यां कन्	९०
भवत्येतस्माद्विधिः	१९८
भवत्येवंजातीयकानामित्वम्	१२३
भवत्येवंजातीयकानां गुणः	१९०
भवत्येवंजातीयकानामात्मनेपदम्	१४८
भवत्येवंजातीयकेभ्यस्तद्धितोत्पत्तिः	१३१
भाषायामपि यङ्लुग्भवति	११२
भाषायामर्तेः श्लुर्भवति	१२८
भूतशब्दस्य पूर्वनिपातः	२०३
मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम्	२०४
यत्रोत्सर्गापवादं विभाषा तत्रापवादेन मुक्ते उत्सर्गो न	५८
यत्रोर्ध्वं प्रकृतेस्तल्लक्षणो विशेषस्तत्र वृद्धो यूनेत्याद्येकशेषः	४१
यथाजातीयकं परस्य रूपं तथाजातीयमुभयोर्भवति	१३३
यथाजातीयकमुत्तरपदं तादृशेन पूर्वपदेन समासः	१५२
यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः	१८७
यावत्येव द्वितीयस्वरस्य प्रादुर्भावस्तावत्येव पूर्वस्य निघातः	८६
युचो रेण समावेशः	७०
रूपं स्थानिवद्भवति	३१
रूपाभेदेन ये आदेशादयो न तेभ्यः प्रतिषेधः	११३
लकाराणां लस्य नेत्त्वम्	७४
लुक्श्लुलुपः सर्वादेशाः	३३
लौकिकं परं गोत्रम्	७८
वर्णग्रहणे जातिग्रहणम्	१७
वाग्रहणं (अत्रानुनसिक इति सूत्रे) स्पष्टार्थम्	२२०
विकृतिश्चतुर्थ्यन्ता प्रकृतिस्वरा न चतुर्थीमात्रम्	५४
विभक्त्योर्ग्रहणं न प्रत्ययथोः	५०
विभक्त्योर्ग्रहणम्	९८,११७
विभाषा समासान्तः	१०७
विशब्दने घुषेर्विभाषा णिच्	११९
विशेषणषष्ठ्येषा न स्थानषष्ठी	१९३
वृद्धेर्लोपो बलीयान्	१२४
वृद्धौ कृतायां लोपः	६३
वैकल्पिकमष्टन आत्वम्	१०१
व्यधिकरणपदोऽपि बहुव्रीहिः	२०७
व्याख्यानं शब्दग्रन्थविषय एव	८५
शब्दसंज्ञायां न स्वरूपविधिः	१४४
संपूर्वस्य क्वचिदभूषणेऽपि सुट्	२१६
संभावनेऽप्यालमर्थे न गम्यते	१६१

वचनम्	पृष्ठसंख्या
सति शिष्टेऽपि विकरणस्वरः सार्वधातुकस्वरं न बाधते	६७,१७८
समासतद्धितानां वृत्तिर्विभाषा नित्योऽपवादः	५३
समुच्चयोऽयं न विभाषा	९३
सर्व एते तद्धिताः सापेक्षाद्भवन्ति	१६९
सर्वनामशब्दे न णत्वम्	२१
सर्वोऽप्येकदेशोऽह्ना समस्यते	२०५
सानुबन्धकस्यादेशे इत्कार्यं न	७४
साहचर्यं न सर्वत्र व्यवस्थापकम्	२२१
सिजन्तस्य नकारलोपो न	६४
सिद्धः प्लुतः स्वरसन्धिषु	१६
सिद्धः संयोगान्तलोपो नलोपे	१७५
सुप् सुपेति न नित्यसमासः	२०३
सुबन्तात्तद्धितोत्पत्तिः	८५
सूत्रेषु लिङ्गनिर्देशो न विवक्षितः	२०६
स्त्रीप्रत्ययेषु तदन्तविधिः	२१२
स्वयधिकारादूर्ध्वं वासरूपविधिर्न	७३
स्थानित्वेन निमित्तत्वमिको न बाध्यते	२१५
स्थानिवदादेशो भवति	१४०
स्वलक्ष्मणः पुरालक्षणश्चाद्यतने न भवतः	६८
स्वरविधौ संघातः कार्यी भवति	१०४
स्वादिषु पदत्वेन येषां पदसंज्ञा न तेभ्यः प्रतिषेधः	१३९
हेतौ तृतीया अनेन बाध्यते	२०७

शुद्धिपत्रम्

पृष्ठम्—पङ्क्तिः		अशुद्धम्	शुद्धम्
३	१५	°सिद्धया	सिद्धया
४	६	°दिष्कार	दिष्वकार
,,	१३	°स्यावयस्य	स्यावयवस्य
६	१५		'वाच्यम्' इत्यस्मादनन्तरम् 'तत्र तस्य ग्रहणे फलाभावात्। न चैवमपि हृशादिप्रत्याहारे टकारस्यापि ग्रहणापत्तिरिति वाच्यम्' इति पठनीयम्।
,	१८	कैयटे	उद्योते
९	१७	लण् पर्यन्त	लण्पर्यन्त
१३	९	१-१-२	१-१-३
१५	९	°धातुकायोः	धातुकयोः
१६	१६	पिच्च	पिच्च
२०	२३	चर्तुर्भ्यश्च	चतुर्भ्यश्च
२६	२२	१-१-७१	१-१-५१
२८	४	१-१-७३	१-१-५३
५५	१३	प्रघट्टकार्थः	इदं पदं निष्कासनीयम्
६५	१	1	'1' इदं निष्कासनीयम्
६८	१५	स्थितम्	इदं पदं निष्कासनीयम्
९१	११	षष्ठ्यन्ताच्च	षष्ठ्यन्ताच्च
९३	८	सिव्यादि	सिध्मादि
,,	१६	ग्रहाण	गृह्णाण
९४	६	पूर्वकृतः	पूर्वप्रकृतः
,,	८	भावः	इदं पदं निष्कासनीयम्
१०५	४	प्रप्त्या	प्राप्त्या
१११	३	सत्येन	सत्येव
१११	२१	प्रघट्टकार्थः	इदं पदं निष्कासनीयम्
११४	५	शसददि	शसदद
१२६	१७	आख्यात्	आख्यत्
१२९	१५	ऋवर्णान्त-	ऋवर्णान्ता-
१३५	६	इत्युदारणम्	इत्युदाहरणम्
१६४	२०	आनन्तो°	अनन्तो°